Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ अथ रत्नमाला प्रारम्भः

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र॰ मा॰ टी॰ १

॥ श्रीगणेशाय नमः ॥ प्रणम्य भानुं त्रिजगत्तमस्समशेषसर्गस्थितिनाशहेतुम् । दैवज्ञबोधाय मृदुस्फुटार्थां व्याख्यां यतेर्ज्योतिषरत्नमाला १ रामश
र्मप्रसादेंदुविहद्रमतिवारिधिः । महार्थो विवृणोम्येष रत्नमालां सुनिर्मलाम् २ अत्र सतां नावद्यमाचारो यन्प्रवक्तृश्रोतृद्वारेणामात्मान
श्चाशेषानेरायोपशमायेष्टदेवतानमस्कारो भवतीति तस्मादयमपि कश्यपवंशपुंडरीकमार्तंडः समस्तमौहूर्तिकचक्रशिरोमुकुटमाणि
क्यकांतिनिराजितपदद्वंद्वो महाकारुणिकः श्रीकेशवपौत्रः श्रीनागदेवपुत्रः श्रीपतिनामा गहनगणितपाटीगणितबीजगणितेषु
सुनिश्चलमतिर्विविधहोरातंत्रस्य शास्त्रस्य ज्योतिःशास्त्रवनस्पतेः संहिता एव फलानीत्यवधार्य जातकर्मनामकरणमौंजीबंधवि
वाहयात्रादौ गर्गादिसंहितानामपि विस्तरत्वात्प्रतिदिवसमायास्यमानमानसं दैवज्ञनिवहमवेक्ष्य संजातदयो निखिलसंहितार्थम

प्रभवविरतिमध्यज्ञानवंध्या नितान्तं विदितपरमतत्त्वा यत्र नो योगिनोपि । तमहमिह निमित्तं विश्वजन्मात्ययानामनु
मितमभिवन्दे भग्रहैः कालमीशम् १ ॥ त्यग्रंथेनाभिधातुमिच्छुः स्वमुचितेष्टदेवतानमस्कारं मालिन्याह । अहं श्रीपतिनामा तं काल
मभिवंदे । किंभूतं ईशं स्वामिनं व्यापकमित्यर्थः । पुनः किंभूतं विश्वस्य स्थावरजंगमादेर्जन्मात्ययाः उत्पत्तिविनाशास्तेषां निमित्तं कारणं एतेन
स्थितिरप्युपात्तेति । तथा च भारते कालः सृजति भूतानि कालः संहरति प्रजाः । कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः । वाराहिभाष्ये चो
त्पलेनोद्धृतम् । कालेन बलिरिंद्रो भूत्कालेन च निवर्तितः ॥ कालएव पुनः कर्ता पुराणान्येवमूचिरे । अथवा बहुवचनात्स्थितिः प्राप्ता ।
यत्र काले योगिनोपि सिद्धाः सनकादयोपि प्रभवविरतिमध्यज्ञानवंध्याः नितांतमतिशयेन संति उत्पत्तिविनाशांतराले [illegible] हीनाः
कालस्यादिमध्यावसानं योगिनोपि न विदंतीत्यर्थः । न र्हि तेन बहुश्रुताभविष्यंतीत्यत आह । विदितपरमतत्त्वा पंचा[illegible]शाः[illegible]कं ॥ रा॰ १

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

येस्तेः पंचविंशतितत्त्वानि च। पंचबुद्धीन्द्रियाणि। श्रोत्रत्वक्चक्षुर्जिह्वानासिकारूपाणि। पंच कर्मेन्द्रियाणि पायुगुह्यपाणिपादवाग्रूपाणि। पंच तन्मात्राणि। शब्दस्पर्शरूपरसगंधाख्यानि। पंच भूतानि पृथिव्यप्तेजोवाय्वाकाशरूपाणि। मनोहंकारो बुद्धिः प्रकृतिपुरुषश्चेति। एतानि पंच विंशतितत्त्वानि। एतन्मयं च विश्वं। प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था सा विश्वव्यापिनी नित्या। सा पुरुषाधिष्ठिता सर्गाय प्रवर्त्तते। तस्या महान् महत्तत्त्वं बुद्धिसंज्ञं महतोऽहंकारः स त्रिविधः। सात्त्विको राजसः तामसश्चेति। तत्र सात्त्विकादहंकाराद्वैकृताख्यादेकादशेन्द्रियाणि। पंच बुद्धीन्द्रियाणि पंच कर्मेन्द्रियाणि एकादशं मनः। तामसाद्भूतादिसंज्ञात्तन्मात्राणि शब्दादीनि। राजसात्तैजसादहंकारादुभयमपि भवति राजसादहंकारप्रेरितौ सात्त्विकतामसाहंकारौ स— र्गाय प्रवर्तेते प्रवर्तनात्मकत्वाद्रजसस्तन्मात्रेभ्यः पंचमहाभूतानि तत्र शब्दतन्मात्रादाकाशं शब्दगुणं। शब्दतन्मात्रसहितात्स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः। शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणं शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरूपरसतन्मात्रसहिताद्गंधतन्मात्रात् शब्दस्पर्शरूपरसगंधगुणा पृथिवी जायते। तथा प्रकृतिपुरुषयोर्भेदज्ञानेनाभ्यासान्महानुत्पद्यते। तथा च सांख्ये। प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः। तस्मादपि षोडशकात्पंचभ्यः पंच भूतानि। अभिमानोऽहंकारस्तस्माद्द्विविधः प्रवर्तते सर्गः। सात्त्विकैकादशकाधिकैकादशकः प्रवर्तते। वैकृतादहंकाराद्भूतादेस्तन्मात्रः स तामसः। तैजसादुभयं। मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः। एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषं। अपि पर्ययाद्विशुद्धं केवलमुत्पद्यते। एवं च ये विदितपरमतत्त्वाः परब्रह्मज्ञास्ते

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्यन्निमध्यावसाने विधुराः कालकथाद्गतेरेषामिति। ननु सृष्ट्यादौ कालस्यापि उत्पत्तिः कल्पान्ते च। संहारो दृश्यते कथमुच्यते योगिनोपि कालस्या
दिमध्यावसानेज्ञानहीनाइति। तथाचोक्तं ब्रह्मसिद्धान्ते। चैत्रसितादेरुदयाद्भानोर्दिनमासयुगकल्पाः सृष्ट्यादौ लंकायां समं प्रवृत्त्यादि
नेऽर्कस्य। सृष्टिस्तावद्ब्रह्मण उक्ता कल्पान्ते प्रलय इति तथाचोक्तं मनुना। यदा स देवो जागर्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्ता
त्मा तदा सर्वं प्रलीयत इति। ततो ग्रहनक्षत्राणां सर्गादौ निर्माणं तत्कृतिवशाद्धर्षयुगकल्पादिव्यवस्था क्रियते। सत्यं तेषां संहारेत
मोपमस्य कल्पे प्रमाणरूपस्य कालस्य सद्भावात्कथं सृष्ट्यादौ कालस्यादिरिति। तथाच मनुः। दैविकानां युगानां सहस्रपरिसंख्यया
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च॥ षष्ट्यधिकशतत्रयसंख्यैश्चाहोरात्रैः ब्राह्मं वर्षं। वर्षशतायुर्ब्रह्मेति। तस्मिंश्च व्यतीते ब्रह्म
णः संख्यागतागमिष्यति ॥ ~ । तस्य कथं ब्रह्मदिनादौ सृष्टिर्ब्रह्मदिनावसाने संहारो भवति तस्मान्नित्यो व्यापी काल इति। यद्यसौ नित्य
स्त्वात्माकाशतुल्यस्तत्कथं ज्ञातव्यस्तत आह भग्रहैरिति। भानि च ग्रहाश्च तैर्भग्रहैरनुमित अनुमानेन ज्ञातं। तथाच कणादसूत्रे प्रश
स्तकारभाष्ये। कालः परापरव्यतिकरयुगपच्चिरक्षिप्रप्रत्ययलिंगः। तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तावन्यनिमित्तासं
भवात् सर्वकार्याणां चोत्पत्तिविनाशहेतुः तद्युपदेशात् क्षणलवनिमेषकाष्ठाकलामुहूर्तयामाहोरात्रमासर्त्वयनसंवत्सरप्रलयमू
लव्यवहारहेतुश्च। अस्यार्थः। दिग्विशेषापेक्षया न्यायं परस्तस्मादपर इति प्रत्ययः। पश्चादपरस्तस्मात्पर इति प्रत्ययः। परापर
योर्व्यतिकरो व्यत्ययः। तस्मिंश्च युगपत्प्रत्ययो युगप्रत्ययः क्षिप्रप्रत्ययश्चिरप्रत्ययश्चेति कालस्य लिंगं। ननु कालस्याप्रत्यक्षत्वात्ते

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नसहपरापरप्रत्ययानांव्याप्तिग्रहस्याभावात्कुतोलिंगत्वमतआह।तेषामितितेषांयुगपदादिप्रत्ययानां।विषयेषुप्राच्यादिषु·पूर्वप्रत्य
यविलक्षणानांद्रव्यादिप्रत्ययलक्षणानां।उत्पत्तावन्यस्यनिमित्तस्याभावात्कालोऽनुमीयते सचभगणैः।सूर्यादिग्रहनक्षत्रवारैरित्य
र्थः॥कथंलोकेयोऽयंकालकृतःपरापरव्यवहारःसनयनादिपरिस्पन्दात्मीयत्वभूयस्त्वविकारः।तथाहि।अल्पतरनयनादिपरि
स्पन्दान्तरितजन्मालोकेयुवाऽत्रपरइत्युच्यते।वहुतरनयनापरिस्पन्दान्तरितजन्मास्थविरःपरइत्युच्यते।तत्रानुमानं।वहुतरनय
नादिपरिस्पन्दान्तरितजन्मनिस्थविरे।युवानमवधिंकृत्वापरापरत्वमुत्पद्यमानं·कार्यत्वात्।असमवायिकारणवत्॥यत्कार्यंतद
समवायिकारणवत् तथाघटः।कार्यंचेदं।तस्मादसमवायिकारणवत्॥तथाचसतिरूपादीनांव्यभिचारेणनयनादिपरिस्पंदतद
वच्छिन्नद्रव्यसंयोगासमवायिकारणवत्त्वमितिविज्ञायते॥तत्त्वासमवायिकारणंपारिशेष्यात्कालसंयोगएव।तद्व्यपदेशादिति।
तेनकालेनोत्पत्त्यादीनांव्यपदेशात्॥उत्पत्तिकालोविनाशकालइतिनिमेषस्यचतुर्थभागः।क्षणद्वयेनलवः॥अक्षिस्फुरणाप
लक्षितोलघ्वक्षरोच्चारमात्रकालोनिमेषः।पंचदशनिमेषाकाष्ठा।काष्ठात्रिंशत्कला·त्रिंशत्कलोमुहूर्तः·कलादशमभागः।त्रिंश
न्मुहूर्तैमहोरात्रं।तैस्त्रिंशद्भिर्मासः।द्वादशमासाःसंवत्सरः।तैःपंचभिर्वत्सरैर्युगं॥खत्रपवेदागगजसंख्यैर्युगैः ८६४००० चतु
र्युगं।एकसप्ततियुगैर्मन्वन्तरं।चतुर्दशमन्वंतरैःप्रलयः·कल्पसत्त्वइति।अथवाततेर्दशमीश्वरंब्रह्माविष्णुरुद्रहेतुअशरीरिणं·परा
चीनावस्थांकिंभूतंकालं·कालरूपं।तथाभविष्यत्तरेअनंतव्रतमाहात्म्ये आदित्यादिषुवारेषुयःकालउपपद्यते॥कलाकाष्ठामुहू

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रीदि दिनरात्रिशरीरस्थान्। शेषव्याख्या प्राग्वत् १ अथ शास्त्रस्य स्वमतिमात्रविधाननिराकरणं प्रयोजनं चोपजात्याह। ज्योतिषाण्येव र
त्नानि तेषां माला स्रक्। ज्योतिर्ज्ञानं तद्धि यत्ने यस्मात्तज्ज्योतिषं॥ आर्यादित्वात् चूकिमर्थं दैवज्ञकण्ठाभरणार्थं॥ यानि किल पूर्वशा
स्त्राणि तेषां बंधशैथिल्यात्पठतां न तथा पाठकं भवति। कंठस्थेन तदेवाभरणजं माधुर्यं पाटवं च ॥ अथ च रत्नमालया कंठाभरणं भ
वतीत्युक्तिलेशः किंकृत्वा॥ गर्गवसिष्ठपराशरादिप्रणीतं वराहलल्लादिकृतं च शास्त्रं विलोक्य दृष्ट्वा। ननु यदि गर्गादिमुनिप्रणीतं
शास्त्रं विलोकितं तत्कथं वराहादिकृतशास्त्रेषु दरइति। सत्यं। वराहादिभिर्बहुमतान्यवलोक्य ग्रंथउपनिबद्धास्तमपि दृष्टमित्यर्थः

विलोक्य गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च शास्त्रं। दैवज्ञकंठाभरणार्थमेषा विरच्यते ज्योतिषरत्नमाला
२ शकेन्द्रकालः पृथगाकृतिघ्नः शशांकनंदाश्वियुगैः ४२१९१ समेतः॥ शराद्रिवस्विंदु १८७५ हृतः स लब्धः षष्ठ्या
६० प्रशेषे प्रभवादयोऽब्दाः ३॥ २ अथ वर्षर्तुमासपक्षदिनमुहूर्तादीनां शुभाशुभफलान्यभिधातुमिच्छुरादौ तावत्प्रभवादीनामुत्प
त्तिमुपजात्याह। शकानाम म्लेच्छानां यस्मिन्काले विक्रमादित्येन व्यापादिताः स कालो लोके शक इति प्रसिद्धः। ततः शककालमारभ्य येसं
वत्सरा गतास्ते पृथगाकृतिघ्ना द्वाविंशत्या २२ गुणयेत्। स गुणितो राशिः शशांकनंदाश्वियुगैः एकनवत्यधिक
द्वाचत्वारिंशत्सहस्रैः ४२१९१ युक्तः कार्यः। ततः शराद्रिवस्विंदुभिः पंचसप्तत्यधिकाष्टादशशतैः १८७५ भजेत्। लब्धं वत्सराः। तेहृतस्ततो राशयः। शेषं
त्रिंशता संगुण्य तेनैव छेदेन यो भागो लभ्यते ते राशीनामधः स्थाप्याः शेषं षष्ट्या संगुण्य तेनैव छेदेन कला विकला अंकानामधः ६ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थाप्याः। ततः शककालः सलब्धः कार्यस्तेन वर्षादिना युक्तः कार्यः। वत्सरावत्सरेषु शेष्याः शेषमधोधः स्थापयेत्। ततस्तस्य षष्ट्या भा
गे हृते प्रभवाद्या याता गतवत्सरा भवंति। अधस्थसंख्याद्वित्सरस्य गतं ततः देवत्रिंशता विशोध्य वर्त्तमानवत्सरस्य गम्यमेव च ति। तच्च विकलारू
पं कृत्वा गुरुमध्यमभुक्त्या सवर्णितया तया विभज्याप्तदिनानि वर्त्तमानवत्सरस्य गतानि गम्यानि वा भवंति। स एवमप्यमेषादिः स्फुटमेषादे
र्दिनद्वयेन दशघटिकाभिः सर्द्धाभिः पश्चाद्भवति। सूर्यफलस्य धनगतत्वात्। उच्चस्थितत्वाच्च। सावनेन तु एकस्याः संवत्सरप्रवृत्तेः साव
नदिनैरेकषष्ट्यधिकत्रिशतैर्घटिकाद्वयाधिके ३६१।२ द्वितीयसंवत्सरप्रवृत्तिः। अत्र गुणनाङ्कस्मानीयबीजदेशान्तरसंस्कृतो यदा राशिस्तज
नितत्काले संवत्सरप्रवृत्तिः तथा च बृहस्पतेर्मध्यमराशिभोगादिति वक्ष्यति। अत्र वासनाऽऽर्यभट्टः। गुरुभगणा राशिगुणा गुरोरब्दाः
गुरुभगणानां संख्या जिनयमवेदांगहववनभुजः ३६४२२४ राशिगुणा इति। भगणो द्वादशराशयः। द्वादशगुणा इत्यर्थः। द्वादशगुणा गुर्व
ब्दानां संख्या अष्टाष्टरसखाद्रिगुणवेदाः ४३७०६८८ रविभगणा एव रव्यब्दाः खचतुष्कयरदवेदाः ४३२०००० गुरोरब्दानां रव्यब्दा
नां चान्तरे कृते गुरोरब्दाः खवसुतुखशराः ५०६८८ ततस्त्रैराशिकं यदि चतुर्युगरव्यब्दैरेतदन्तरं प्रादिशिकं गुरोरब्दादिकेन रव्यब्देन कि
यदिति न्यासः ४३२००००।५८८ लब्धं फलं प्रतिवर्षमन्तरं भवति। शकराशिद्वावपि। कृत खगुणयमै २३०४ रपवर्त्तितौ। भाज्यस्थाने
द्वाविंशति २२ भाजकस्यव्यब्दस्थाने शराद्रिवसुरिंदवः १८७५ एवं सार्द्धपंचाशितिगते वर्षे सौरवर्षाद्गुरुवर्षमधिकं भवति अथ क्षेप
कोत्पत्तिः। आर्यभट्टाहर्गणेन गुरुभगणेन सावनभक्तेन गोगैकगुणसंख्यैः कलौ गते चैत्रादौ भौमदिने लब्धो मेषस्थो गुरुः ८॥ ३०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यतो माघे धनिष्ठास्थे गुरौ उदिते प्रभवस्य प्रवृत्तिस्तरौ मकरान्ते प्रभवप्रारंभः। कुंभमीनाभ्यां प्रभवविभवावतीतौ॥ मेषस्यार्कविंशैः सार्द्धैर्गुरुमध्यमभुक्तिभक्तैः भुक्तस्य लब्धा गतमासाः ३ दिन १३ घटिका ५२ यद्येवं गोगैकांगुणतुल्यकलिगतः स एव शकादि। अतः शकादौ षष्ट्यावृत्तावतीतं वर्षद्वयं त्रयो मासाः त्रयोदश दिनानि द्विपंचाशद्घटिकाः एतच्छेदेन परिभाज्यते। वर्षद्वयं छेदेन १८७५ संगुणय ३७५० मासत्रये दिनीकृते २० सहिते १०३ स्वच्छेदेन १८७५ गुणिते १९३१२५ जातं द्विपंचाशद्घटिकासु छेदगुणासु ९७५०० षष्ट्या हृतासु लब्धं १६२५ दिनेषु १९३१२५ युक्तं जातं १९४७५० एतत् षष्ट्याधिकशतत्रयभक्तं फलं वत्सराः ५४१ एतद्वर्षद्वयप्रच्छेदे ३७५० संयोज्य जाताः शशांकनंदाब्धियुगाः ४२९१ एवं संजातशकवत्सराः। तान्द्वाविंशत्या गुणयित्वा प्रागानीतक्षेपे एशशांकनंदाब्धियुगाख्येन युतान्कुलाशराद्रिवसुखेन्दुभिर्हृता लब्धे फलेन शककालं युक्तं कृत्वा बार्हस्पत्येन मानेनाब्दगणो भवतीत्युपपन्नं। तथा च पंचसिद्धांतिकायां रविशशिभवनाः पंचयुगवर्षाणि पितामहो यदिष्टानि त्र्यधिमासद्युच्निसमैर्मासैः स्वयमाविषष्ट्यन्ता। नूनं शकेन्द्र—कालं पंचभिरुद्धृत्य शेषवर्षाणां द्विगुणं माघसितात्कुर्याद्द्युगुणस्तदन्दृउदयान्। शककालादौ द्वाभ्यां प्रभवविभवाभ्यां जातः शककालोऽस्ति तं पंचभिर्भक्त्वा शेषाणां द्विगुणं कुर्यात्। स शकाब्देगतयुगद्युगुणो भवति २ अथ प्रभवादीनां नामान्यार्यासप्तकेनाह। एषां ना

प्रभविभवाख्यसुक्ताः प्रभोऽस्नामा प्रजापतिरथाब्दः। परतोऽङ्गिरास्ततश्च श्रीमुखभावौ युवाख्योऽन्यः ४॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

५॥६।७।८।९।१०॥ अथैषां प्रभवादीनां यावता कालेन भोगस्तमुपेन्द्रवज्रयाह। इयं हीति। यथा मध्यमगुरुः राश्यंतं न्यजाति न हि ने
ता वर्तेभिर्घटिकाभिर्वर्षप्रवृत्तिरित्यर्थः। सा च षष्टी गुरुणा क्रमेण प्रयोक्तव्या। ननु इयं वर्षाणां षष्टिरेवेति कथमुक्तं। गुरुवर्षाणि कल्पा
देश्चतुर्युगाद्यप्रवृत्तानि इत्यत आह। इयं हीति। हि यस्मात् दृष्टे। यस्मादियं वर्षाणां षष्टिः पूर्वमुनिप्रवर्यैरुदाहृता न कल्पिता। किं त्वेषा वि

धानेश्वरबहुधान्यौ प्रमाथिनामाथ विक्रमः सवृषः। अथ चित्रभानुरस्मात्सुभानुरथ तारणाख्यश्च ५ पार्थिवनामाव्य
य इति सर्वजिदाख्यो ऽथ सर्वधारी च। तदनु विरोधी विकृतः खरनंदनविजयसंज्ञाः ६ मन्मथदुर्मुखसंज्ञा यथा
परौ हेमलंबकविलंबौ। तदनु विकारिनामाथ शार्वरीप्लव इति शुभकृत् ७ शोभनकृद परः क्रोधी विश्वावसुस्तु पराभवा।
ख्यश्च। परतः प्लवगनामा कीलक इति सौम्यसंज्ञश्च ८ साधारणो विरोधकृदथ परिधावि प्रमादिनामानौ आनंदराक्ष
साख्यौ नलपिंगलकालयुक्ताश्च ९ सिद्धार्थरौद्रदुर्मतिदुंदुभयो वत्सराः क्रमादपरे। रुधिरोद्गारी रक्ताक्षक्षयसंज्ञकः क्रो।
धनः क्षयकृत् १० इयं हि षष्टिः परिवत्सराणां बृहस्पतेर्मध्यमराशिभोगात् उदाहृता पूर्वमुनिप्रवर्यैर्नियोजनीया
गणनाक्रमेण ११ तपस्विखलु यदा सावुद्रूयं याति मासि प्रथमलवगतः सन्वासवेवासवेज्यः। शांतिविंशतिवर्षैरुत्तमम।

ध्यमाधमफलान्यवलोक्य ब्रह्मणादयं संज्ञा विहिता। तदवश्यैव संहिताकारैश्च शमत्रिषूदाहृता केवलं गणनामात्रमेव वयं कुर्म्म इति। एतेषां फला
नि वराहमिहिरोक्तानि ज्ञेयानि ११ अथ यस्मिन्काले प्रभवस्य प्रवृत्तिस्तमाह। तपसीति। खलु निश्चयेन यस्मिन्काले माघे मासि प्रथमचतुर्थां प्र

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्थो गुरुरुदेति तदा सर्वलोकहितार्थं सर्वलोकानंदार्थं प्रभवनामसंवत्सरो भवति १२ अथ द्वादशयुगान्याह। युगमिति। युगानि चपु
नः द्वादश भवन्तीत्यन्वयः १३ अथैतेषां युगानामधिदेवताः पूर्वाचार्योक्ताः पादाकुलेनाह विष्णुर्जीवेति। त्वष्टा विश्वकर्मा। अहिर्बुध्न
एकादशरुद्राणां मध्ये देवाः। विश्वे विश्वेदेवाः। इन्द्रज्वलनौ इन्द्राग्नी द्वादशमस्याधिपती। नासत्यावश्विनौ एकादशस्य। भगो द्वादशादित्या
नामेकतमः प्रयोजनं चैषां। तद्देवतावैकृतेषु युगेषु तद्देवत्येन नक्षत्रककूर्मविभागेन पीडा भवति १४ अथैषां नामान्तराण्याह। संवत्स

निखिलजनहितार्थं वर्षवृंदे वरिष्ठः प्रभव इति सनाम्ना जायते वत्सरादौ १२ युगं भवेद्वत्सरपंचकेन युगानि च
द्वादशवर्षषष्ट्या भवंति तेषामधिदेवताश्च क्रमेण वस्यामि मुनिप्रणीताः १३ विष्णुर्जीवः शक्रो दहनस्त्वष्टा।
चाहिर्बुध्न्यः पितरः विश्वे सोमश्चेन्द्रज्वलनौ नासत्यावन्त्यश्च भगः १४ संवत्सरः प्रथमकः परिवत्सरोन्य स्तस्मा
दिदान्विदिति पूर्वपदापरे स्युः। एवं युगेषु सकलेषु तदीयनाथा वक्ष्यर्क्षशीतगुविरंचिशिवाः क्रमेण १५ शिशिर

पूर्वमृतुत्रयमुत्तरं त्वयनमाहुरहश्च तदामरौरेति। संवत्सरपरिवत्सराभ्यामपरत्रयः। इदान्विदिति पूर्वपदा भवेयुः। इदाच्च
अनुचरन् त्वेन पूर्वपदानि वत्सरस्य येषां तेन तथा तन्तत्श्च तृतीयइदावत्सरः। चतुर्थो अनुवत्सरः। पंचमइद्वत्सरः। एवं द्वादशस्वपि संव
त्सरादयः पंच भवंति तेषां वन्ह्यादयः स्वामिनो यथासंख्यं भवंति। फलानि चैषां वराहोक्तानि १५ अथ वर्षाणां परिचर्यार्थमयन
सवर्षर्हिलाम्नसंगप्राप्तावयनस्पलसपण्डुनवितलंविनेनाह शिशिरेति ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नकेवलमुत्तरायणं।आमरमहश्चा।देवानांपुनर्हिनं।अन्यहत्तुत्रयदक्षिणमयनं।साचदेवानांरात्रीति १६ अथायनप्रयोजनमुपजात्याह।गृहे॰ नितुगमे १७ अथर्त्तुलक्षणमाह।मृगादीनि।मकरादेराशिद्वयेनषडर्त्तवः षड्ऋतवः स्युर्भवेयुः।षडर्तवइतिपरंवैदिकत्वात्।मकरकुंभाभ्यांशिशिरः।मीनमेषाभ्यांवसंतः।वृषमिथुनाभ्यांग्रीष्मइति।चकारएवार्थे।मकराद्याएवऋतवोनमाघाद्याः।अन्यथामाघादिमासद्वयगणनायामधिमाससंभवेएवऋतुत्रिमासः स्यात्।सौरमतेनतावानेवभोगइति।एषामृतूनांदेवताभीमपराक्रमात्।तथाच।मरु॰ तोग्निस्त्रिदशपतिर्विश्वेदेवाःप्रजापतिर्विष्णुः।इतिशिशिरप्रभृतीनांक्रमादृतूनांपतयइति १८ अथमासलक्षणंचतुर्द्धाह।दर्शेति।शुक्लप्रतिप

भवतिदक्षिणमन्यदृतुत्रयं निगदितारजनीमरुतां चसा १६ गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचूडाव्रतबंधपूर्वं सौम्यायने कर्मशुभंविधेयंपद्गर्हितंतत्खलुदक्षिणेतु १७ मृगादिराशिद्वयभानुभोगात्षडर्त्तवः स्युःशिशिरोवसंतः ग्रीष्मश्चवर्षाचशरच्चतद्वद्धेमंतनामाकथितोत्रषष्ठः १८ दर्शावधिंमासमुशंतिचांद्रं सौरंतथाभास्कर राशिचारात्।त्रिंशद्दिनं सावनसंज्ञमाहुर्नाक्षत्रमिन्दोर्भगणभ्रमाच्च १९ ॥

ऽद्यादिदर्शांतश्चांद्रोमासः संक्रांतिमारभ्यापरसंक्रांतियावत्सौरमासः।त्रिंशत्संख्यैःसूर्योदयैर्दिनैःसावनमासः सप्तविंशतिषुनक्षत्रेषुचंद्रभुक्तेषुनाक्षत्रमासः।तत्रचांद्रोधिमासयोगात्सर्वेभ्यश्चांद्रमानमधिकंततोऽधमपातात्सावनोन्यूनः अधिमासाभावात्सावनात्सौरोन्यूनः ततोपिनाक्षत्रन्यूनःइति।प्रयोजनंचैषां।विवाहादौस्मृतःसौरोयज्ञादौसावनोमतः।आब्दिकेपितृकार्येचमासश्चांद्रमसोमतइति।स्कंदपुराणे।रुद्रउवाच।अभ्युदयेरवेर्मासश्चांद्रः स्यात्पितृकर्मसु।यज्ञेसावनइष्य

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मासानांनामान्याह। मधुरिति। तेमासाश्चैत्रादिक्रमेणमधुरादिनामानोभवंति २० स्वनामेति। मासाश्चैत्राद्योनिजनक्षत्रस्ययोधिपतिस्तद्धिपनयोज्ञेयाः यथाचैत्रस्यत्वष्टावैशाखस्यइन्द्राग्नी। ज्येष्ठस्यवासवइत्यादि। नकेवलमधुमाधवसंज्ञकाःस्वनामनक्षत्रसमाननाथाश्चेतिचशब्दार्थः तेनामनक्षत्रेतत्पूर्णिमायांभवतीति। पक्षौचशुक्लकृष्णौदैवपित्र्यौ। शुक्लोदैवः। कृष्णःपित्र्यः। प्रयोजनमाहशुभाशुभइत्यादि। शुभेगृहप्रवेशादौ। अशुभेचाभिचारादौ। पर्वसंभवेपर्वदेवताशुक्लो। तथाचभीमपराक्रमोयस्मिन्पक्षेभवेत्पर्वापक्षयोः

मधुस्तथामाधवसंज्ञकश्चशुक्रःशुचीचाथनभोनभस्यौ। तथेषऊर्ज्जश्चसहःसहस्यौतपस्तपस्याविति तेक्रमेण।२० स्वनामनक्षत्रसमाननाथामासाश्चपक्षावपिदैवपित्र्यौ उभौनिरुक्तौखलुशुक्लकृष्णौशुभाशुभेकर्म्मणितौप्रशस्तौ २१ इतिश्रीश्रीपतिभट्टविरचितायांज्योतिषरत्नमालायांसंवत्सरप्रकरणंप्रथमः॥ तिथिपाश्चतुर्मुखविधातृविष्णवोयमशीतदीधितिविशाखवज्रिणः। वसुनागधर्मशिवतिग्मरश्मयोमदनःकलिस्तदनुविश्वइत्यपि १॥ तिथौहिदर्शसंज्ञकेपितृननुशंत्यधीश्वरान्। त्रयोदशीतृतीययोःस्मृतस्तुवित्तपापरैः २॥ शुक्लकृष्णयोःतदसदेवताशु

क्लौताबुभावपिसूरिभिरिति २१ इतिश्रीमहादेवकृतरत्नमालाविवरणेसंवत्सरप्रकरणंप्रथमः। अथतिथयोनिरूप्यतेतेनत्रादावेवतिथिदेवनामर्कटीलक्षसाहतिथीति। कलिश्चतुर्थयुग। प्रयोजनंचैषांतद्देवताप्रतिष्ठाक्रियास्वस्वतिथिषुकार्येति। यादेवताःपूर्वाचार्यैरुक्तानाएवास्माभिरुच्यन्ते। नस्वधियेत्यपिशब्दार्थः १ अमावास्यातृतीयात्रयोदशीनांदेवानतएवाह। तिथहीतिहिनिश्चयेनपितृनेव २॥ रम ६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथपुराणोक्तदेवताउपजात्याहावह्नीति।प्रयोजनंचंपूर्वीच्युतजयावृद्धावीशदुर्गान्तकक्षये।उपोष्याद्वादशीशुद्धात्रयोदश्यांतुपारणमि।
त्यादि३प्रतिपत्प्रभृतीनांनामान्तराणिवसन्ततिलकोपजातिभ्यामाह।वृद्धिरिति।प्रतिपदोवृद्धसंज्ञानंदाच।द्वितीयार्थः।याःसुमंगलप्रदा
।तृतीयाःबला।चतुर्थ्यांखला।पंचम्यांलक्ष्मीवती।षष्ठ्यांअपयशाः।सप्तम्यांमित्रा।अष्टम्यांबला।नवम्यांसुमहतीसुमहाबलेत्यर्थः।
दशम्यामुग्रकर्म्मा।एकादश्यांधर्म्मिणीनंदाच।द्वादश्यांयशोवती।त्रयोदश्यांजया।चतुर्दश्यांउग्रा।पूर्णिमायाःसौम्याइतियथार्थाः

वह्निर्विरंचिर्गिरिजागणेशः फणीविशाखोदिनकृन्महेशः।दुर्गान्तकोविष्णुहरिस्मरश्चसर्व्वःशशीचेतिपुराणदृष्टः३॥
वृद्धिःसुमंगलप्रदाचबलाखलाचलक्ष्मीवतीत्वपयशाःपरतश्चमित्रा।ततर्बलासुमहतीतिथिरुग्रकर्म्मासाद्धर्म्मिणी
प्रतिपदादितिथिषुवनंदा४ क्रमाद्यशोवत्यपराजयोग्रासौम्याव्हयापंचदशीतिथिश्च।फलानितिनाम्नासदृशानिता
सांमहर्षिभिर्नूनमुदाहृतानि ५ नंदाचभद्राचजयाचरिक्तापूर्णेतिसर्वास्तिथयःक्रमात्सु॥कनिष्ठमध्ये
ष्टफलासुशुक्लेकृष्णेभवन्त्युत्तममध्यहीना ६॥ ॥संज्ञाःकल्पिताःप्रतिपदादिकृत्यानिरत्नकोशात्ज्ञातव्यानि॥५॥अथपंच
पंचतिथीनांनामानिफलानिचाह।नन्देति।सर्वाःप्रतिपदाद्याःक्रमाद्यथाक्रमंवारत्रयंनंदादिसंज्ञकाभवंति प्रतिपत्षष्ठ्येकादश्यो
नंदाःद्वितीयासप्तमीद्वादश्योभद्राः।तृतीयाष्टमीत्रयोदश्योजयाःचतुर्थीनवमीचतुर्दश्योरिक्ताःपंचमीदशमीपूर्णिमापूर्णाःएवंकृ
ष्णपक्षेपि।कनिष्ठेति चेद्वृद्धिहानीभ्यांनासांबलमित्यर्थः॥ ६ ॥ ६ ॥ ६ ॥❁॥ ॥❁॥ ❁॥ ॥❁॥ ॥❁॥ ❁॥ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र·मा· अथ नंदाकृत्यमाह। नंदेति। आसवं मद्यं। तंत्रशास्त्रं। वास्तु गृहादि। नृत्यं नर्त्तनं। तथा च भास्करः। नंदासु नर्त्तनक्षेत्रवास्तुचित्रं तथासवमि-
टी· ति। शकटाध्वयानं रथेन गमनं। अथ भद्राकृत्यमाह। भद्रास्विति। भद्रासु तिथिषु पौष्टिकानि कार्याणि। तथा भास्करः। पौष्टिकं द्वितीयासप्त-
७ मीद्वादशीषु कुर्वीत। पत्तनगृहशयनशकटाध्वयानानि ७ अथ जयारिक्तयोः कृत्यमाह। जयास्विति। संग्रामोपयोगीनि शस्त्रा-
णि वलोपयोगीनि सैन्योपयोगीनि सन्नाहादीनि तथा च भास्करः। जयासु विदधीत नाजिवलकार्याणि निर्हन्त इति रिक्तासु। शत्रूणां व

नंदासु चित्रोत्सववास्तुतंत्रक्षेत्रादि कुर्वीत तथैव नृत्यं विवाहभूषाशकटाध्वयानं भद्रासु कार्याण्यपि पौष्टिकानि
॥७॥ जयासु संग्रामवलोपयोगिकार्याणि सिध्यंति हि निर्मितानि॥ रिक्तासु विद्विड्वधबंधघातं विषाग्निशस्त्रादिषु या-
ति सिद्धिं ॥८॥ पूर्णासु मांगल्यविवाहयात्रासपौष्टिकं शांतिककर्म कार्यं। सदैव दर्शे पितृकर्म मुक्त्वा नान्यद्विदध्या-
च्छुभमंगलादि ॥९॥ तिथिसु युग्मा खलु पक्षरंध्रं भवेद्द्वितीयादशमीं च हित्वा॥ ॥धो वधो घातश्च विषस्याग्नेश्च प्रयोगः का-

र्यः। आदिग्रहणादभिचारादि च। तथा च भास्करः। चतुर्दश्यां चतुर्थ्यां च नवम्यां चारिमर्द्दनं। दमनं बंधनं भेदं च अभियोगाभिचारके विषा-
ग्निसंप्रयोगं च कुर्वीत कपटानि च। तथा नान्यप्यानिष्टानि तिथिष्वासु समाचरेदिति ८ अथ पूर्णाकृत्यमाह। पूर्णेति। ग्रहपीडान्याना-
दिशांतये यद्धोमादिकं तच्छांतिकं। आयुर्द्रव्यादिवृद्ध्यर्थं पौष्टिकं तथा च भास्करः विवाहयात्रोत्सवपौष्टिकानि पूर्णासु कार्याण्यपि शां- राम·
तिकानि ९ तिथ्यीति। युग्मा समाप्तिश्च यः पक्षरंध्रसंज्ञाः द्वितीयादशमीं च हित्वा॥ ० ॥ ॥ ६ ॥ ॥ ॥ ७

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतयोर्न पक्षरंध्रत्वमित्यर्थः तथा विषमास्तिथयो नवमीरहिताः शुभाः १० अथ क्रूराक्रांतराशिवशेन तिथिदोषमुपजात्याह। आद्येति। प्रति
पदाद्याश्चतस्रस्तिथयो मेषादीनां चतुर्णां संबंधिन्यः। पंचमी च प्रत्येकं मेषादीनां संबंधिनी। पराः षष्ठ्यादयः परेषां सिंहादीनां दशमी च
प्रत्येकं सिंहादीनां परतः एकादश्याद्याः धनुरादीनां। पंचदशी तिथिश्च प्रत्येकं धनुरादीनां अयमर्थः। मेषस्थे क्रूरे रविभौमशनीनामन्यतमे
प्रतिपत्पंचमी चतुष्टा। वृषस्थे क्रूरे द्वितीया पंचमी। मिथुनस्थे तृतीया पंचमी च। कर्कस्थे चतुर्थी पंचमी च। सिंहस्थे षष्ठी दशमी च क
न्यास्थे सप्तमी दशमी च। तुलास्थेऽष्टमी दशमी च। वृश्चिकस्थे नवमी दशमी च। धनुस्थे एकादशी पूर्णिमा च। मकरस्थे द्वादशी पूर्णि

दर्शश्च तासां विषमा वसिष्ठाः स्मृता मुनीन्द्रैर्नवमीं विहाय १० आद्याश्चतस्रः क्रियपूर्वकाणामेषां चतुर्णामपि पंचमी
स्यात्। पराः परेषां परतस्तथैव शक्रूरराशेरशुभा तिथिः स्यात् ११ एकांतरादिनकरैतिथयो द्वितीया पूर्वा धनुःशफर
योर्वृषकुंभयोश्च कर्काजयोश्च मिथुनावलयोर्मृगेंद्रकौर्प्यस्तुलामकरयोश्च भवंति दग्धाः १२ नष्टेंदुषष्ठीप्रतिपत्सु धीमा
न्न जातु दंतोत्कषणं विदध्यात्॥ मा च। कुंभस्थे त्रयोदशी पूर्णिमा च। मीनस्थे चतुर्दशी पूर्णिमा च ११ अथ यत्रराशिस्थे सूर्ये यास्तिथ
योदग्धास्ता आह। एकांतरेति। धनुर्मीनस्थे रवौ द्वितीया दग्धा भवति। वृषकुंभस्थे चतुर्थी। कर्कमेषस्थे षष्ठी। मिथुनकन्यास्थेऽष्टमी। सिंहवृश्चि
कस्थे दशमी। तुलामकरस्थे द्वादशी। दग्धेति प्रत्येकं संबंधः। द्वितीयापूर्वाः द्वितीयाद्याः इत्यर्थः। एवं कृष्णपक्षेऽपि। मंगलकर्म न कुर्यात्। दुष्टामपि
तिथौ न क्षत्रेऽनुकूले निशि कर्म कुर्यात्। तथा भास्करः। तिथिर्विरुद्धा यदि भवंतु शस्तं न दोदिते दोनिशि कर्मकार्यं धिष्ण्ये विरुद्धे तिथिपूजितायां दिवा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र.मा. षष्ठ्यां कुलनाशः प्रतिपदि ज्ञातिजननाशः दन्तकाष्ठेन कुलद्रव्यज्ञातिनाशो यथाक्रमम्। जायते षष्ठ्याममावास्याप्रतिपत्सु कृते सतीति
टी. स्मृतिवाक्यात् एतास्तिथयस्तात्कालिको ग्राह्याः तथा च स्मृतिः स्नाने चाभ्यंजने चैव दंतधावनमैथुने तिथिस्तात्कालिकी ज्ञेया तथा
८ मरणजन्मनोः १३ अथ द्वितीयादशमीत्रयोदशीषु स्नानुःफलं सप्तम्यमावास्यानवमीषु चामलकस्नाननिषेधं चाह। स्नानुर्जनेति।
अर्थद्रव्यं उभयं द्रव्यं पुत्राश्च अर्थे द्वितीया हंति। एतच्च मलापकर्षस्नानविषयं तथा च भास्करः स्नानुस्तनूतां दशमीत्रयोदश्यर्थे
द्वितीया द्वितयं निहंति। मलापह स्नाननिषेध एव न नित्यनैमित्तिककाम्यबाधा त्रयोदश्यां द्वितीयायां दशम्यां च विशेषतः शूद्रवित्सत्रि

कुर्वन्नवाप्नोति नदा शुनूनं लक्ष्मीकुलज्ञातिजनोपघातं १३ स्नानुर्ज्जनस्य दशमी ननु यांत्रयोदश्यर्थे निहंतुभयमे
नदपि द्वितीया। सप्तम्यनितु नवमीषु च संपदिच्छुः स्नायान्कदाचिदपि नामलकैर्मनुष्यः १४ षष्ठीषु तैलं पलमष्ट
मीषु क्षौरक्रिया चैव चतुर्दशीषु। स्त्रीसेवनं न ऋतुकलासु पुंसामायुःक्षयार्थं मुनयो वदंति १५ अष्टम्यादिषु नाद्याद्या
ननीक्षुः कस्याचिदपि विद्वान्॥ ॥ याः स्नानेनाचरेयुः कथं च नेति सप्तम्यमावास्यानवमीषु चामलकस्नानं लक्ष्मीनाशनमित्यर्थः अ
न्यदिने चामलकस्नानं श्रीकारि। तथा च भास्करः सप्तम्यं च द्वानवमीषु देह श्रीसन्ततोऽमलकैर्नरस्य स्नानं निहंत्यन्यदिने तु धत्ते श्रीपक्ष
तिलैः पुण्यकरं सदैव १४ षष्ठ्योष्विति। पलं मांसं एता अपि तिथयस्तात्कालिक्यो ग्राह्याः १५ अथाष्टम्यादिषु येषामभ्यक्षत्वं ना न्यायेनाह। ॥ राम.
अष्टम्यादिति अष्टम्यां शुक्ला यां कृष्णायां च नारिकेरं न क्षयेत्। नवम्यां तु वा निदशम्यां नालिकाशाकं। एकादश्यां वल्लान् द्वादश्यां बिल्वानि ८

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रयोदश्यां हृन्ताकानि। नाद्यान्न भक्षयेदिति। एतेषां प्रसिद्धनामसङ्ज्ञावेपि शीर्यादीनामव्यपदेशस्तत्तुल्यफलार्थं। यथा शीर्षभक्षणेन नरक पातस्तथा रुम्यां नारिकेरभक्षणेनेति। एवं कपालादीनामपि संयोज्यं। तिलानि चेति तिलकल्कानि। एतच्च विष्णुबलिविधाने दर्भपुरुषस्य शीर्षादौ विन्यासाद्गृह्यकारेणापि परिहृतं। स्मृतौ तु नखशब्देन शणपुष्पमुक्तं। तथाचाचारसारे नारिकेलफलालाबूनालीपुष्पशणोद्भवं। विल्वं तदनु हृन्ताकमष्टम्यादिषु वर्ज्जयेदिति १६ राकानुमत्येति। रात्रौ सूर्यास्तानन्तरं दृष्टे चंद्रे राका नाम पौर्णमासी। दिवा शेषे दृष्टेऽनुमती पूर्णिमा दर्शश्च रात्रिशेषदृष्टे चंद्रे सिनीवाली संज्ञकः। रात्रिशेषेऽदृष्टे चंद्रे कुहूनामकः १७ अथ युगादिमनुष्वाह। माघेइ

शीर्षकपालांत्राणि नखचर्मतिलानि च क्रमशः। १६ राकानुमत्याविति पौर्णमास्यौ रात्रिद्युदृष्टेंदुवशाद्भवेतां। कुहू
सिनीवाल्यपि नष्टदृष्टे चंद्रे स्मृते चासितपक्षदर्शौ। १७ माघे पंचदशी कृष्णा नभस्ये च त्रयोदशी। तृतीया माधवे शुक्ला
नवम्यूर्ज्जे युगादयः। १८ अश्वयुक्शुक्लनवमी द्वादश्यूर्जे मधौ तृतीया च।

॥ इति युगस्यस्वपः आदिसरत्नकोशादाह। तथाचानभे कालिद्वापर एवं माघे त्रेता तृतीया नवमी कृते च। एताश्चतस्रस्तिथयो युगाद्या दत्तं हुतं चाक्षयमासु विद्यात्। नारदीयपुराणे वसिष्ठ उवाच। वैशाखशुक्लपक्षे तु तृतीया रोहिणीयुता। दुर्लभा बुधवारेण सौभाग्येन युता तथा। रोहिणी बुधयुक्तापि पूर्वविद्धा विवर्ज्जिता। भक्त्या कृतापि मांधात पुण्यं हंति पुराकृतं गौरी विनायकोपेता रोहिणी बुधसंयुता विनापि रोहिणीयोगात्पुण्यकोटिप्रदा सदा १८ अथ चतुर्दशानां मनूनामादीना यत्रियेणाह। अश्वयुगिति। आश्विनमासि शुक्लनवमी महानवमीत्यर्थः ऊर्ज्जे कार्तिके शुक्लद्वादशी। चैत्रशुक्लतृतीया। भाद्रपदे शुक्लतृतीया

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र.मा. श्रावणेऽमावास्या। पौषे शुक्लैकादशी। आषाढे शुक्लदशमी। माघे शुक्लासप्तमी। श्रावणे कृष्णाष्टमी। आषाढी आषाढपूर्णिमा। कार्तिकी-
टी. कार्तिकपूर्णिमा। फाल्गुनचैत्रज्येष्ठपूर्णिमा। इति मन्वादयः उक्ताः पूर्वाचार्यैरत्र चास्तनापि दृश्यन्ते तथा च लल्लः अश्वयुक् शुक्लनवमी
९ द्वादशी कार्तिके सिता। तृतीया चैत्रमासे तु तथा भाद्रपदस्य च। श्रावणे चाष्टमी कृष्णा पौषे चैकादशी तथा सिताषाढस्य दशमी माघमासस्य स-
प्तमी। श्रावणे चाप्यमावास्या ज्येष्ठे पंचदशी सिता। आषाढी कार्तिकी माघी चैत्री चैव विशेषतः। एते मन्वादयः प्रोक्ता मुनिभिस्तत्त्वदर्शिभिरिति

भाद्रपदे द्वितीया श्रावणमासे त्वमावास्या १९ एकादशी च पौषे शुचिसितदशमी सप्तमी च माघे बहुलाष्टमी नभस्ये
प्याषाढी कार्तिकी न हन्त २० फाल्गुनसितपंचदशी चैत्री ज्येष्ठस्य पौर्णमासी च। मन्वंतरादयः परमे चतुर्दश प्रोक्ता बुधैः
पुण्याः २१ कृष्णपक्षे त्रयोदश्यां मघास्विन्दुकरे रविः। यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते २२ यत्रैकस्पृशति
तिथिद्वयावसानं वारश्चैरवमदिनं तदुक्तमाद्यैः यः स्पर्शो भवति तिथित्रयस्य चाह्नि त्रिद्युस्पृक्तपुनरिदं हूयंच

१९।२०।२१ अथ गजच्छायामाह। कृष्णेति॥ यदा भाद्रपदापरपक्षे हस्तस्थे रवौ त्रयोदश्यां मघानक्षत्रं भवति तदा गजच्छा- १८ नेष्ट२२
या॥ भाद्रपदे मावास्यायां ग्रहणे पित्र्ययोगस्यात्तथानुपपत्त्याऽयं कथितः २२ अथावमत्रिस्पृशो लक्षणं महर्षिणाह। यत्रैकेति। यत्र ति-
थौ। एको वारः तिथिद्वयावसानं स्पृशति तद्वमदिनं॥ यथा। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी तदा दिनक्षयः प्रोक्त इति॥ राम
यः पुनस्तिथिरहोरात्रादिना नात्र यस्य स्पर्शो भवति स त्रिद्युस्पृक्॥ वर्द्धमाना तिथिः षष्टीघटिका भूत्वा वृतो ऽह्नि कियत् ॥ ९ ॥ ९ ९

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऽमात्रावर्द्धने सा त्रिद्युस्पृक्।एवमन्यत्रापि।सदृदं च द्वयं नेष्टं।यावद्दवमत्रिस्पृशो भोगस्तावन्नशुभकर्म कुर्यात् २२ एवं शुभाशुभफलान्य
भिधाय संप्रति तिथिर्निर्णीयते।अवार्ध्यंति।यां तिथिं प्राप्य रविरस्तं याति सा सर्वधर्मकार्येषु पूर्णेव ज्ञेया दिनशेषत्रिमुहूर्तप्रमाणा।तथा
च व्याघ्रपादः यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः।सा तिथिस्सकला ज्ञेया स्नानदानादिकर्मसु।अप्राप्युपसंगचतुष्टयेन त्रिमुहू
र्तव्यापिनी ज्ञेया।एतच्चामावास्यादि पितृकार्यविषयं।तथा च छंदोगपरिशिष्टे कात्यायनः।यदा चतुर्दशी यामं तुरीयमनुपूरयेत् अमा।
वास्या क्षीयमाणा — तदैव श्राद्धमिष्यते।अष्टमेंशे चतुर्दश्याः क्षीणो भवति चंद्रमा।अमावास्याष्टमेंशे च पुनः किल भवेदणुः।वर्द्धमानाप्यमा
वास्या न क्षत्रे च परेऽहनि।यामं स्त्रीन् अधिका न्वापि पितृयज्ञस्ततो भवेदिति।व्यासः।दृष्टचंद्रा सिनीवाली कार्या विप्रैस्तु साग्निकैः।।नष्टचंद्रा कु

अवाप्य यामस्तमुपैति सूर्यस्तिथिं मुहूर्तत्रयवाहिनीं च धर्मस्य कृत्येषु खिलेषु पूर्णां वदंति तां कालविदः पुराणाः ४

हूः कार्या शूद्रैर्विप्रैर्निरग्निकैः।तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूर्मता।साम्येपि च कुहूर्ज्ञेया वेदवेदांगवेदिभिरिति बौधायनः।त्रिमुहू
र्तेनु कर्तव्या पूर्वा दर्शा च वृद्धचेः कुहूरह्यग्निभिः कार्या यथेष्टं सामगादिभिरिति।घटिकैकाप्यमावास्या प्रतिपत्सु न चेत्तदा।भूतवि
द्धापि कर्तव्या स्वेव पित्र्ये च कर्मणि इति।जाबालिरपि।प्रतिपत्स्वप्यमावास्या पूर्वाह्णव्यापिनी यदि।भूतविद्धैव सा कार्या पित्र्ये कर्म
णि सर्वदा।स्कंदपुराणे रुद्र उवाच।दर्शश्च पौर्णमासी च साग्निकः पूर्वसंयुता।कर्तव्या नाग्निहीनैस्तु मनुराह प्रजापतिः।पौर्णमासी द्वये प्रा
प्ता का कार्या निरग्निकैः।वैशाखी तु विशेषेण शूद्रादीनां विशिष्यते।गृहस्थधर्मसमुच्चये स्मृत उवाच।दर्शं च पौर्णमासं च पितुस्सांवत्सरं दि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र०मा० पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते। भविष्योत्तरे। पूर्वाह्णे दैवकं श्राद्धमपराह्णे तु पैत्रिकं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकं। देवकार्ये तु
टी० पूर्वाह्णव्यापिनी तिथिर्ग्राह्या। तथा च स्मृतिमंजर्यां देवकार्ये तिथिर्ज्ञेया यस्यामभ्युदितो रविः॥ पितृकार्ये तिथिर्ज्ञेया यस्यामस्तमितो रविः।
१० अमावास्याष्टमी षष्ठी तृतीयैकादशी तथा। त्रयोदशी चतुर्दश्या वेताः कार्याः परान्विताः। मत्स्यपुराणे। तिथेः प्रांते सुराणां तु उपोष्यकं व
यो विदुः॥ पित्र्ये मूलं तिथेः प्रोक्तं धर्मज्ञैः शास्त्रचिंतकैः। नागविद्धा तु या षष्ठी शिवविद्धा तु सप्तमी। भूतविद्धा सिनीवाली न सेता सुव्रतं चरेत्
।सौरधर्मोत्तरे। तृतीयैकादशी षष्ठी अष्टमी च चतुर्दशी। पूर्वविद्धा प्रकुर्वाणो धनापत्यं हरेन्नरः भविष्योत्तरे ब्रह्मोवाच॥ प्रतिपत्तु द्विती
यास्या हीना या प्रतिपद्युता। कार्या द्वितीयया सार्द्धं तृतीया न कदाचन॥ चतुर्थी संयुता कार्या न षष्ठ्या पंचमी तिथिः। षष्ठी च सप्तमी त
त नेष्यन्योन्यसमाश्रिते। नाष्टमी सप्तमी युक्ता सप्तमी नाष्टमीयुता नवम्या सह कार्या स्यादष्टमी न नवमी तथा न कुर्यान्नवमी तात दशम्या तु
कदाचन। संपूर्णा दशमी कार्या द्वादश्या च त्रयोदशी। सदा कार्या त्रयोदश्या न युक्ता तु त्रयोदशी। पौर्णमासी युता सा स्याच्चतुर्द
श्या च पूर्णिमा प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं। एवमेव विधिं वेधाविद्धे प्राग्विधानवित्। योन्यथा कुरुते मोहात्स तूर्णं प
तते बुधः। तिथियुग्मे पुनरुक्तैरेव तिथिर्दैविकी॥ तथा च भविष्य पुराणे ब्रह्मवाक्यं॥ यथा द्वादशभिर्मासैर्मासो वृद्धो मलिम्लुचः वर्द्ध
माना तिथिस्त्वेवं तिथिः प्रोक्ता मलिम्लुचा॥ यथा मलिम्लुचः पूर्वो मासो दैवस्तथोत्तरः त्याज्या तिथिस्तथा पूर्वा वृद्धौ ग्राह्या न तथोत्तरा। अ एम
ष्टजन्माष्टमी। सा श्रेयोर्थिभिः प्रतिवर्षमुपोष्या। पूर्वविद्धा तु वर्जयेत्। यदा श्रावणमासि रोहिणीयुक्ता भवति तदा रोहिण्यष्टमी २। १०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुच्यते। तथा च स्कंदपुराणे। रोहिणीसंयुता या तु अष्टमी च यदा भवेत्। श्रावणे बहुले सा तु सर्वपापप्रणाशिनी। जयंपुण्यस्य कुरुते ज-
यंतीतेन सा मता। श्रावणमास इति। अमावास्यान्तमासाभिप्रायाय द्यर्द्धरात्रे रोहिणीयोगस्तदा चंद्रार्घदानार्थं सप्तमीविद्धाप्युपोष्या
यदि दिनशेषे लघुत्वाद्द्वितीयदिनेप्यस्तमनादूर्द्ध्वं रोहिणीयोगस्तदा पूर्वा परा वा उभे वा विशेषफलकांक्षिभिरुपोष्ये। पूर्वया उपोषणे तु नव-
म्यां पारणं विधेयं। अथ दूर्वाष्टमी। तत्र स्कंदपुराणे देविवाक्यं। शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्टमी। सिंहार्के सा च कर्तव्या न क-
न्यार्के कदाचन। सिंहस्थे सा तु मा सूर्येऽनुदिते मुनिसत्तमे इति। नभस्ये मासि या नारी दूर्वां नैव च पूजयेत्। तत्तोर्थे न भवेत्तस्याः काकव-
ध्या च जायते। अगस्त्य उदिते पूजायां दोषस्तत्रैवोक्तः। अगस्त्य उदिते तात पूजयेदमृतोद्भवान्। वैधव्यं पुत्रशोकं च दशजन्मनिय-
पंच च। तथा। श्रावणे कृष्णपक्षे तु पूजयेदमृतोद्भवाम्। अष्टवर्षकृतं पापं दहत्येकापि चाष्टमी। अधिमासे तु संप्राप्ते नभस्यगस्त्योदये मुनौ।
अर्वाग्दूर्वाप्रकर्तव्या तत्र दोषो न विद्यते। उद्यापनिकां निशि वच्चित्रकमेघपूजा दूर्वाष्टमी फलविरूढकृतागरणेषु। स्त्रीणां व्रतानि निसि-
लानि च वार्षिकानि नैवोदये घटसुते तु कदापि कुर्यात्। इति स्कंदप्रतिगौरीवाक्यं। अथैकादशी। वसिष्ठसंहितायां। वसिष्ठ उवाच॥ स-
ब्रह्महा गोघ्नहा श्व सुरापो गुरुतल्पकः। विभेदयति यो मोहादेकादश्यौ सितासिते। कूर्मपुराणे। एकादशी यदा नष्टा उपोष्या द्वादशी
तदा। एकादशीं ऋषीणां तु द्वादशी चक्रपाणिनेः। एकादशी द्वादशी च एकार्थं कार्यतः पृथक्। नरनारायणो देवो वेकात्मानो यथाविधा
॥ द्वादशं द्वादशी हंति पूर्वविद्धा उपोषिता। तस्मात्सर्वप्रयत्नेन पूर्वविद्धां विवर्जयेत्। दिनक्षयेपि संप्राप्ते द्वादशीं समुपोषयेत्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ए.मा. दशमीशेषसंयुक्तां न कुर्वीत कदाचन। बह्वागमविरोधेनु विप्रेषु विवदन्सु च। उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणं। संपूर्णैकादशी
टी. यत्र प्रभाते पुनरेव सा। उन्मीलिनीति विख्याता महापातकनाशिनी। स्कंदपुराणे रुद्र उवाच। न कार्या तिथिवृद्धौ तु पक्षवृद्धौ तु पार्वति श्रव
११ णेन च संयुक्ता नोपोष्यैकादशी तथा विष्णुधर्मोत्तरे। पर्वाच्युतजया वृद्धा वीरघ्नी दुर्गान्तकक्षये। नंदा पूर्णाम पित्र्यर्क्षा भद्रामेवोपवासयेत्
॥मार्कण्डेयपुराणे॥ प्रद्युम्नसंवादे नवमी दशमी विद्धा दशम्यैकादशी तथा॥ जंभासुरस्य तन्नुएयं असुरं च दिनत्रयं॥ उदये दशमी स्व
ल्पैकादशी सकलं दिनं॥ द्वादशी रात्रिशेषे तु राक्षसानां दिनत्रयं उपोष्या द्वादशी पुण्या विष्णुऋक्षेण संयुता॥ एकादश्युद्भवं पुण्यं
नरः प्राप्नोत्यसंशयं। उदयैकादशी किंचिद्द्वादशी सकलं दिनं॥ त्रयोदशी उषःकाले वै स्मवानां दिनत्रयं संस्पृश्यैकादशीं राजन्द्वा
दशीं यदि न स्पृशेत्॥ श्रवणे ज्योतिषां श्रेष्ठे ब्रह्महत्यां व्यपोहति। एकादश्यां तु विद्धायां संप्राप्ते श्रवणे तथा॥ तत्र क्रतुशतं पु
ण्यं त्रयोदश्यां तु पारणे वाजपेयं यथा यज्ञकर्महीनोपि दीक्षितः। संपूर्णफलमाप्नोति अस्नातोपि जुहोति यः एवमेकादशी
युक्ता द्वादशी समुपोषयेत्। पूर्वोपवासजं पुण्यं सर्वं प्राप्नोत्यसंशयं। तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् तावदन्नं न भोक्तव्यं द्वा
दशीं नैव लंघयेत् कलाद्वयेत्र यं वापि यावदेकस्य संस्रयः। विशेषेण महीपाल श्रवणं वर्द्धते यदि। तिथिक्षयेन भोक्तव्यं द्वादशीं नैव
लंघयेत् कलाद्वयं त्रयं वापि द्वादशीं समतिक्रमन्। द्वादश द्वादशीर्हन्ति त्रयोदश्यां तु पारणे पुराणसमुच्चये। सूत उवाच। अल्पायामथ
विप्रेन्द्र द्वादश्यामरुणोदये स्नानार्चनक्रियाकार्या दानहोमादिसंयुता महाहानिकरी ह्येषा द्वादशी लंघिता नृणां। करोति पुण्यहरणं ११

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेवसरस्वती। नदिवाशुद्धिमाप्नोतितदारात्रौविधीयते। एवंपुराणाभिप्रायेणस्मार्त्ताभिप्रायेणपुनर्विश्वरूपनिबंधेऽष्टादशभेदाउक्ताः।
तथाच। शुद्धात्रेधातथाविद्धाभेदैर्न्यूनसमाधिकैः। प्रत्येकंचपुनस्त्रेधाद्वादश्यूनसमाधिकैः। आद्यासुषट्सुपूर्वैवव्यवस्थानात्तुरहये। गृ
हमेधीयतीनांचनवमेचापरेहनि। आद्यास्तिस्रस्तुपूर्वाःस्युर्व्यवस्थानंतरद्वये। अपरेहनिशेषाःस्युःसुप्रमीचव्यवस्थया। अस्यार्थः ए
कादशीशुद्धादशमीभेदरहितात्रिधास्यात्। षष्टीघटिकाभ्योन्यूनाषष्टीघटीप्रमाणावा। षष्टीघटिकाभ्योधिकावा। सापुनस्त्रिधा।
द्वादश्याःप्रत्येकंन्यूनत्वासमत्वाधिक्यवशेन। एवंनवभेदाः। एवंसवेधायाअपिएकादश्याद्वादशीन्यूनतासमत्वाधिक्यतयानवभेदाभवं
ति। तथाहि। शुद्धाधिकाद्वादश्यधिका द५५९६०।९१द्वा४ शुद्धाधिकाद्वादशीसमा द५५९६०द्वा६० त्र ५७ शुद्धाधिकाद्वादशीन्यूना द५५९६०
९१द्वा५९ शुद्धासमाद्वादश्यधिका द५५९६०द्वा६० द्वा१ शुद्धसमाद्वादशीसमा द५५९६०द्वा६० त्र ५८ शुद्धसमाद्वादशीहीना द५५९६०द्वा
५८ शुद्धहीनाद्वादश्यधिका द५५९५८द्वा६० द्वा१ शुद्धहीनाद्वादशीसमा द५५९५८द्वा६० त्रयो ५८ शुद्धन्यूनाद्वादशीन्यूना द५५९५८द्वा
५७ इतिशुद्धायानवभेदाः अथविद्धायाभेदाः विद्धाधिकाद्वादश्यधिका द५१९६० ९१द्वा२ विद्धाधिकाद्वादशीसमा द५७९६० ९१द्वा६० त्र
५७ विद्धाधिकाद्वादशीन्यूना ५७९६० ९१द्वा५८ विद्धसमाद्वादश्यधिका द५७९६०द्वा६० द्वा१ विद्धसमाद्वादशीसमा द५७९६०द्वा
६० त्र ५६ विद्धसमाद्वादशीन्यूना द५७९६०द्वा५८ विद्धन्यूनाद्वादश्यधिका द५७९५८द्वा६० द्वा१ विद्धन्यूनाद्वादशीसमा द५७९५८
द्वा६० त्र ५८ विद्धन्यूनाद्वादशीन्यूना द५७९५८द्वा५८ इतिविद्धायानवभेदाः तेषांभेदानांमध्यात्प्रथमेषुषट्सुभेदेषुपूर्वैवैकादशीदशा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र·मा· टी· १२

नत्वेनसत्वात्‌।सप्तमाष्टमभेदयोः पूर्वांगृहस्थाःकुर्युः पारणेद्वादश्याः सद्भावान्यरांयतयः कुर्युः।दशैकादशद्वादशीषु सर्वेपूर्वामेवकुर्युः पारणेद्वादश्याविद्यमानत्वात्‌।त्रयोदशचतुर्दशयोर्भेदयोरेकादश्याः पूर्णत्वात्‌।पूर्वांगृहीणामुत्तरांमुनीनांशुद्धद्वादश्याउपवासात्‌।उक्तंच।एकादशीयदाविद्धापरतोद्वादशीभवेत्‌ शुद्धैवद्वादशीराजनुपोष्यामोक्षकांक्षिभिः षोडशेष्वेवमेवव्यवस्था।शेषेषुभेदेषु पारणेद्वादश्याः सद्भावात्सर्वेपरामेवकुर्युः तथाचविज्ञानेश्वरेणोक्तं।संपूर्णैकादशीयानभवतिपरतः सासमावासमावान्यूनावानास्तिवाच्यंव्रजतिहरिदिनंद्वादशीसापिचोर्द्ध्व।सर्वेकुर्युः परस्तादुपवसनमथद्वादशीनोर्द्ध्वमेति प्रव्राडत्रद्वितीयामुपवसतुजनाः पूर्वमन्येतुसर्वे।यद्येषापूर्वविद्धाभवतिचपरतः सासमावासमावासर्वेकुर्युर्द्वितीयामथहरिदिवसः पूर्वविद्धोपियायात्‌।द्वादश्यासात्रियस्पृग्यदिभवतिपरंमोक्षिणः पूर्वमन्येयद्वाविद्धानचोर्द्ध्वंपरमुपरिभवेत्तत्रसर्वेपरस्तात्‌।पूर्वविद्धाथवासानभवतिपरतोद्वादशीवापिचोर्द्ध्वंकुर्यात्तत्रोपरिष्टान्मुनिजननिकरः पूर्वमन्येचसर्वेविद्धंप्रातर्दशम्याहरिदिनमथचद्वादशीरात्रिशेषेसर्वैः पूर्वंतदानीमुपवसतुजनः प्रीतयेकेशवस्य।तथाच।शुद्धामिश्रादशम्याक्वचिदपिचनतोवेधमेकादशीयंप्रत्येकंचत्रिधासौपुनरपिसमतान्यूनताधिक्ययोगात्‌ पक्षाःप्रत्येकभिन्नाःपुनरपिषडमीषांद्वादशन्यूनताद्यैः संबंधादेवमष्टादशखलुमिलिताः कल्पनासंभवंति।भविष्यत्पुराणेउपवासस्यचतुर्विधत्वमुक्तं।सतांबूलमतांबूलंसंभोजनमभोजनंसाहारंचनिराहारंचतुर्विधमुपोषणं।यावत्कृताह्निकोनस्याद्यावन्नार्चयतेहरिंतावद्भ्रातितांबूलसतांबूलंतदुच्यतेपूजयित्वाच्युतंपूर्वंपूर्णांभुक्तिंनभुंक्तियः।भद्राभुक्त्वापुनर्भुंक्तेतत्संभोजनमुच्यते।श्राद्धंकृत्वापितद्‌

राम· १२

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निष्ठासेन तर्पयन्तानि बांधवान्। सार्ववर्णिकमन्नाद्यं संनीय पूत्र ह्य भाजने। समुपाघ्राय पित्र्यान्नं गोभ्यो दत्वा प्रयत्नतः। तथोपवासनियमं तत्सा
हारैः प्रकीर्त्तितं। चतुर्थे स्तु शुद्धोपवासः शिवरात्रिस्तु दर्शमिश्रितैव कार्या शिवरात्रिव्रते भूतां कामविद्धां विवर्ज्जयेदिति तं दिकेश्वरवाक्या
त्। मघान्तदर्शादिनावसानमुपोष्य शैवं पदमश्नुवैति। फाल्गुनी पूर्णिमा तु भविष्योत्तरात् सा पदि प्रहरद्वयानंतरं भवेत्तदा रात्रौ भद्रा
वसाने होलिका दीपयितव्या। भद्रायां दीपिता होली नगरं राष्ट्रं दाहं करोति। यदि च द्वितीय दिने प्रहरत्रयमात्रं पौर्णमास्या ‾ ‾ । तत्र तिप
च्च वृद्धिगामिनी भवति तदा द्वितीया पूर्णिमा कर्त्तव्या। स्वरक्षाबंधनेपि। महानवम्या षष्ठ्योस्तु भद्रायामपि देवीपूजा। यतो भद्रैव भगव
ती। तत्र लोहाभिसारिकं नाम शांतिककर्मीष्वानां भद्रायां न कार्यो भाद्रपद पूर्णिमायां त्वमावास्यावच्छ्राद्धं कर्त्तव्यं यस्यां तु पूर्णिमायां
क्षयस्तस्य भाद्रपद पूर्णिमायां श्राद्धं कार्यं। तथा च पुराणसमुच्चये सूत उवाच॥ पितृपक्षे गयाश्राद्धे सग्रहे कुरुजांगले। दत्त्वा यत्त्वभ
वेमर्त्यैः फलं तच्च क्षयेहनि। पौर्णिमास्यां तु यः कुर्याच्छ्राद्धं पितृपरायणः। ब्रह्मेष्टस्य च यज्ञस्य स सर्वस्य लभते फलं। अमावास्याय यापु॥
ण्या पितृपिंडस्य कर्मणि। पौर्णमासी तथा पुण्या विशेषोस्ति न कश्चन। कलासंपूर्णता देवा सोमस्योक्ता च पूर्णिमा सदा पूर्णफलं॥
सोमं पितरोप्यायंति हि पितृपक्षे नवम्यां तु नवदैवत्यं श्राद्धं कुर्यात् तथा चोक्तं। अन्वष्टकासु नवभिः पिंडैः श्राद्धमुदाहृतं पित्रा
दिमातृमध्यंततस्ततो मातामहान्तिकम् वृद्धि श्राद्धं तु मातृपूर्वकं द्वादशदैवत्यं कुर्यात् तथा च पुराणसमुच्चये मातृश्राद्धं तु पूर्वं॥
स्यात्पितॄणां तदनंतरं॥ ततो मातामहानां च एवं नांदीमुखं भवेत् एकोद्दिष्टश्राद्धानि पितृपक्षे क्षयदश्यामेव कार्याणि ॥२॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्मा· तथा च पुराणसमुच्चये। एकादश्यां प्रकुर्वीत एकोद्दिष्टानि सर्वशः॥ यस्माद्धि देवता विष्णुः पितृपक्षस्य कृत्स्नशः। मातृपितृस्वसृपत्नीपितृ
टी· व्यभ्रातृमातुले। अन्यपत्न्यां सुभार्यासु एकोद्दिष्टं समाचरेत्॥ मघात्रयोदश्यां तु सांकल्पिकमेव श्राद्धं। तथा चोक्तं। मघायां पिंडदाने
१३ तज्ज्येष्ठः पुत्रो विनश्यति। कन्यायां तु त्रयोदश्यां सपादस्सुदयादते चतुर्दश्यां शस्त्रघातानां एवं कार्यं परत्वेकोद्दिष्टविधिना। तथा च स्मृ
तौ॥ चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणे कृते। एकोद्दिष्टविधानेन तत्कुर्याच्छस्त्रघातिनां॥ पित्रादयस्त्रयो यस्य शस्त्रघातात्त्वनुक्र
मात्। स भूते पार्वणं कुर्याद्द्वादशिकानि पृथक्पृथक्। एवं देवकार्ये तिथिरुदयव्यापिनी पितृकार्ये अस्तव्यापिनी ग्राह्या। तस्माद्धर्मे
स कृत्येषु अखिलेषु पूर्णां वदंति तां कालविदः पुराणाः इति पैतृकविषयमेतत्। इति श्रीमहादेवेकृतरत्नमालाविवरणे तिथिप्रक

राजाभिषेकोत्सवयानसेवागोवह्निमंत्रौषधिशस्त्रकर्म। सुवर्णताम्रोर्णिकचर्मकाष्ठसंग्रामपण्यादिरवौ विद
रणं द्वितीयं २ अथ वारप्रकरणं। वारश्च सावनः सपरिवर्तोऽम्बरविभागेण नानि सावनानि स्युः। अथ चंद्रार्कांतरभवत्वं ध्यातं १
वारस्य। तत्रादौ रविवारविकृत्यमाह। राजेति राजाभिषेचनं। उत्सवं। यानं। यात्रा सेवा च विदध्यात्कुर्यात्। उत्सवं मंगलं पौष्टिकादि॥
यानं प्रयाणं सेवा स्वाम्याश्रयणं· वह्निकार्यं धातुघटनादिकं गुल्मदाहादिकं च। मंत्रो मंत्रसाधनं शस्त्राः शस्त्रघटनोत्तेजनादि। तृणादिच्छे
दश्च। गौर्वाणी। विद्याज्ञानं तन्नामानी तिलह्लो कस्लात्। आदिग्रहणात्॥ व्यालपर्वतगोपकाननपशोद्ध्वास्थितरव्यातात्म्रकनकेतौ यौ राम
वधीसन्धि यागोपरापायुधशस्त्रकर्मनृपतेः सेवेभिषेकेस्मणं कुर्याद्दारुणकर्म भानुदिवसे मंत्रप्रयोगोत्सवान्॥ १॥ १॥ १॥ १३

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथसोमवारकृत्यमाह।शंखेति।स्त्रीस्त्रीकार्यं।वृक्षारोपणसेतुधान्येतिलक्षोक्तत्वात् क्षीरविकाराःकुर्चिकादयः।आदिग्रहणात्।मणिमु
स्निग्धपौष्टिकरसायनसेतुबंधमंगल्यदेवकुशलांतिकवेश्मधान्यसेनापतिसौभाग्यसेनापुष्टिपितृकर्मनृपाभधोर्वीदीनाक्रंदनिशाचराणितथा
चभोजनःमुक्तांगंश ‒ रवमणिभूषणरौप्यवारियज्ञेषुभाज्यवनितायययसांतरुणां।सुस्निग्धपौष्टिकरसायनधातुकर्ममंगल्यदेवकुश।
लांतिकवेश्मनांच।धान्येषुपनूपतुरगशृंगिकृष्यादिसेनाधिपतिर्द्विजानां।स्निग्धद्रवद्रव्यनृपाभिषेकोर्वीदानांवराकंदनिशाचराणां।सौ
भाग्यसेवाविधिसिद्धिपुष्टिमाल्यादिकानांपितृकर्मणांच।आरंभसिद्धिर्हिवसेहिमांशोराश्योदये केंद्रगतेथवास्मिन् २ अथमंगलवार

शंखाब्जमुक्तारजतेक्षुभोज्यंस्त्रीवृक्षकृष्यंबुविभूषणाद्यं।गीतक्रतुक्षीरविकारशृंगीपुष्पांवरंशोभनमिंदुवारे२।
भेदानृतस्तेयविषाग्निशस्त्रबंधाभिचाराहवशाठ्यदंभान् सेनानिवेशाकरधातुहेमप्रवालकार्यादिकुजेचकुर्या

कृत्यमाह।भेदेति।भेदस्तुजोपउपायः।सेतुदुर्गादिविदारणंवा।आदिग्रहणात्।कूटतिक्ताटवीक्रूरखररक्तकुसुमद्रुम त्॥३॥
कूटादिसेनाधिपतिदुर्गादुर्गोखेटकूलाभिसुकुमारबाहुरक्षस्तुतिराजाभिषेकदुष्टदोतिकृषिवादादयः।तथाचभोजः।धात्वाकरादिक
नकज्वलनप्रवालशस्त्राभिघातकटुतिक्तविषाटवीनां।क्रूरखररक्तकुसुमद्रुमरक्तचौर्यकूटाहिपाशजनितस्नायुभूमिनांच।दुर्गद्रुमछेदन
भेदकानांमृगव्यकोशाव्यकृषिक्रियाणां।भिषक्सुसपाधूर्तकुमारशाठ्यदंभाऽरिनाशास्त्रपरिग्रहाणां।राजाभिषेकाहवदुष्टदानसे
नाछेदानेकृषिकर्मणांच।वादस्यचस्मात्तनयस्यवारेप्रारम्भसिद्धिंमुनयोवदंति॥ ३॥ ३ ॥ ३ ॥ ३॥ ॥ ३॥ ३॥ ३॥॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ बुधवारकृत्याह। नैपुण्येति। नैपुण्यं निपुणता। पण्यं क्रयविक्रयादि। अध्ययनं पठनं। कला। गीतादिका द्वासप्ततिः। शिल्पं शिल्प विद्या। सेवा राजाश्रयणं। लिपिर्नानादेशीयाः स्वरशिक्षा। लेखनं चित्रकर्म धातुक्रिया। धातुर्वादादि। कांचनं सुवर्णकर्म। युक्तिर्मिलनं। संधिः संधानं। व्यायाम आयासः। वादस्तर्कविद्या पुरुषस्य समूहः एते बुधवारे कार्याः। आदिग्रहणात् नीलमणिमहीसुगंधिवस्त्रविद्या व्रतमंत्रमायादंभद्रुममांगल्यकाव्यध्रुवपुष्टिचौर्यौषधभूषणवीजोप्तिसाधारणराजाभिषेकापुर्हितमैत्रीचरसत्रविवाहादि। तथा च भोजः धातुक्रियाहरितसुगंधिरत्नमहीसुगंधिविज्ञानवस्त्रलघुमध्यमदीर्घविद्याः आयोधनैपुणयकलाव्रतयुक्तिमंत्रमायाकृता।

नैपुण्यपण्याध्ययनं कलाश्च शिल्पादिसेवा लिपिलेखनानि। धातुक्रियाकांचनयुक्तिसंधिव्यायामवादाश्च बुधे विधेयाः ४ धर्मक्रियापौष्टिकयज्ञविद्यामांगल्यहेमांबरवेश्मयात्राः रथाश्वभैषज्यविभूषणादिकार्यं विदध्यात्सुरमं

निगमनायुधवादमूतानमांगल्यध्रुवपरायशरीरपुष्टिकर्मो वु चौर्यौषधभूषणानि वीजोप्तिसाधारणनामकोर्व्वीनां त्रिणाहि प थाभिषेकाहितमायुषश्च मंत्राभरसत्रविवाहशिल्पसेवाविवाहनलसंधिविशेषकर्मा ज्ञस्याह्लपिप्राचपि चंद्रदृष्टिं प्रयाति तत्त्यामुदये च कुर्यात् ५ अथ गुरुवारकृत्यमाह। विद्याशास्त्राभ्यासः। आदिग्रहणात् रूप्यगजवृषछत्रचामरपार्थिवदेवसभाहोमव्रतज्ञानारंभपुरस्थिरदेवपितृविप्रक्रियासन्न्यधनुःशिल्परसाप्रदं। तथा च भोजः। रौप्यस्वर्णतुरंगदंतिवृषभछत्राणि वध्यौषधीभूषचामरयात्रिवामरसदोधर्माश्रयाः पौष्टिकं। यात्रामंगलहोमयज्ञविधयः शास्त्रं मनोज्ञव्रतं ज्ञानारंभपुरस्थिरामरपितृब्रह्मक्रियाः सत्यवाक्। धनाग्निहोमशिल्पानि रुचिराणि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ शुक्रवारकृत्यमाह स्त्रीगीतेति। आदिग्रहणात् हर्षवर्षप इत्यादि। तथा च भोजः नानारत्नविभूषणांबरवधूहर्म्याणि गेयोत्सवारंभाह सविलाससाहवनिताकामोपचारे स्मरः वर्णादुस्फटिकांबुजानि गमनोद्यानहर्षिपाणाभिषेकृ नित्यं मंगलपौष्टिकानि च तथा स्थानं भुजिष्यानेन प्राकारः शरलः शिल्पकर्षणं च भृगोर्दिने। सिद्धिं प्रयांति च तथा दिनोक्तलग्नमवेच ६ अथ शनिवारकृत्यमाह। लोहाश्मसीसेति आसवं मद्यं। स्थिरं च कर्म शनिदिने कुर्यात्। पापं नील्यादिकर्म। नीलीकंटकचर्मसंग्रहमथ सारास्त्रयोगानपी तिलहोमोक्तलान्। क्रूरं वधवेधादि। स्थिराणि विवाहादीनि। आदिग्रहणात्। अजस्थविरविनीतकरभदुर्जनशरभसत्रमद्यान्तिलनौ चर्मकंटकभृतविभ्रहेतुपा

स्त्रीगीतशय्यामणिरत्नगंधवस्त्रोत्सवालंकरणादिकर्म। भूपण्यगोकोशकृषिक्रियाश्च सिध्यंति शुक्रस्य दिने समस्ताः॥
६ लोहाश्मसीसत्रपुशस्त्रदासपापानृतक्रूरविषासवाद्यं। गृहप्रवेशद्विपबंधदीक्षास्थिरं च कर्मार्कसुताह्नि
कुर्यात् ७ रविः स्थिरः शीतकरश्चरश्च महीजउग्रः शशिजश्च मिश्रः लघुः सुरेज्यो भृगुजो मृदुश्च शनिश्च ती
क्ष्णः कथितो मुनीन्द्रैः ८ ॥

शसंकीर्णभाडानि तथा च भास्करव्यवहारे। वासाजस्थविराविनीतकरभाश्चौराः सहैभास्तुरा क्रूराभूस्त्रपुसीसकासवविषाण्यु वीसुता होदितौ नीलीचर्मतिलाश्मकंटकतयोऽगारप्रवेशो ध्रुवं क्रूरं नौभृतनीचकर्मरिपुतो द्वाहे भवधाद्यः। पाशाः संकीर्णभांडानि दीक्षाभिक्षुविहंगमा। हेतवश्चानराः यस्य सौरे सिध्यंति वासरे ७ अथ वाराणां स्थिरादि संज्ञामाह रवीति। फले च। स्थिरं चरोग्रमिश्रलघुमृदुतीक्ष्णा कार्याणि सूर्यादिवारे कुर्यात्। स्थिरश्चरादीनां पर्यायपन्नस्तत्र प्रकरणे वक्ष्यति॥ ८ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रविरिति। सपरिशब्दः प्रत्येकं संबध्यते। रविः शीघ्रमेवमनसः शरीरस्य च तिलतैलाभ्यंगात्तापं करोति। कांतिं दीप्तिं चंद्रः। भौमो मृत्युं। बुधो द्रव्यप्राप्तिं॥ गुरुर्द्रव्यहानिः शुक्रो विपत्तिं॥ अनर्थमित्यर्थः॥ शनिर्निखिलभोगानुभवेनं सर्वसमृद्धिं। द्रव्यांतरयुतेन तैलेन दोषः तथा च भास्करव्यवहारे॥ सार्षपं गंधतैलं तु द्रव्यांतरविमिश्रितं॥ अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन स्मृतिरपि विवाहादौ तथा शौचे तैलं घृतसमन्वितं। अन्यद्रव्ययुतं तैलं नापि न दुष्येद्ग्रहणं विना ९ अथ येषामवश्यकं तैलनिषेधस्तानाह नार्कारवारेति॥ अर्कस्य वारे। आरस्य भौमस्य वारे संक्रमे संक्रांतिकाले। पूर्वापरषोडशघटिकासु। वैधृतिव्यतिपातयोगे च॥ पक्षमध्ये ऽष्टम्यां विशेष्टमद्राभ्यां। षष्ठ्यापसष्ठ्यायेपि। पर्वः

रविस्तापं कांतिं विधुरति शशी भूमितनयो मृतिं लक्ष्मीश्चांद्रिः सुरपतिगुरुर्वित्तहरणं विपत्तिं दैत्यानां गुरुरखिलभोगाननुभवनं नृणां तैलाभ्यंगात्सपदि कुरुते सूर्यतनयः ९ नार्कारवारे न च संक्रमे पि न वैधृतौ न व्यतिपातयोगे न पक्षमध्ये न च विष्टिषष्ठ्योरभ्यंगदृष्टो न च पर्वसूक्तः १० वारप्रवृत्तिं मुनयो वदंति सूर्योदयाद्रावणराजधान्यं ऊर्ध्वं तथाधो ऽप्यपरत्र तस्माच्चराईदेशांतरनाडिकाभिः ११॥ दर्शः पौर्णमासी ग्रहणं च १० अथ वारप्रवृत्तिकालमाह। वारप्रवृत्तिमिति रावणराजधान्यं लंकायां। सूर्योदयकाले वारप्रवृत्तिं मुनयः कथयंति। लंकायामित्युपलक्षणं। लंकायां मेरुं यावत्। याम्योत्तररेखायां सूर्योदयकाले वारप्रवृत्तिः। रेखातः पूर्वस्थितदेशेषु पश्चात्स्थितदेशेषु च कदा वारप्रवृत्तिरित्यत आह ऊर्ध्वमिति। ऊर्ध्वं प्राग्देशे सूर्योदयानंतरं अधोप्यपरत्र देशे रात्रिशेषे रेखातः पूर्वस्थितदेशेषु पश्चात्स्थितदेषु चराईदेशांतरनाडिकाभिर्वारप्रवृत्तिर्भवति॥ ९॥ १०॥ ॥ राम १५

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथात्र ग्रहसिद्धांते। दिनवारादि पश्चादुज्जयिनीदक्षिणोत्तरायाः प्राग्देशांतरघटिकाभिः पश्चात्प्राग्भवतिरव्युदयात्। चरार्द्धदेशांतरा
भ्यां प्रत्यक्षवारप्रवृत्तिस्तथोच्यते त्रिंशन्मेषतुलाह्निकान्यावृषयोः पादोनदंताः पलपंचाशाद्यास्तुरीयस्तु सिंहमिथुने पंचाशयुक्ताः
मृगोक्षद्व्यब्धिप्रांशकाः कृतगणाः कर्के धनुः कुंभयोः पंचोशानितनान्तिसर्ष्य उभयोः पादान्विताष्टाश्विनः प्रतिनं यावन्तापला
नामंतरं तद्यथा। गोसिंहालिघटेषु वासरमितेरष्टाश्वरोनत्रयं॥ कन्यामेषतुलाझषेषु दिनसार्द्धपलानात्रयं। प्रोक्तं वैणिकचा
पकर्कमकरे पंचाशयुक्तं पलं॥ प्रोक्तं कर्कटकात्तदेवमकरात्पदं स्वपेत्सायने। एवमयनांशानि दिनेमारभ्यप्रतिदिनोक्तपलेषु
संस्कृतेषु स्पष्टदिने दिनमानं भवति। दिनार्द्धघटिकाः पंचदशभ्यो देशांतरेक्ते चरान्तरघटिकास्तद्दिने भवन्ति। ततो यद्दिनार्द्धघ
टिकाः पंचदशघटिकाभ्यो ऊना भवन्ति। तदा चरघटिकाभिर्विशेषवारप्रवृत्तिः। चरे धनमित्यर्थः अथ यदि दिनार्द्धघटिकाः पंचदशभ्यो
ऽधिका भवंति तदा चरघटिकाभिर्दिने गते वारप्रवृत्तिः। चरं ऋणमित्यर्थः। स्पष्टार्कोन्करणोक्तविधानेन चरानयनेन ग्रहगणितान्ज्ञा
नाद्बुद्धौ धमिति नोदाहृतं॥ अथ देशांतरघटिकोत्पत्तिः। मेषादिस्थतुलादिस्थे वा रवौ मध्याह्ने द्वादशांगुलशंकुसंजातकोट्या या विषुवच्छा
या शंकुच्छायावर्गयोगमूलं विषुवत्कर्णो भवति। यथा इह शतानंदपुरे विषुवच्छाया २७ विषुवत्कर्णः १३ ततो याम्योत्तरदेश
स्वदेशयोरंतरयोजनानि विषुवत्कर्णगुणानि पित्राससहस्रेण भजेत्। लब्धं देशांतरघटिका भवंति॥ शेषं षष्टिगुणं सहस्रभक्तं पलानि भवं
ति। अथवा योजनाष्टषष्ट्या। ६८ देशांतरयोजनानि भजेत्॥ पलं देशांतरघटिका भवंति॥ ताः स्थूलाः। ततो रेखापूर्वदे ॥ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

शेषुतावनगतनाः।पश्चिमदेशेषुऋणगताः नतोदेशांतरघटिकानां धनगतानां योगे अन्यथांतरे तावतीभिर्घटिकाभिर्दिनगते रात्रिशे
षेवा वारप्रवृत्तिरिति ११ एतदेवाह। चरार्द्धेति एवंसूर्यादिवारे यत्कृतं सिध्यति यच्च न सिद्ध्यति तदाह १२ वारे इति। वक्ष्यमाणगोचरोक्तेन विधिना
योग्यहोऽनुकूलो भवति तस्य वारे यथोक्तं राजाभिषेकादिकं कार्यं सिद्धिं याति। तदेव कार्यं जन्मराशेः प्रतिकूलवर्तिनि ग्रहे न सिद्ध्यति १३ अथ यस्य
वारे यदुक्तं तत्तस्यैव वारे कार्यं अथ च सौम्यग्रहवारे सर्वं कार्यमिति रथोद्धतयाह। सोमेति। चंद्रबुधगुरुशुक्राः वाराः सर्वकर्मसु उक्तेष्वनुक्तेषु

चरार्द्धदेशांतरयोर्वियोगो योगोथ पानीयपलैश्च सम्यक्। सूर्योदयादूर्द्धमृणे धने धो वारप्रवृत्तिं मुनयो वदंति १२॥।
वारे ग्रहस्योपचयावहस्य कार्यं यथोद्दिष्टमुपैति सिद्धिं। भवेत्तदेवापचयावहस्य प्रयत्नतो निर्मितमप्यसाध्यं १३
सोमसौम्यगुरुशुक्रवासराः सर्वकर्मसु भवंति सिद्धिदाः। भानुभौमशनिवासरेषु च प्रोक्तमेव खलु कर्म सिद्ध्यति १४।
शस्तो हि लाक्षारसरंजनेऽर्को मांजिष्ठकौसुंभकरागयोश्च। महीसुते कांचनभूषणेषु पतंगसूनुः खलु लोहकृत्ये
१५ जीर्णांबरे वासनमंबुभिरार्द्रैरिन्दौ भौमे शुचे बुधदिने च भवेद्धनाय। ज्ञानाय मंत्रिणि भृगौ प्रियसंगमाय मंदे बलाय च
च कार्येषु सिद्धिकराः। रविभौमशनिवारेषु प्रोक्तं विहितमेव कार्यं सिध्यति न चान्यत् १४ रविभौमशनिवा नवांबरधारणं स्यात्॥ १६॥
रेषु विशेषकृत्यमाह। शस्तो हीति। हि निश्चयेन राजाभिषेकादि सूर्यादिवारोक्तं सोमसौम्यगुरुशुक्रवारेष्वपि कुर्यात् रागे पुनः सूर्यवार एव। ए
वं कांचनालंकरणो भौमः लोहकृत्ये शनिवारः १५ जीर्णमिति। आर्द्रोऽचस्नानजलार्द्रः भवतोऽन्यथेः भौमवारे शोकार्यं, बुधवारे वित्ताय गुरुवारे ज्ञाना

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ सौरं कारयितुर्यो वारो यावदायुः स्वयं प्रनिवर्द्धयति तानमाह भानुरिति। सौरं कारयितुरायुषः सकाशान्मासं रविर्न्यूनं करोति। शनिः सप्तमासान्। भौमोऽष्टमासान्। बुधः पुनः शुभरमणीयावस्थं यथा भवति तथा पंचमासान्ददाति। चंद्रः सप्तमासान्। गुरुर्दशमासान्। शुक्र एकादशमासानायुर्ददाति। तथा च लल्लः। सौरे हरन्मासमिहायुषोऽर्कः शनैश्चरः पंच कुजस्तथाष्टौ। आचार्यशुक्रेन्दुबुधाः क्रमेण दद्युर्दशैकादशसप्तपंच १७ विद्यारंभेति। गुरुशुक्रबुधवारेषु विद्यारंभोऽभीष्टार्थसिद्धिं निर्विघ्नं विद्यासमाप्तिं करोति। दीर्घायुषं चारविर्मध्यमः नशुभो नाप्यशुभः। चंद्रो जाड्यं करोति। भौमो मृत्युं करोति। छायासूनावपि शनैश्चरेपि पंचत्वमित्यर्थः। एवं वार्थे। एतमाद्याः गर्गवसि

भानुर्मासं स्वपैति तथा सप्तमार्तण्डसूनुर्भौमश्चाष्टौ वितरति शुभं वो धनः पंच मासान् सप्तैवेन्दुर्दश सुरगुरुः शु
क्र एकादशेति प्राहुर्गर्गप्रभृतिमुनयः सौरकार्येषु नूनं १७ विद्यारंभः सुरगुरुसितज्ञेष्वभीष्टार्थदायी कर्तुश्चायु
श्चिरमपि करोत्यंशुमान्मध्यमोऽत्र नीहारांशौ भवति जडता पंचता भूमिपुत्रे छायासूनावपि च मुनयः कीर्तयंत्येवमा
माद्याः १८ मनीषिणोर्द्धप्रहराद्द्वितीयादारभ्य सर्वेष्वपि मंगलेषु। भौमाशनेः सूर्यबुधार्किचंद्रसुरेज्यवारेषु वि

शिष्टप्रभृतयः कथयंतीत्यर्थः १८ अथार्द्धप्रहरानाह। मनीषिणोर्द्धेति। प्रथमघटिकाचतुष्टयमपास्य भौमादेश्चार्द्धप्रहरास्त्याज्या मंगलकार्ये भौमे द्वितीयोर्द्धप्रहरस्त्यादि। अपिशब्दादेतेष्वेव वारेषु यथाक्रमं षट्प्रष्टे कद्विचिचतुर्थाः कालवेलास्त्याज्याः भौमवारे षष्ठोऽर्द्ध
यामः कालवेलाख्यः। शुक्रे सप्तमः। सूर्येऽष्टमः। बुधशनिचंद्र ॥ २ ॥ ९ ॥ ६ ॥ ४ ॥ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुरुषुप्रथमद्वितीयचतुर्थान्अर्द्धयामास्त्याज्याः१९ अथकुलिकानुपजात्याह। मन्वेति। सूर्यवाराद्यानांसंख्यैश्चतुर्दशद्वादशाष्टषड्चतुर्द्वि
संख्यैर्मुहूर्तैःकुलिकाःस्युः सूर्यवारेचतुर्दशोमुहूर्तोविवाहादौवर्ज्यः। रात्रौत्रयोदशमुहूर्तोवर्ज्यः। एवंसोमवारेद्वादशोमुहूर्तोदिने रा॰
त्रौएकादशोमुहूर्तः। भौमवारेदशमोदिनेनिशिनवमः बुधवारेऽष्टमोरात्रौसप्तमः। गुरुवारेषष्ठोदिवारात्रौपंचमः शुक्रेचतुर्थोदि
वानिशितृतीयः शनिवारेद्वितीयोदिवारात्रौप्रथमोवार्ज्यः। मुहूर्तप्रमाणंतुदिनमानस्यरात्रिमानस्यपंचदशोभागः२० अथकाल॰
होरानयनमुपजात्याह। वारप्रवृत्तेरिति। सूर्यप्रतिपादितवारप्रवृत्तिकालमारभ्यघटिकाद्विगुणाःपंचभिर्भजेत्। लब्धांकसमा

मन्वर्कदिग्वस्तुतिवेदपक्षैरर्कान्मुहूर्ताःकुलिकाभवंति दिवानिरेकैरथयामिनीषुतेगर्हिताःकर्मसुशोभनेषु२०
वारप्रवृत्तेर्घटिकाद्विनिघ्नःकालस्यहोरापतयःशराप्ताः दिनाधिपाद्यारविशुक्रसौम्यशशांकसौरेज्यकुजाःक्रमेण

गतकालहोरा। शेषावर्त्तमानदिनवारादारभ्यरवेःशुक्रादिगणनयायोज्याः। अहोरात्रेचतुर्विंशतिकालहोराभवंति। षष्टिघटिकापरिमिते
चाहोरात्रेसार्द्धनाडीद्वयप्रमाणैकाकालहोराभवति। रविशुक्रादयश्चकक्षाक्रमेणाऽधोधःस्थिताः तथाचसूर्यसिद्धांते। भगण
स्याधःशनिगुरुभूमिजरविशुक्रसौम्यचंद्रास्स्युः। यद्येवंतर्हिकथंदिनाधिपाद्याःकक्षाक्रमेणशन्याद्यावारक्रमेणरविचंद्राद्यायुज्यंते। स
त्यं दिनाधिपत्यमपिग्रहाणांकालहोरावशेनैव। चतुर्विंशतेर्हिसप्तभक्तायास्त्रिकोऽवशिष्यतेऽतःकक्षाक्रमेणचतुर्थोवारोभवति। शनेरनं
तरंरविः। रवेश्चंद्रः चंद्राद्भौमः यश्चवारःसःपंचविंशतितमयाःकालहोरायाःआपतितःअतोदिनाधिपाद्यादिति। रवेश्चग्रहराजत्वात्प्रथममुपा॰

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२४ घटिकाश्चद्विगुणाः पंचभक्ताः सार्द्धनाडीद्वयमितं तावद्भवतीत्युपपन्नं २१ अथकालहोराप्रयोजनमनुष्टुभाह। यस्येति। सर्वं केवलं
प्रागुक्तं न अपितु वक्ष्यमाणमभिचाराद्यं दिनकालहोरायां महाफलमिति २२ अथसूर्यादीनामधिदेवताः प्रतिदेवताश्चाह॥ सूर्येति॥
सूर्यस्य रुद्रोधिपतिः एवं चंद्रादीनामपि यथासंख्यमधिपतयः। कोब्रह्मा। कालोयमः। हरिर्विष्णुः विरंचोब्रह्मा प्रयोजनं च। शांतिकपौ-
ष्टिकादौ नष्टजातवलवद्ग्रहवशात्तद्देवदर्शादिज्ञानमिति २३ इतिश्रीमहादेवविरचितेरत्नमालाविवरणेवारप्रकरणंतृतीयम् ३

यस्यग्रहस्यवारेयत्किंचित्कर्मप्रकीर्तितं। तत्तस्यकालहोरायांसर्वमेवविधीयते २२ सूर्यादितः शिवशिवा
गुहविष्णुकेन्द्रकालाः क्रमेणपतयः कथिताग्रहाणां। वह्न्यंबुभूमिहरिशक्रशचीविरिंचिस्तेषांपुनर्मुनिवरैः प्र
तिदेवताश्च २३ इतिश्रीज्योतिर्विद्रत्नमालायांवारप्रकरणं ३ क्रमशोभवंतियोगाविष्कुंभः प्रीतिरुपरिश्चायु
ष्मान् सौभाग्यशोभनाख्यावतिगंडोथसुकर्माच १ धृतिशूलगंडवृद्धिध्रुवनामानोभवन्त्यथान्ये च। व्याघातहर्ष
णाख्यावथवज्रंसिद्धिव्यतीपातः २ तदनुवरीयान्परिघः शिवसिद्धिसाध्यशुभशुक्लाः ब्रह्मेंद्रौवैधृतिरिति॥
नामसमानफलं कुर्युः ३॥ अथयोगप्रकरणमारभ्यते। तत्ररविचंद्रयोगयोगेन योगप्रकरणं चेत्तत्रायोगाः पूर्वाचार्यैः सप्तविंश-
तिः कल्पिताः। तेषांनामानिफलंचार्यात्रयेणाह। यस्ययोगस्ययादृशंनामतस्यतादृक्नाममेवफलं। यथाविष्कुंभः कार्यसिद्धिं विलंबय
तीति विष्कुंभः। प्रीतियोगश्चकार्यकर्तुः प्रीतिं करोति। एवमन्येपियोगानिजनामतुल्यंफलं कुर्वंति॥ १॥ ॥ २ ॥ ३ ॥ ३ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ विरुद्धयोगाख्यावर्ज्यास्तानुपजात्याह। विरुद्धेति। विरुद्धसंज्ञा दुष्टनामानो विष्कुंभगंडातिगंडशूलव्याघातवज्राख्यास्तेषां प्रथमपादः शुभकार्येषु त्याज्यः व्यतीपातवैधृत्यौ तु सकले मंगलादिषु त्याज्यौ। परिघस्य पूर्वार्द्धं त्याज्यमेव ४ अथ विरुद्धेत्यादिनामनोत्तरमभिधायेदानीं स्वमतं स्फुटतरमाह। तिस्र इति। विष्कुंभवज्रे च प्रथमास्तिस्रो घटिकाः शुभकार्येषु त्याज्याः। व्याघाते नव शूले पंच गंडे तिगंडे च षडेव। एवकारः प्रत्येकं संबध्यते। एवशब्देन पूर्वोक्ते शैथिल्यं सूचयति ५ अथैकार्गलमाह। पूर्वापरां दीर्घामेकां रेखां कृ

विरुद्धसंज्ञा इह ये च योगास्तेषामनिष्टः खलु पाद आद्यः। सवैधृतिस्तु व्यतिपातनामा सर्वोप्यनिष्टः परिघस्य चार्द्धम् ४ तिस्रस्तु योगे प्रथमे सवज्रे व्याघातसंज्ञे नव पंच शूले गंडातिगंडे च षडेव नाड्यः शुभेषु कार्येषु विवर्जनीयाः ५ व्याघातशूलपरिघव्यतीपातपूर्वगंडातिगंडकुलिशेषु सवैधृतीषु। आदित्यचंद्रपितृसर्पभदस्रमूलमैत्राख्यतिष्यसुरवह्निकभानि मूर्द्ध्नि ६॥

॥ ला। याम्योत्तरास्त्रयोदश रेखाः प्राग्दक्षिणायेन विन्यसेत्। व्याघातयोगे पुनर्वसु मूर्द्ध्नि विन्यसेत् शूलयोगे मृगशिरः। परिघे मघा। व्यतीपातेऽश्लेषा। विष्कुंभेऽश्विनी। गंडे मूलं। अतिगंडेऽनुराधा। वज्रे पुष्यं। वैधृतौ चित्रां मूर्द्ध्नि विन्यसेत्। शेषनक्षत्राणि साभिजिन्ति भारेखाग्रयं विन्यसेत्। तदेकरेखास्थयोः। रविचंद्रयोर्दृष्टिनिपाते रौद्राः पुरुषउत्पद्यते सवस्तु मंगलध्वंसनाय भवति। अत्र व्याघातादीनां वैषम्यात्कलाऽर्द्धीकृतेऽवसिष्टांकसमं अश्विन्यादिनक्षत्रं मूर्द्ध्नि विन्यासयोग्यं भवति। तयोरष्टाविंशति नक्षत्राणि सप्तविंशति योगाः गंडातिगंडयोस्तु समसंख्यत्वात्तनयोः संख्याऽष्टाविंशतिस्तु तेऽर्द्धीकृतेऽवशिष्टांकसमं नक्षत्रविन्यासयोग्यं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतेनाभिजिद्गणनायां सूर्यस्याद्धिष्णभसंगश्चेन्दुर्भवति तदाऽसावेकार्गलः। यतः पूर्वोक्तयोगेषु नक्षत्रस्य मूर्द्धिस्थितत्वाद्रविचंद्रौ सम
रेखास्थौ भवतः तथा च त्रिविक्रमः। विसिद्धनामयोगेषु साभिजिद्धिष्णसंगः। अर्कोदिदुस्तदा योगोऽभिष्ट एकार्गलाभिधः ६ एवं
रविचंद्रयोरेकरेखास्थयोर्यद्भवति तन्मालिन्याह। दिनकरेति। पूर्वोक्तचक्रे सूर्यचंद्रयोरन्योन्यदर्शनजन्मा भीषणो मनुष्याकृतिः
स त्रैलोक्ये मंगलकार्यविनाशाय पतति। ज्वलनकपिलनेत्रेण। वै निश्चयेन जगंति निर्दहनम्। अस्मिन्योगे दानाद्यनंतमेव भवति॥ अत्र सो

एकामूर्द्धगतां त्रयोदश तथा तिर्यग्गताः स्थापयेद्रेखाश्चक्रमिदं बुधैरभिहितं खार्जूरिकं तत्र तु व्याघातादिषु
मूर्द्ध्नि भं तु कथितं तत्रैकरेखास्थयोः सूर्याचंद्रमसोर्मिथो निगदितो दृक्पात एकार्गलः ७ दिनकरहिमरश्म्यो
र्दृष्टिसंपातजन्मा भवति विकृतमूर्तिः कोपि रौद्रो मनुष्यः पतति भुवनमध्ये मंगलानां विनष्ट्यै ज्वलनकपिलदृ
ष्ट्या निर्दहन्नेव जगंति ८ इति श्रीरत्नमालायां योगप्रकरणं ४॥ ॥ चाहोरात्रव्यापी। अहोरात्रोत्पत्तिभ्रमणपतनका
लोऽनेनैव देवत्तवल्लभशास्त्रे उक्तः। द्वाविंशतिरुत्पत्तौ व्यतीपातस्यैकविंशति भ्रमणे। पतने दशशघटिकाः स्युः पतिते सप्ताहु पाशेषाः
एवं क्रांतिसाम्येपि कालनिर्देशनो ज्ञेयः। तथा च लल्लः। व्यतीपातपर्वदिवसे वैधृतियोगतश्चैव गंडे च। क्षुरकर्म न प्रशस्तं विवर्ज्जयेद्
वनिकामोऽतः। फलं तु लक्ष्मुत्पत्तौ भ्रमणे कोटिरुच्यते। पतने दश काद्य स्तु पतिते तु नदस्य यमितिलक्षेन कालविशेष उक्तः ८ इति श्री
महादेवविरचिते रत्नमालाविवरणे योगप्रकरणं चतुर्थं॥ ४॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मु॰मा॰ अथकरणप्रकरणमारभ्यते तिथ्यर्द्धयोगेन करणप्रमाणं। तत्रादौ सप्तचलकरणान्याह। ववाह्वयमिति ज्ञार्याज्योतिर्विदः एतान्यपियोग
टी॰ गवत्पूर्वाचार्यैः कल्पितानि। ववाह्वं प्रथमसंज्ञं। बालवनाम द्वितीयं। तृतीयं कौलवं। चतुर्थं तैतिलं। पंचमं गरसंज्ञं। षष्ठं वणिक्संज्ञं॥ सप्त
१९ मं विष्टिरिति १ अथ स्थिराणि चत्वार्याह। चतुर्दशीति। कृष्णचतुर्दश्यपरार्द्धे शकुनिसंज्ञं करणं। अमावास्यायाः प्रथमार्द्धे चतुष्पदं द्वि
तीयार्द्धे नागसंज्ञं। प्रतिपत्पूर्वार्द्धे किंस्तुघ्नं। ततः प्रतिपत्परार्द्धाद्ववादीनि सप्तकरणानि कृष्णचतुर्दशी पर्यंत। अत एव चलानि। शकुन्या
दि वर्तीनितु नियतविषयाण्येव २ अथैषां देवताः शालिन्याह इन्द्रेति। इन्द्रः ब्रह्ममित्रार्यम भूमि लक्ष्मी यमाववादीनां यथा संख्यमधिप

ववाह्वयं बालवकौलवाख्यं ततो भवेत्तैतिलनामधेयं। गराभिधानं वणिजं च विष्टिरित्याहुरार्याः करणानि सप्त॥१॥ चतुर्दशी
याश्शशिनिप्रहीणे तस्या विभागे शकुनिर्द्वितीये। दर्शार्द्धयोस्तच्चतुरंहिनागौ किंस्तुघ्नमध्येप्रतिपद्दले च॥२॥ इन्द्रो ब्र
ह्मा मित्रनामार्यमाभूः श्रीकीनाशश्चेति तिथ्यर्द्धनाथाः कलुसाख्यो सर्पवायू तथैव ये चत्वारस्ते स्थिराणां चतुर्णां।
।३। पौष्टिकौस्थिरशुभानि ववाख्ये बालवे द्विजहितान्यपि कर्म॥ ॥तयः। मित्रोऽर्यमा च ह्यादश्शादिन्या नामध्याद्देकतमौ। इति
शब्दः एवं प्रकारे एते एव ततिथि ववादीनां करणानामधिपाः। थेः कलिसुगरुड वृषभसर्प्यवायवश्चतुर्णां स्थिराणां शकुन्यादीनां नाथाः। प्रयोजनं च॥
नेषु देवत्यं कर्म कार्यमिति ३ अथैषां कृत्यानि स्वागतेनेन्द्रवज्राभ्यामाह। पौष्टिकेति। पौष्टिकानि स्थिराणि प्रासादगृहारंभादीनि शुभानि वि राम॰
वाहादीनि ववकरणे कुर्यात्॥ बालवे विप्रादिवर्णत्रयहितानि कर्माणि। कर्म च धर्मक्रियां च। कौलवे प्रमदास्त्रीतत्कार्यं॥ ॥ ॥ ॥ १९

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुहृद्विधाने च। सुहृद्विधानं प्रमदा च कौलवे इति दैवज्ञवल्लभोक्तत्वात्। आकारो ह्रस्वो क्वचिदिति ह्रस्वे कृते प्रमदमित्रेति। यद्वा प्रमदविधा
ने। हर्षकार्ये। संप्रीति मित्रवरुणानि कौलवे इति लल्लोक्तत्वात् मित्रविधानं मैत्री। तैतिले शुभगानं सौभाग्यं। आश्रयकर्म। गजे च। वीजाश्रय
कर्षणानि विज्ञ वीजोप्तिः। आश्रयं गृहकर्म। कर्षणं हलप्रवाहः वाणिज्यपि वणिक्क्रियाकरणेपि। वणिक्क्रिया हट्टादिव्यवहारः विष्टौ
तु विषादिसिद्धिः ४। ५। अथ विष्टिसंज्ञकरणस्य त्रिंशद्घटिकावच्छिन्नस्य मुखाद्यंगभागमाह। नाड्यस्तिति। तु षधारणे। पंचैव घटिका

कौलवे प्रमदमित्रविधानं तैतिले शुभगताश्रयकर्म ४ गजे च वीजाश्रयकर्षणानि वणिज्यपि स्थैर्यवणिक्क्रि
याश्च। न सिद्धिमायाति कृतं च विष्ट्यां विषारिघातादिषु तत्र सिद्धिः ५ नाड्यस्तु पंच वदनं गलकस्तथैका १ वक्षो
दशैकसहिता ११ निपतं च तस्रः ४ नाभौ कटीषड् ६ थ पुच्छलता च तिस्रो ३ विष्टेर्बुधैरभिहितोंगविभाग एषः ६ मु
खे कार्यध्वस्तिर्भवति मरणं चाथ गलके धनज्यानिर्वक्षस्यथ कटितटे बुद्धिविलयः। कलिर्नाभीदेशे विजयम
थ पुच्छे च जगदुः शरीरे भद्रायाः पृथगिति फलं पूर्वमुनयः ७॥

मुखं तदनंतरमेका कंठः। एकादश हृदयं निपतं निश्चिता च
तस्रो घटिका नाभौ। षट् कटिः तिस्र पुच्छलता निश्चितं बुधैरेषोंगविभागोऽभिहितः कथितः ६ मुखेइति। मुखघटिकासु पंचसु कार्यवि
नाशाय। गलके कार्यकर्तुर्मरणं। कः स्वार्थो। हृदये धनज्यानिर्धनहानि। कटितटे कटिप्रदेशे। बुद्धिभ्रंशः पुच्छे विजयः कलिकलहः त
था च लल्लः पृथिव्यां यानि कर्माणि शुभान्यप्यशुभान्यपि। तानि सर्वाणि सिध्यंति विष्टिपुच्छे न संशयः ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र.मा. जलेति। शुक्लप्रतिपत्प्रथमार्द्धं किंस्तुघ्नं। ततो ववादिगणनायां चतुर्थ्यापरार्द्धे विष्टिर्भवति। ततश्चतुर्थ्यां पंचमे यामे पश्चिमायां दिशि मु-
टी. खं भवति। एवमष्टम्यां द्वितीययामे आग्नेय्यां दिशि मुखं। एकादश्यां सप्तमे यामे उत्तरस्यां। पूर्णिमायां चतुर्थयामे नैर्ऋत्यां। कृष्णतृतीया-
२० यामष्टमे यामे ईशान्यां। कृष्णसप्तम्यां तृतीये यामे दक्षिणस्यां। कृष्णदशम्यां षष्ठे यामे वायव्यां। कृष्णचतुर्दश्यां प्रथमे यामे पूर्वस्यां मु-
खं भवतीति संबध्यते। एतायामसंख्यास्थितेर्न्न भद्रायाः। यतो भद्रायाश्चतुर्यामाधिकप्रमाणाभावात्। फलमाह। स्फुटमित्यादि। विष्टिसं-
वत्सकलापि वर्ज्या। मुखं तु वर्ज्यमेव। एवशब्देनायमत्र संबंधः। यत्र यामे मुखं चास्यास्तं प्रयत्नेन वर्जयेदिति लल्लोक्तत्वात्॥ ८॥ अथ प्रकारा-

जलशिखिशशिरक्षःसर्वकीनाशवायुत्रिदशपतिककुप्सु प्रोक्तमास्यं हि विष्टेः। नियतमृषिभिराशासंख्यया या-
मैः क्रमेण स्फुटमिह परिहार्यं मंगलेष्वेतदेव॥ ८॥ मनुवसुमुनितिथियुगदशशिवगुणसंख्यासु तिथिषु पूर्वा-
स्या आयाति विष्टिरेषा पृष्ठे शुभा पुरस्त्वशुभा॥ ९॥ उद्बद्धोद्भटनरपिंडिकातिकृष्णा दंष्ट्राग्रा पृथुहनुगंडदीर्घनासा॥

तरेण मुखमाह॥ मन्वेति। चतुर्दश्यष्टमीसप्तमीपूर्णिमाचतुर्थीदशम्येकादशीतृतीयासु तिथिषु यथासंख्यं पूर्वास्या प्राग्दक्षिणपश्चि-
रायाति। एतासु दिक्षु मुखं भवतीत्यर्थः। शेषं प्राग्वत्॥ ९॥ अथ विष्टेः स्वरूपमाह। उद्बद्धेति। उद्बद्धाः शिथिला उद्भटतरा दृढतरा पिंडि-
कायस्याः सा विस्तीर्णचिबुककपोलालंबनासिकाकार्यविनाशिनी मुखेन प्रभूताग्निज्वालामुद्वमंती समंतादेककालं त्रैलोक्यमध्ये प- एम
तति। तां वर्जयेदिति संबंधः। रत्नकोशे चतुर्थ्यादिषु तिथिषु भद्राणां पृथक्नामान्युक्तानि। तथा चाह। सा नंदिन्यथ त्रिशिराः सुमुखी करालिका चै- २०

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेश्मव्यतिरौद्रमुखीदुर्मुखी विष्टयाक्रमशः। गंधांनरेपि। घुजाठेणीसिनेपक्षे गौच्छित्रूढ सितेनरे। अस्मरे स्त्रियोज्ञेयाः सौरे पौमादि शाक्रमा
त्। अआइईउऊएऐइति स्वरोदयोक्ताः कृष्टाः स्वरा ग्राह्याः १० अथ यथा विष्टिरन्यन्नानदाह॥ दैत्येंद्रेरिति। रासभमुखी पुच्छयुक्तो दैत्यात्र
घानानंतकर्मप्रीनेर्दैवैः करणप्रांते निवेशिनास्थापिता। नरणयत्किंचिद्धि सूयमज्ञानात् ज्ञानाद्धाकरिष्यति तत्सर्वं न वभविष्यतीति ११ अथ
शकुन्यादीनां स्थिरकरणानामाह। मंत्रौषधानीति। मंत्रसिद्ध्यौषधानि। पौष्टिकानि च शकुनौ चतुष्पदे। राज्यसंबंधिकर्म। गोकर्म धेनु

कार्यं ध्रौइह न बहुलसमुद्धिरंगी विश्वान पनति समंततोऽत्र विष्टिः १० दैत्येंद्रः समरे भ्रमेरशु विजितेष्वीशः क्रुधा दृष्ट
वान्स्वकार्यं किल निर्गता खरमुखी लांगूलिनी चत्रिपात्। विष्टिः सप्तभुजा मृगेंद्रवदना क्षामोदरी प्रेतगा दैत्यघ्नी
मुदितैः सुरैस्तु करणप्रांते नियुक्ता सदा ११ मंत्रौषधानि शकुनौ च सपौष्टिकानि गोविप्रराज्यपितृकर्म चतुष्प
दे च। सौभाग्यदारुकमाह नि ध्रुवकर्म नागे किंस्तुघ्नतान्नि शुभपौष्टिकमंगलानि १२ इति श्रीश्रीपतिभट्टविरचिता
यां ज्योतिषरत्नमालायां करणप्रकरणं पंचमं॥ ५॥ श्री —— दस्रयमाग्निधातृशशिनः शार्वोदितिर्वाक्पतिः कद्रू।
ज्यापितरो भगोऽर्यमरविस्त्वष्टा च यामारुतः॥ कर्म धेनुद्विजातिक्रियते इति लह्नो कत्वात्। पितृकर्म श्राद्धं। उग्रो दारुणानि। ह
ति हरणं किंस्तुघ्ने शुभानि। पौष्टिकानि मंगलानि च विदध्यादिति॥ इति श्रीमहादेवविरचिते रत्नमालाविवरणे करणप्रकरणं पंचमं ५ एवं
चंद्रागणान्तरयोगभवानां तिथिवारयोगकरणानां शुभाशुभफलान्यभिधाय केवलं चेह भवनस्य नक्षत्रस्य प्रकरणमारभ्यते। तत्र नक्षत्राणां

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भेशा इति। दस्रौ अश्विनौ अश्विन्या अधिपती। यमो भरण्याः। अग्निः कृत्तिकायाः। ब्रह्मा रोहिण्याः। शशी मृगशीर्षः। शर्वो रुद्र आर्द्रयाः अदि
तिर्देवमाता पुनर्वसोः। बृहस्पतिः पुष्यस्य। सर्पा अश्लेषायाः। पितरो मघायाः। भगः सूर्यप्रभेदः उत्तरफाल्गुन्याः रविः सूर्यो हस्तस्य। त्वष्टा
विश्वकर्मा चित्रायाः। वायुः स्वातेः। इंद्राग्नी विशाखायाः। मित्रः सूर्यप्रभेदोऽनुराधायाः। इंद्रो ज्येष्ठायाः। निर्ऋतिः राक्षसमाता मूलस्य। तो
यं पूर्वाषाढायाः। विश्वे विश्वेदेवा उत्तराषाढायाः। विधिर्ब्रह्मा अभिजितः। विष्णुः श्रवणस्य। वसवो धनिष्ठायाः। अंबुपो वरुणः शतभिषजः। अज
चरणो रुद्राणामन्यतमः पूर्वाभाद्रपदायाः अहिर्बुध्न्यो पि रुद्रभेद उत्तराभाद्रपदायाः पूषा रविभेदो रेवत्याः। प्रयोजनं चैषां तेषु तेषु नक्षत्रेषु तद्देवत्यं

शक्राग्नी त्वथ मित्र इंद्र निर्ऋती तोयं च विश्वे विधिर्गोविंदो वसवोंऽबुपाजचरणोऽहिर्बुध्न्यपूषाभिधाः १ अश्वे
भाजफणि द्वयश्ववृषमुड्मेषोतपो मूषिक श्वाखुगौक्रमशस्तनोपि महिषी व्याघ्रः पुनः सैरभी॥ ६ ॥

कर्मांतरे च नाम्ना नक्षत्रव्यवहारश्च १ अथाश्विन्यादीनामुत्पत्तिं शार्दूलेनाह। अश्वेति। योनिरुत्पत्तिः। अश्वोऽश्विन्याः इभो गजो भरण्याः
। अजा मेषः कृत्तिकायाः। सर्पो रोहिणी मृगशिरोः। श्वा आर्द्रायाः। मेषः पुनर्वसोः। विडालः पुष्यस्य। मूषिक मूषकः इति प्रसिद्धः। आ
श्लेषायाः। श्वा मघायाः आखुर्मूषकः पूर्वाफाल्गुन्याः। गौ वृषभः उत्तराफाल्गुन्याः। महिषी हस्तस्य। व्याघ्रश्चित्रायाः। सैरभी महिषः स्वातेः
व्याघ्रो विशाखायाः। एणौ मृगौ अनुराधाज्येष्ठयोः। मृगमंडलः श्वा मूलस्य। वानरः पूर्वाषाढायाः। बभ्रूनकुलौ उत्तराषाढाभिजितोः। वानरः
श्रवणस्य सिंहो धनिष्ठायाः॥ अश्वः शतभिषजः॥ मृगराट् सिंहः पूर्वभाद्रपदायाः॥ पशुरुत्तरभाद्रपदायाः॥ ६॥ ६॥॥ ६॥ ७॥ ६॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

करटी हस्तिरेवत्याः। एताश्च योनय आगमसिद्धा एव। अत्र प्रमाणं दंपत्यादियोगार्थं पूर्वाचार्यैः कल्पिता न पारमार्थिका उत्पत्तयः। यतो न स्वसिद्धा
न्ते उक्तं। ध्रुवताराप्रतिबद्धं ज्योतिश्चक्रं प्रतीस्थगणकाद्यैः। पौष्णाश्विन्यन्तरस्थं सग्रहैर्भ्रं स्तणामृष्ट २ एतेषां प्रयोजनमाह। गोव्याघ्रमिति य
दा वधूवरयोः प्रभुसेवकयोश्च एकस्य गोयोनि नक्षत्रं अन्यस्य व्याघ्रयोनि नक्षत्रं तदा वर्ज्यं त्याज्यमिति। एवमन्यत्रापि। शाश्वतिकवैरिणामपि यो

व्याघ्रैणौ मृगमंडलैः कपिरथौ बभ्रूहयौ वानरः सिंहोऽश्वो मृगराट् पशुश्च करटी योनिस्त्वभानामियं २ गोव्याघ्रं ग
जसिंहमश्वमहिषं श्वैणं च बभ्रूरगं वैरं वानरमेषकं। च सुमहत्तद्वद्बिडालोन्दुरं। लोकानां व्यवहारतोऽन्य
दपि च त्याज्यं प्रयत्नादिदं दंपत्योर्नृपभृत्ययोरपि सदा वर्ज्यं शुभस्यार्थिभिः ३ मूलाग्नेयमघाहिदैवभरणीसार्पाणि
पूर्वात्रयं ज्योतिर्विद्भिरधोमुखं त्विह नवकं भानामिदं कीर्तितं वापीकूपतडागगर्तपरिखाखातानिधेरुद्धृतिः सेपा
द्युतविलप्रवेशगणितारंभादि तत्रेष्यते ४ ज्येष्ठादित्यकराश्विनीमृगशिरः पौष्णानुराधानिलत्वाष्ट्राख्यानि वदं
ति भानि मुनयस्तिर्यङ्मुखान्येषु तु। अश्वेभोष्ट्रहुलायरासभवृषोरभ्रादिदंतिश्वनौगत्रीयंत्रहलप्रवाहगमनारं।
भाः प्रसिद्धानि च ५।

व्याघ्रमित्यादौ नपुंसकत्वमेकत्वं च ३ मूलेति। आग्नेयं कृत्तिका। अहिदैवं विशाखा। सार्पमश्लेषा। पूर्वात्रयं। गर्तः। एवभ्रं।
परिघा दीर्घिका। खातो वाप्यादीनां खननं ४ ज्येष्ठेति। आदित्यं पुनर्वसुः। करो हस्तः। पौष्णं रेवती। अनिलः स्वाती। त्वष्टा चित्रा। उरभ्रो मेषः। आदिश

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्येति।ब्राह्मो रोहिणी।श्रविष्ठा धनिष्ठा।धर्मवारणं छत्रं प्राकारो दुर्गः ध्वजादीनामुच्छ्रायारंभः।आराम उद्यानं।तस्य विधानं।पट्टाप
ट्टबंधः।अभिषेकोऽभिषेचनं।आदिग्रहणादन्यदपि ऊर्द्धमुखकर्म ६ अथ रथोद्धता छंदः।रोहिणीति सुगमं ७ त्वाष्ट्रेति त्वष्टृदैवतं
चित्रा मित्रोऽनुराधा।शशि मृगशिराः।पूषा रेवती।दैवतमिति प्रत्येकं संबंधः।रतिः सुरतं उद्वाहो गानं।मंगलमुत्सवादि ८ अश्विनीति गुरु

पुष्यार्द्राश्रवणोत्तराश्च नभिषग्ब्राह्मश्रविष्ठाह्वयान्यूर्द्धास्यानि नवोदितानि मुनिभिर्धिष्ण्यान्यथैतेषु तु।प्रा
सादध्वजधर्मवारणगृहप्राकारसत्तोरणोच्छ्रायारामविधिर्हितो नरपतेः पट्टाभिषेकादि च ६ रोहिणीसहित
मुत्तरात्रयं कोनेयंति मुनयो ध्रुवाह्वयं।बीजहर्म्यनगराभिषेचनारामशांतिषु हितं स्थिरेषु तु ७ त्वाष्ट्रमित्रश
शिपूषदैवतान्याममनंति मुनयो मृदून्यथो मित्रकार्यरतिभूषणांबरोद्वाहगीतमंगलविधानमेषु तु ८ अश्विनी
गुरुभमर्कदैवतं साभिजिल्लघु चतुष्टयं मतं पण्यभूषणकलारतौषधज्ञानशिल्पगमनेषु सिद्धिदं ९ मूल
शक्रशिवसर्पदैवतान्युग्रपन्यथ च तीक्ष्णसंज्ञया भूतयक्षविधिमंत्रसाधने भेदबंधवधकर्म चात्र तु १०॥

भं पुष्यः।अर्कदैवतं हस्तः।पण्यं क्रयविक्रयं।कला गीतादिका हास्यप्रतिः।रतं संभोगः।औषधं प्रसिद्धं।ज्ञानं ज्ञानाभ्यासः।शिल्पं विज्ञानं।
।गमनं यात्रा ९ मूलेति।शक्रदैवतं ज्येष्ठा।शिवदैवतमार्द्रा।सर्पदैवतमश्लेषा।उग्रपतिकथयंति।भूतो वेतालः।यक्षो गुह्यकः।यत्नो विधिरत्रा २२

॥२॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भेदो विदारणं लोपामः। बंधवधयोः कर्म १० वैष्णवेति। श्रवणादित्रययुतं। दंतिहस्ती। वाजी अश्वः। करभो हस्तिशावकः। उक्षा बलीवर्दः॥ एते-
षां वाहने गमनं वाटिकायात्रयोर्विधिस्तत्र ११ पूर्विकात्रितयेति। अंतक· अंतकदैवतं भरणी। शाठ्यं धूर्त्तता। उत्सादनमुच्चाटनं १२ हव्य-
वाहभेति हव्यवाहभं कृत्तिका। द्विदैवतं विशाखा। मिश्रं साधारणं। न स्थिरं न चरं न तीक्ष्णं न मृदु सकलानि सर्वाणि च ध्रुवादीनि-

वैष्णवत्रययुतं पुनर्वसुमारुतं च चरपंचकं विदुः। दंतिवाजिकरभोक्षवाहनारामयानविधिषु प्रशस्यते ११
पूर्विकात्रितयमंतकं मघेत्युग्रपंचकमिदं जगुर्बुधाः। शाठ्यनाशविषघातबंधनोत्सादशस्त्रदहनादिषु स्मृतं
१२ हव्यवाहभयुतं द्विदैवतं मिश्रसंज्ञमथ मिश्रकर्मसु स्वाभिधानसमकर्मसाधने कीर्तितानि सकलानि सू-
रिभिः १३ वरेबलं क्रूरमुशंति वोग्रं ध्रुवं स्थिरं दारुणमं च तीक्ष्णं। क्षिप्रं लघूक्तं मृदु मैत्रसंज्ञं साधारणं मिश्रमि-
ति ब्रुवंति १४ हस्तस्वातिश्रुतिमृगशिरःपुष्यमैत्राश्विभानि पौष्णादित्ये जगुरिह बुधा देवसंज्ञानि भानि॥ छ॥

स्वनामसदृशकर्मकरणे। कीर्तितानि कथितानि १३ चरेति। सुगमं १४ हस्तेति। श्रुतिः श्रवणः। मैत्रोऽनुराधा। अश्विभं अश्विनी। पौष्णादि-
त्ये रेवती। पुनर्वसुः। शिवभं आर्द्रा। निरृतिपितृभे मूलमघे। वासवं धनिष्ठा। वासवर्क्षं ज्येष्ठा। शक्राग्न्योर्भं विशाखा। वरुणदहनर्क्षं श-
तभिक्कृत्तिके॥ तत्र दंपत्यो स्वगणे उत्तमा प्रीतिरित्याहुः देवमनुष्यगणयोर्मध्यमा। राक्षसानां देवमनुष्यगणैः सह महद्वैरं॥ छ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न तस्माद्देवमनुष्यगणयोर्न रक्षोगणेन संबंधः। देवराक्षसगणयोः कदाचित्संबंधः। देवमनुष्ययोश्च। न मनुष्यरक्षसोः। रक्षसां हि मनुष्या भ-
क्ष्याः। अथ दंपत्योः पुत्रार्थं कृतसंयोगयोः शुक्राधिके पुत्रोत्पत्तिः। तथा च वराहमिहिरः। रक्तेऽधिके स्त्री पुरुषस्तु शुक्रे नपुंसकं शोणितशु-
क्रसाम्ये। शुक्राधिक्यं पुरुषस्य मनसः प्रीतिकरेण वस्तुना भवति। तथा च वाग्भटः। यत्किंचिन्मधुरं स्निग्धं बृंहणं बलवर्द्धनं। मनसो हर्ष-
णं यच्च तत्सर्वं वृष्यमुच्यते। वृषाय शुक्राय हितं वृष्यं शुक्रजनकमित्यर्थः १५ १६ द्विजवर्जं सर्वेषां मद्ये नैव कामोत्पत्तिः कामाधिक्ये च

पूर्वोत्तिस्रः शिवभरणीरोहिणीस्तु नराख्याः प्राहुर्मैत्र्यो द्वयमुडुगणं नूनमेतन्मुनींद्राः १५ चित्राश्लेषे निर्ऋतिपित-
मे वासवं वासवर्क्षं शक्राग्न्योर्भे वरुणदहनर्क्षे च रक्षोगणोऽयं। श्रेष्ठा प्रीतिः स्वकुलगणयोर्मध्यमा देवपुंसां मर्त्यैर्दै-
वैरपि सुखमहद्रक्षसां वैरमाहुः १६ रौद्रे पित्र्ये वारुणे पौरुहूते याम्ये सार्प्ये नैर्ऋते चैव धिष्ण्ये पूर्वास्त्वेषु त्रिष्व-
पि श्रेष्ठ उक्तो मद्यारंभः कालविद्भिः पुराणैः १७ रोहिणीषु करपंचकेऽश्विभेष्वुत्तरेऽपि च पुनर्वसुद्वये॥ १८॥

शुक्राधिक्यमतो मद्यारंभनक्षत्रमाह। रौद्रेति। रौद्रे आर्द्रायां पित्र्ये मघायां वारुणे शततभिषजि। पौरुहूते ज्येष्ठायां। याम्ये भरण्यां सार्प्ये
आश्लेषायां। नैर्ऋते मूले। पुराणैराद्यैः। कालविद्भिर्दैवज्ञैः। न हि मद्ये काचिच्चमत्कारिणी युक्तिरस्ति किंतु मद्यस्य कुमुहूर्ते निष्पन्नस-
र्वाधिकरत्वं निःस्वादुत्वं च भवतीति सुदिवसान्वेषणं १७ अथान्येष्वम्बादिकारणेषु सत्स्वपि नमलिनजीर्णवाससाधिव्याप्तंमुदंप्रया-
त्यतो नव्यं वस्त्रं परिवेषं तच्च कुदिवसे परिहितं दौर्भाग्यादिकरं भवतीत्यत आह॥ रोहिणीति॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करपंचके हस्तादि पंचके। अश्विभेऽश्विन्यां। वसुदैवते धनिष्ठायां १८ अथ कौसुंभादिवस्त्राभरणं चांतरेण सौभाग्यं न भवतीति तदर्थमाह। करादी
न्सुगमं। देवतुवस्त्र भेतु। नासत्यपौष्णवसुभैः करपंचकेन मार्तंडभौमगुरुदानवमंत्रिवारैः। मुक्तासुवर्णमणिविद्रुमशंखदंतरक्तांवरा
णि विधृतानि भवंति सिद्ध्यै। ॥ प्राजापत्ये भेतिसृषूत्तरासु पुनर्वसौ श्वहि तत्र येन दध्यात्। प्रवालरक्तांवरहेमशंखान्भर्तुर्यदीच्छत्यवलायुरिष्टं। तथा
च रोहिणीगुरुपुनर्वसूत्तरे याविभर्ति नववस्त्रभूषणं। सा नयोषिदवलं वनेपतिस्त्रानमाचरतिवारुणेनया १९ एवं मद्यवस्त्रालंकरणा॥

रेवतीषु वसुदैवते च भे नूत्नवस्त्रपरिधानमिष्यते १८ करादिपंचके श्विभे सपौष्णवासवे स्मृताः घृतिश्च शंख
कांचनं प्रवालरक्तवाससा १९ श्रावणः सकरः पुनर्वसुनिष्कृते भे च सपुष्यको मृगः। रविभूसुत जीववासराः क॥
थिता पुंसवनादिकर्मसु २० पौष्णवैष्णवकराश्विनीचित्रापुष्यवासवपुनर्वसुमैत्रैः सेंदवैः श्रवणवेधविधान

दिभिर्जातान्सोन्यप्रीत्यादि पत्योर्गर्भसंभवे पुंसवनादि पुंनामनक्षत्रेषु ग्रहेषु च वैतालीयेनाह॥ निर्दिशंति मुनयो हि शिशूनां २१॥
श्रवण इति। करो हस्तः। निष्कृतेभे मूलो— अत्र पुनक्षत्राणि पुंग्रहश्च गर्भस्य पुंस्त्वहेतवे भवंति रविभौमजीवाश्च पुंग्रहाः। तथा च लघुजातके क्ली
बपतीवुधसौरौ चंद्रसितौ योषितां नृणां शेषाः। काकवंध्याभवतीति श्रुतकल्पप्रजापुंसवने विधौतु। सौरेणमृत्युः पयसोल्पतेन्द्रौ भौमार्क
जीवैर्बहुपुत्रलाभ इतिलघ्नोक्तत्वात्तत्र स्त्रियास्त्रपि पुंनक्षत्रेषु कृतसंस्कारणपत्यस्य रक्तत्वात्पुत्रत्वं भवतीति २० अथ पुंसवनानंतरं जातक
र्म नामकरणे भवतः। तयोश्चावश्यकत्वं। नियतविषपचनतन्नक्षत्रषु भाशुभावलोकनान्पायं। यतो जातकम् एकादशे नामकरणमिति श्रुतेः

प्रसवे जातकर्मणि नामकरणे काले ...
नः कालीन्विद्यात् ... २१ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

पौष्णेति। अथ त्रयोदशनक्षत्रैः शिशूनामन्नप्राशनं नवान्नभक्षणं च श्लोकद्वयेनाह। रेवतीति। रेवत्यादीनां युग्मे प्रत्येकं द्वये। दश सु नक्षत्रेषु उत्तरात्रये च। पृथुकानां बालकानां सितासु एणां। नवान्नेन वर्नदा योनप्रसुप्ते जनार्दने। न कृष्णपक्षे धनुर्मिथुनतुलायां नैव कारयेदिति॥२२॥ अथ द्वादशनक्षत्रैः क्षौरं शालिन्याह। पुष्येति। पौष्णे रेवत्यां रौद्र्ये ध्रुवे मृगशिरसि। शाक्रे ज्येष्ठायां। आदित्ये भे पुनर्वसौ। वैष्णवादित्रये। श्रवणादित्रये। पानं गिशनिः। ननु वाराणां कृत्ये वारप्रकरणेऽभिहितं कथमत्र मुक्त्वा भौमादित्यपातं गिवारानित्युक्तं। सत्यं। उत्सवत्वाद् विवारः॥

रेवती श्रुति पुनर्वसु हस्तत्राष्ट्रानलः पृथगपि द्वितयेपि स्युन्नरेपि गदितं पृथुकानां प्राशनं हि सनवान्नविधानं २२ पुष्ये
पौष्णे सेंध्रवे चाश्विनीषु शक्रे हस्तादित्रिकेभ्येष्ट्यदित्यां। क्षौरं कार्यं वैष्णवादित्रये च मुक्त्वा भौमादित्यपातं गिवारान्।
२३ नस्नात भुक्तोत्कट भूषितानामभ्यंगयात्रासमरोत्सुकानां। क्षौरं विदध्यान्निशि संध्ययोर्वा जिजीविषूणां नवमे
न चाह्नि २४ आज्ञया नरपतेर्द्विजन्मनां दारकर्ममृतसूतकेषु च॥

॥ स्थिरत्वाच्छनिवारः प्राप्तेपि क्षौरेऽन्नाधुषः सपकारित्वात् तत्र निषेधः। एवं भौमेपि॥२३॥ अथ बालानां क्षौरप्रस्तावादन्येषामपि याद्दृशानां क्षौरं न कार्यं तानुपजात्याह। नस्नातेति। स्नातः कृतस्नानः भुक्तः कृतभोजनः उत्कटः निरासनः आसनरहितः द्रव्यार्थैः भूषितोऽलंकृतः अलंकारैः एतेषां। अभ्यक्तः कृततैलाभ्यंगः। नथा च मस्नानानंतरं नित्यस्नानानंतरं च निषेधः एतेषां स्नानादीनां क्षौरं न विदध्यात्। रात्रौ संध्ययोश्च न। पूर्वक्षौरदिनान्नवमदिने च न॥ तथा च लल्लः। नस्नानमात्रगमनोत्सुकभूषितानामभ्यंगयात्रासमरोन्मुखानां क्षौरं विदध्यान्निशि संध्ययोर्वा जिजीविषूणां नवमे न चाह्नि अथ

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दारकर्मेति। विवाहे सौरं देशविशेषेणास्त्वविशेषेवा। तथा चतुर्गः सुंडपितारः स्त्राविष्ठापितो भवन्ति वधूमूढां २५ अथराज्ञां सौरकर्म दिन
माह। श्मश्रुकर्मेति। सौरनक्षत्रे सौरनक्षत्रोदयेवा। वसमाप्तेनारावलंविलोकयरविभौमशनिवारे व्यपि शुभग्रहकालहोरायां कार्यं। एतच्चा
युषो वृद्धिकरं। तथा च दैवज्ञवल्लभे भूभृतां पंचमे पंचमे वाऽसरे श्मश्रुकर्मायुषो जपेत्। हृद्धिभे सौरभे चाथवा सौरभस्य चोदयो न केवलं सौरभ
वकुर्यान्नखोल्लेखने च। तथा च दैवज्ञवल्लभः। येषु भेषु प्रशंसंति क्षुरकर्म महर्षयः शास्तेभेषु तेष्वेव नखदंतादि लेखनमिति २६ अथव्र

तबंधमोक्षसमस्तदोक्षणेष्वपि सौरमिष्टमखिलेषु चोडुषु २५ श्मश्रुकर्मपंचमे पंचमे द्विभूभुजां सौरभ
स्य चोदयेन निंद्यतारकान्न चेत् २६ षट्कृत्तिकापंचमघास्त्रिमैत्रोब्रह्मा ष्टको पश्चतुरुत्तराश्च। सौरीस
वर्षं चतुराननो पि न प्राणतीति प्रकटः प्रवादः २७ सौम्ये पौष्णे वैष्णवे वासवाख्ये हस्तस्वाति त्वाष्ट्रपुष्या
श्विभेषु॥ कृत्स्नैः दिष्टां मेखलां बंधमोक्षौ संस्मर्यैते नूनमाचार्यवर्यैः २८॥ ॥ तिकासु षड्वारान् मघासु पंचवारान् अनुरा
धासु त्रिवारान् रोहिणीष्वष्टौवारान्। उत्तरासु चतुर्वारान्। सौरं कारयितुः फलमिंद्रवज्रयाह। षट्कृत्तिकेति। न प्राणतीति न जीव
तीति प्रकटः प्रवादः प्रकटवचनं २७ अथव्रतबंधसमावर्तननक्षत्राण्याह। सौम्ये इति। नूनं निश्चयेन जन्मकालादष्टमे गर्भाष्टमे
वा ब्राह्मणस्योपनयनमिति स्मृतिवचनादुक्तेषु नक्षत्रेषु मेखलाबंधमोक्षौ व्रतबंधसमावर्तने ज्योतिर्विद्भिः कथ्येते। सौम्ये मृगे।
पौष्णे रेवत्यां वैष्णवे श्रवणे। वासवे धनिष्ठायां॥ त्वाष्ट्रे चित्रायां॥ २८॥ ॥ २८॥ ॥ ॥ ॥ २८ ॥ ॥ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथविवाहनक्षत्राण्याह। मूलेति। मारुतं स्वातिः। उत्तरात्रयं। निर्व्यधाभिः पंचशलाकाचक्रे दुष्टग्रहेण वेधरहिताभिः। वेधं च विवाहप्र
करणे वक्ष्यति। विवाहधिष्ण्ये एव विवाहस्य॥ सूतिकामंगलादिकर्म कार्यं। तथा च भास्करः। विवाहधिष्ण्ये कर्तव्या कन्यादानप्रतिश्रुतिः॥
तुर्यादिमंगलैरेवमंडपादिविधिः स्मृतः। मैत्रपूर्वोत्तमस्वातिकृत्तिकाश्रुतिवासवैः। सवैश्वदेवैर्वरणं कुमारीणां प्रशस्यत इति २९ अथा
ग्न्याधाननक्षत्राण्याह। प्राजापत्ये इति। प्राजापत्यं रोहिण्यां पूषभे रेवत्यां सहिदैवे विशाखासहिते ऐंद्रे मृगे शालिनो हृते ३० अथवि

मूलमैत्रमृगरोहिणीकरैः पौष्णमारुतमघोत्तरान्वितैः निर्व्यधाभिरुडुभिर्मृगीदृशां पाणिपीडनविधिर्विधी
यते २९ प्राजापत्ये पूषभे सद्विदैवे पुष्ये ज्येष्ठासैंद्रवे कृत्तिकासु। अग्न्याधानं ह्युत्तराणां त्रयेपि श्रेष्ठं
प्रोक्तं प्राज्ञैर्नेविप्रमुख्यैः ३० मृगादिपंचस्वपि भेषु मूलहस्तादिके च त्रितये श्विनीषु। पूर्वात्रये च श्रवणे च तत्
ऽह्नि विद्यासमारंभमुशंति सिद्धौ ३१॥

द्यारंभनक्षत्राण्याह। मृगादीनि। श्रवणे च तत्र इति केवले श्रवणे इत्यर्थः। न पुनः श्रवण
त्रये श्रवणत्रये चेत्यकरणात्। ननु मेखलाबंधनानंतरं विद्यारंभ उचितो विवाहानंतरं किमपि न दिवसाभिधानं उच्यते। मेखलाबंधना
नंतरं तद्दिवस एव वेदारंभात् विद्यारंभस्य पृथग्दिवसाकांक्षा। ततोऽधीतवेदस्य गुरोरनुज्ञया कृतस्नानस्य पाणिग्रहणे कृते आहिता
ग्नेरग्निहोत्रयज्ञोपयोगानि स्मृतिपुराणशब्दादीनि ज्ञातुमिच्छोर्विधानं भद्रमित्युपपन्नं ॥३१॥ ॥३१॥ ॥३१॥ ॥३१॥ ॥३१॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ भैषज्यकर्मनक्षत्राण्याह। पौष्णेति। पौष्णद्वये रेवती द्वये। आदितिभद्वये पुनर्वसुद्वये॥ मैत्रे अनुराधायां। ननु रोगोत्पत्तिनक्षत्राणि पुरो वक्ष्यति तदनंतरं भैषज्यनक्षत्राणि वक्तुमुचितानि॥ तदयुक्तं। जातरोगस्य व्याध्यपेक्षया औषधं योज्यं॥ ज्वराभिभूतः षडहे व्यतीते विषक्तदोषः कृतलंघनादिः। यो भेषजं दैववशात्प्रयुंक्ते निःसंशयं हन्त्यचिराच्च रोगान्॥ अतीसारशूलविसूचिकाहिक्काश्वासप्रभृतिषु सद्य एवौषधं युज्यतेऽतो न दिवसाकांक्षा॥ इह तु विद्याभ्यासातिशयेन भविष्यद्रोगहानिनिमित्तमौषधारंभः॥ अथवा चरकसुश्रुतादिकथित

पौष्णद्वये चादितिभद्वये च हस्तत्रये च श्रवणत्रये च। मैत्रे च मूले च मृगे च शस्तं भैषज्यकर्म प्रवदंति संतः ३२ ह
स्तः पुष्यो वासवं वारुणं च मैत्र्यं पित्र्यं त्रीणि चैवोत्तराणि। प्राजापत्यं चैव नक्षत्रमाहुः कूपारंभे श्रेष्ठमाद्या मुनींद्राः ३३
सावित्रतिष्याश्विनिवारुणानि मूलं विशाखा च मृदु ध्रुवाणि लतौषधीपादपरोपरेषु शुभानि भानि प्रतिपादिता
नि ३४ साधारणोग्रध्रुववारुणाख्यैर्धिष्ण्यैर्यदत्तं द्रविणं प्रयुक्तं। दत्तं च विन्यस्तमुतः प्रनष्टं न लभ्यते तन्नियतं कदाचित्

रसायनानां पंचशतवर्षपुष्ट्यादिकरणार्थं वा शुभनक्षत्रान्वेषणमिति॥ औषधीनां ग्रामारण्यानां जलमूलत्वात् ३२ अथ कूपारंभनक्षत्राण्याह॥ वासवं धनिष्ठां। वारुणं शतभिषजं। मैत्रमनुराधां — पित्र्यं मघां। प्राजापत्यं रोहिणीं ३३ अथ लतौषधीपादपरोपण नक्षत्राण्याह॥ सावित्रेति। सावित्रो हस्तः। वारुणः शतभिषक्। मृदु चित्राऽनुराधमृगरेवती· ध्रुवाणि· रोहिण्युत्तरात्रीणि ३४ अथ निक्षिप्तादिद्रव्यप्राप्तिनक्षत्राण्याह। साधारणेति। व्यवसायवणिज्यार्थं दत्तं प्रयुक्तं। व्याजार्थं समर्पितं संरक्षाने धृतं विन्यस्तं॥ चकाराद्द्वयपीकृत्य धृतं विन्यस्तं॥ ६ ॥ ८ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अज्ञानतो गतं प्रनष्टं। शेषैर्मृदुलघुनक्षत्रैः प्रयुक्ता दिव्यं लभ्यते ३५ अथैंद्रवज्रपातंतिकमाह। हस्तेति सुगमं ३६ अथाश्वशांतिकनीराजनादिक
र्माण्युपजात्याह। पुष्येति। श्रविष्ठा धनिष्ठा सौम्यं मृगशिरः। पौष्णं रेवती। अनिलः स्वाती। आदित्यादित्यपुनर्वसुः करो हस्तः वारुणं
शतभिषक् ३७ अथ गोक्रयादिनक्षत्रयोद्धृत्तमाह। शाक्रेति। शाक्रं भं ज्येष्ठा। अश्विपूषभे अश्विनीरेवत्यौ ३८ अथ गोयात्रां प्रवेशनं च
तद्दाहविधेति। सुगमं ३९ अथ पंचके वर्ज्यमाह। वासवोत्तरदलेति। धनिष्ठोत्तरार्द्धात्सार्द्धानि चत्वारि नक्षत्राणि शय्यकादीनां वितानं च वर्जयत्

हस्ते च चित्रासु तथाश्विनीषु स्वातौ च पुष्ये च पुनर्वसौ च। प्रोक्तानि सर्वाण्यपि कुंजराणां कर्माणि गर्गप्रमुखैः शु
भानि ३६ पुष्यश्रविष्ठाश्विनिसौम्यभेषु पौष्णानिलादित्यकराह्वयेषु। सवारुणर्क्षेषु बुधैः स्मृतानि सर्वाणि कह्या
णितुरंगमाणां ३७ शाक्रवासवकरेषु विशाखापुष्यवारुणपुनर्वसुभेषु अश्विपूषभयुतेषु विधेयो विक्रयक्र
यविधिः सुरभीणां ३८ चित्रोत्तरावैष्णवरोहिणीषु चतुर्दशीदर्शदिनाष्टमीषु। स्थानप्रवेशं गमनं विदध्या
द्धीमान्पशूनां न कदापि देव ३९ वासवोत्तरदलादिपंचके याम्यदिग्गमनगेहगोपनं॥ ६ ॥ ❀ ॥ ६ ॥

।प्रसंगात्प्रेतदाहेप्युक्तं। तद्विधानं तु गरुडपुराणे। श्रीकृष्ण उवाच॥ आदौ कृत्वा धनिष्ठार्द्धमेतन्नक्षत्रपंचकं। रेवत्यंतं सदा दूष्यमशुभ।
सर्वदा भवेत्॥ दाहस्तत्र न कर्तव्यो विषादः सर्वजंतुषु। न जलं दीयते तेषु अशुभं जायते भृशं। पंचकानंतरं कार्यं कर्त्तव्यं सर्वमन्यथा। पुत्रा
णां गोत्रिणां तस्य संतापो ह्युपजायते॥ गृहहानिर्भवेत्तेषु ऋक्षेष्वेषु मृतस्तु यः॥ अथवा ऋक्षयोर्मध्ये दाहस्तु विधिपूर्वकः॥ ६ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रियते मानुषाणां तु सद्य आहुतिकारणात्। विप्रैर्नियमतः कार्यो मंत्रैस्तु विधिपूर्वकं॥ वत्सश्चमीपर्णेशेषप्याः पुत्तलास्ततः। दर्भमया
श्च चत्वारः शिवनामाभिमंत्रिताः। ततो दाहश्च कर्तव्यः तैश्च पुत्तलकैः सह॥ सूतकांतेन तत्पुत्रैः स प्रेतो लभते गतिं। बालवृद्धयोर्यूनश्च पंचकेषु
मृतस्य च। विधानं यो न कुर्वीत विघ्नस्तस्य प्रजायते। द्विजानामावश्यकत्वाच्छूद्रादीनां प्रेतक्रिया त्रिविक्रमोक्ता कार्या। तथा च। प्रेतक्रिया
न कर्तव्या रविवारे कपातभे। युग्मत्रयार्द्राराधासु रोहिणीभरणीमघा। पूर्वफाल्गुन्युत्तरफाल्गुनीज्येष्ठे। पूर्वाषाढोत्तराषाढे द्वितीये॥ पू
र्वाभाद्रोत्तरभाद्रपदे ति। विष्कुंभयोगे क्रतुसप्तमेवानवरशाह व्यतिपातवज्रे। भौमाष्टमीदर्शतिथौ च रिक्ता प्रस्थानलक्ष्मीर्बहुविघ्नकारि

प्रेतदाहतृणकाष्ठसंग्रहं शय्यकावितननं च वर्जयेत्॥ ४० अर्कक्रांतगतागतान्यनुडुहां नाशाय भान्यग्रतो रुद्धो
त्रयं ततस्त्रकृषिकृद्धानाय मूलत्रयोधिस्यानां नवकं न रंध्ररागं ते स्यात् श्रियै पंचके यच्चान्यद्धितपंतरत्रकथि
तं चक्रे शुभं लांगले॥ ४१

काः। तृतीयं इति युग्मत्रयं॥ ४० एवं पशुषु संगृहीतेषु लांगलचक्रेण हलप्रवाहं शार्दूलेनाह। अर्कक्रांतेति
। यस्मिन् ऋक्षे सूर्यस्तिष्ठति तदर्कक्रांतं। यच्चार्केण भुक्तं तद्गतं। यद्भोक्ष्यति तदागतं। तानि त्रीणि भानि नक्षत्राणि हलप्रवाहकर्तुरनुडुहां वृषभा
णां नाशाय नाशार्थं स्युरिति शेषः। अग्रतो हलकाष्ठे नक्षत्रत्रयं रुद्धो भवति। ततो युगकाष्ठसान्तयोर्मध्ये च मूलत्रयेण नव नक्षत्राणि कर्षकघा
तापस्युः। मूलत्रयान्तरे योक्त्रस्थाने ये पंचके दश नक्षत्राणां युग्मे तन्नश्रियै लक्ष्म्यै स्यात्। दशस्वपि कृषिकर्तुर्वृद्धिर्भवति। शेषं नक्षत्रद्वयं ह
लकाष्ठाधस्थं तदपि श्रियै स्यात्। चक्रन्यासो नरपतिजयचर्यायां। लांगलं दंडिकायूपं योक्त्रद्वयं समन्वितं। लांगलादिलिखेद्धानि दिनेशाक्रां

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र॰मा॰ टी॰ २७ दंडिका हलपूपानां हि हिंस्या नेत्रिकं त्रिकं। योक्त्रयोः पंचके सव्येगणनाचक्रलांगले। दंडिकास्थे गवां नाशे पूपस्थे स्वामिनो भयं। लक्ष्मीः
लांगलयोक्त्रस्थे क्षेत्रारंभादिनर्क्षके ४१ एतच्चक्रे शुद्धेषु येषु नक्षत्रेषु हलप्रवाहारंभस्तानि चित्रानुराधारेवतीमृगरोहिण्युत्तरात्रय
पुष्यहस्ताश्विन्यभिजिच्छ्रवणधनिष्ठाशतभिक्पुनर्वसुस्वातिमूलमघाविशाखानक्षत्रविंशतिमुपजात्याह मृद्धितिसुराम ४२ अथ बीजो
प्तिनक्षत्राणां फलसर्पचक्रेणाह ॥ मूर्द्धीति। तत्रैन्यास एव व्याख्या किंत्वर्कोक्रांतादीनि त्रीणि नक्षत्राणि मूर्द्धि विन्यसेत् शेषं क्रमेणैवम्।

मृदुध्रुवक्षिप्रचरेषु मूले मघाविशाखासहितेषु भेषु। हलप्रवाहं प्रथमं विदध्यान्नीरोगपुष्टान्वितसौरभेये ४२॥
मूर्द्धि त्रीणि गले त्रयं च जठरे धिष्ण्यानि च द्वादश स्यात्पुच्छे भचतुष्टयं च वहिर्तोभानामिदं पंचकं। कीटं कज्जलमत्र
मूर्द्धि रधिकानि तंडुलनंक्रमात्स्यादीतिप्रभवं भयं च रवि माहीजोप्तिकाले स्फुटं ४३ हस्ताश्विपुष्योत्तररोहिणीषु चि।
त्रानुराधामृगरेवतीषु स्वातौ धनिष्ठासु मघासु मूले बीजोप्तिरुत्कृष्टफलप्रदिष्टा ४४ यः कृत्तिकामूलमघाविशा
खासार्प्यान्तकार्द्रासु भुजंगदष्टः ॥ सः। कज्जलमंगारः। निस्तंडुलत्वं तुषः तुंगशरइति लोके। ईतयो मूषकाद्याः सप्त। अतिवृष्टि
रनावृष्टिर्मूषकाः शलभाः शुकाः। स्वचक्रं परचक्रं च सप्तैता ईतयः स्मृताः ४३ फणिचक्रे सूर्यगतिवशेन बीजोप्तिका तत्र विहितनक्षत्रा
णीन्द्रवज्रयाह ॥ हस्तेति। एतेषु नक्षत्रेषु पूर्वोक्तचक्रशुद्धेषु सर्व बीजोप्तिरुत्कृष्टफला अभीष्टफला ४४ एवं हलषेटवतां वने प्रमादात्सर्प राम
दंशे यैर्नक्षत्रैर्न जीवंति तान्युपजात्याह। यः कृत्तिकेति। सार्प्यम् अघा आश्लेषा अंतकं भरणी। शेषेषु नक्षत्रेषु जीवनीयः अर्थः ॥ छ ॥ छ ॥२॥ २७

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गरुडरक्षितोपीत्यतिशयोक्तिः। हलखेटकानामित्युपलक्षणं प्रस्तावादन्येषामप्येतदेव ज्ञातव्यं ४५ अथ सर्पदंष्टस्य योगेऽवसद्भावे येषु न
क्षत्रेषु जातस्य रोगस्य न निहन्ति स्तानि शालिन्याह। स्वातीति। एतेषु नक्षत्रेषु अन्येषामपि रोगाणां नानाविधकारणोत्पन्नानां भैषज्यं चिकि
त्सां न ह्याप्नोपि धन्वंतरिरित्यतिशयोक्तिः ४६ अथ येषु नक्षत्रेषु उत्पन्नरोगो यावता कालेन निवर्तते तच्छालिनीत्रयेणाह। व्याध्युत्पत्तिरि
ति। यस्य रेवत्यनुराधयो रोगोत्पत्तिः स कष्टेन चिकित्स्यमानो जीवति। उत्तराषाढामृगशिरसोर्मासेन रोगमुक्तिः स्यात्। मघायां विंशत्या दिनैः॥ ह

सत्वैनन्तेयेन सुरक्षितोपि प्राप्नोति मृत्योर्वदनं मनुष्यः ४५ स्वात्याश्लेषारौद्रपूर्वासु शाक्रे रोगोत्पत्तिर्जायते यस्य पुंसः
।तद्भैषज्यं व्याहनोति प्रयत्नः स्याद्दुग्धाब्धेर्लब्धजन्मापि वैद्यः ४६ व्याध्युत्पत्तिर्यस्य पौष्णे समैत्रे प्राणत्राणं जायते
तस्य कृच्छ्रात्। वैश्वे सौम्ये रोगमुक्तिस्तु मासाद्विंशत्या स्याद्वासराणां मघासु ४७ पक्षाद्धस्ते वासवे सद्विदैवे मूला
श्विन्योरग्निधिष्ण्येन वाहात्। याम्ये त्वाष्ट्रे वैष्णवे वारुणे च नैरुज्यं स्यान्नूनमेकादशाहात् ४८ आहिर्बुध्न्ये पुष्यसं
ज्ञेऽर्यमर्क्षे प्राजापत्ये दित्ययोः सप्तरात्रात्। रोगान्मुक्तिर्जायते मानवानां निःसंदिग्धं जल्पितं गर्गमुख्यैः ४९॥ ६॥

स्तधनिष्ठाविशाखासु पक्षात्। मूल ———— सु नवाहात्। नवमदिनात्। भरणीचित्राशतभिषक्षु एकादशाहात्। उत्तराभाद्रपद्रापु
ष्योत्तरफाल्गुनीरोहिणीपुनर्वसुषु सप्तरात्रात्-सप्तमदिनात्। रोगान्मुक्तिर्जायते ४७ ४८ ४९॥ ७ ॥ ८ ॥ ९ ॥ ६ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथरोगमुक्तानां येषु स्नानं रोगकरं पारिशेष्याद्येषु च पुष्टिकरं तानि विवक्षुर्विवर्ज्जनीयानि। रोहिण्युत्तरात्रयाश्लेषापुनर्वसुस्वातिमघा रेवत्यो नेव शालिन्याह। इंद्रेति। प्रस्तावाद्धारवर्जनं क्रूरमिति। चरे विलग्ने रविभौमवारे रिक्तातिथौ सा हृद्बले च पक्षे। धिष्ण्ये चरे रोगविमुक्तकानां स्नानेन राणांनिरुजत्वकारी निलहो क्तवान्। लग्ने चरे सौरिकुजार्ककारे रिक्तातिथौ चंद्रबलविहीने। केन्द्रत्रिकोणारिगतैश्च पापैः स्नानं हितं रोगविमुक्तजंतोरितिगर्गसंहिताउक्तः अत्र नक्षत्रेषु रोगोत्पत्तौ शांतिः कर्तव्या। तदुक्तं। नक्षिणामंत्रेस्तद्द्रव्यैः सपूज्यार्को

इंद्रो वीरे भार्गवे चध्रुवेषु सार्प्यादित्यस्वातियुक्तेषु भेषु। पित्र्ये चान्त्ये चैव कुर्यान्न हानि चैव स्नानं रोगनिर्मुक्तजंतोः
५० हस्तपुष्यौ वासवं चानुराधाज्येष्ठापौष्णं वारुणं स्युत्तराश्च। पूर्वाचार्यैः कीर्तितश्चंद्रवर्तीनृत्यारंभे शोभनोयं भवर्गः ५१ मैत्रशाक्रकरपुष्यरोहिणी वैश्ववेषु निःसृषूत्तरासु च। रेवतीमृगशिरोश्विनिष्वपि क्ष्माभुजां समभिषेकरक्षणे ५२ सौम्याश्विनिष्यश्रवणश्रविष्ठाहस्तध्रुवत्वाष्ट्रभपूषभानि मैत्रेणयुक्तानि नरेश्वराणां विलोकने भानि शुभप्रदानि ५३ षड्यो स्मृतो द्वादशशांकराश्च पौरंदरा ज्ञानिनवक्रमेण॥

॥धिदेवताः। आरोग्यकामो ज्ञेयाक्रापश्यार्थोत्तरं शानमितिकौशिकाद्युक्तनक्षत्रपूजा ५० एवं रोगाणां येषु नक्षत्रेषु उत्सवस्नानि शालिन्याह। हस्तानि चंद्रवर्तौ प्रतिदिवसवारि। चंद्रो हि प्रतिदिवसं नक्षत्राणि भुंक्ते। भवर्गो नक्षत्रसमूहः ५१ अथ पट्टाभिषेकनक्षत्राण्याह। मैत्रेति। लग्नं तु लग्नप्रकरणे वक्ष्यति ५२ अथ राजावलोकनक्षत्राण्याह। सौम्येति। श्रविष्ठा धनिष्ठा ५३ अथांतःपुरस्त्रीणां वारवधूनां च राजसंगमे येषु नक्षत्रेषु यत्फलं तदुपजात्याह। षड्यो स्मृतिरित्यादि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वसंज्ञके ग्रे उद्दिष्टकालो भवति निरेवसादि पूर्वभागभुक्। ज्येष्ठान्तो नव नक्षत्राणि निःक्षयसंज्ञेन नेनक्षत्रोपभोगकाले चंद्रः पुरुषस्यो
दृश्यते गन्तोज्येष्ठाघाद्यपरभागयुक्। आर्द्रान्तो द्वादशसु समेनेंदुना मध्यभोगो भवत्यत आर्द्रादिमध्यभागयुक् ५४ पूर्वभागपरभागमध्य
गानां फलं रथोद्धतयाह। पूर्वभागेति। यश्चपुरस्थस्तस्य पश्चात्स्थप्रीतिर्भवति। एवं वधूवरयोर्नयसंगमेपि योज्यं ५५ सुभिक्षत्वानं चद्रव-
शेनाह। रौद्राहीति। आर्द्रादीनि षड्जघन्यानि अधमानि। ध्रुवादीनि रोहिण्युत्तरात्रयविशाखापुनर्वसुषड्बृहंति उत्तमानि अश्विनीकृ
त्तिकामृगपुष्यमघापूर्वफाल्गुनीहस्तचित्रानुराधामूलपूर्वाषाढाश्रवणधनिष्ठापूर्वभाद्रपदारेवत्यः। एतानि समानि मध्यमानि तथा च वक्त

पूर्वार्द्धमध्यापरभागयुञ्जि चिरं तनैर्ज्यौतिषिकैः स्मृतानि ५४ पूर्वभागगुजि भेपतिः प्रियो योषितामथ च नभागयो
गिनी। स्त्रीनृणां भवति मध्ययोगिनी प्रेम नूनमुभयोः परस्परं ५५ रौद्राहियाम्यानिलवारुणेंद्राण्याहुर्जघन्यानि त
थाद्बृहंति। ध्रुवाद्विदैवादितिभानि नूनं समानि शेषाणि पुनर्मुनीन्द्राः ५६ बृहत्सुधान्यं कुरुतेसमर्घं जघन्यधि-
ष्ण्याभ्युदितो महर्घं समेषु धिष्ण्येषु समं हिमांशुर्वदंत्य संदिग्धमिदं महान्तः ५७॥ ॥ ५७॥ ॥ ५७ ॥ ५७।

रणोन्तमे विशाखोत्तरादित्यकेशानि भानीह षड्ढादुर्भोगीनि नित्यं। यमसेन्द्रवायव्यसर्पाणि रौद्रं तथा वारुणं चोर्द्धभोगीनि षट्। केशंरो-
हिणी ५६ अथैषां फलमुपेंद्रवज्रयाह। बृहत्त्विति। शुक्लद्वितीयादिने यन्नक्षत्रस्थो दृश्यो भवति चंद्रस्तन्नक्षत्रं जघान्योदितेन विचा
र्यं तत्र शुक्लप्रतिपच्चंद्रे जघन्यधिष्ण्योदिते महर्घं संभवात्॥ अर्घव्यवस्थापनं नाम प्रशमनं विधेयं॥ ५७॥ ॥ ५७ ॥ ५७॥ ५७।

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र·मा· टी· २९

अंधकमिति। रोहिणी अंधकं। मृगो मंदलोचनं। ककरा आर्द्रा मध्यलोचनं चिपिटकं॥ पुनर्वसुः सुलोचनं दर्शनं। एवं पुनः पुनः। अभिजिता स
हगणेन न सप्तवारा नगणनं भवति। अत्रांधके शीघ्रं लब्धिः। मंदलोचने पत्नाल्लब्धिः। मध्यलोचने दूरस्थस्य श्रुतिः। सुलोचने अप्राप्तिः। तथा
चोक्तं देवतवल्लभे। लाभोंधके प्रकथयेद्दिवसैस्तु चौरैर्द्रव्यस्य लब्धिरिह केकरभे प्रयत्नात्। दूरे श्रुतिश्चिपिटभे दभेनु कथंचिदेव न प्राप्तिरत्र सु
विलोचनभे कदाचिदिति ५८ अथ विजयप्रस्तावे यस्मिन्योगे विजयाधिकता भवति तं योगं हरिण्याह। विषमचरणेति। यस्यैकः पादोऽन्यराशि

अंधकं न दृनु मंदलोचनं मध्यलोचनमतः सुलोचनं। रोहिणीप्रभृति भं चतुर्विधं नूनमत्र गणयेत्पुनः पुनः ५८ विष
मचरणधिष्ण्यं भद्रातिथिर्यदि जायते सुरगुरुशनिक्ष्मापुत्राणां कथंचन वासरे। मुनिभिरुदितः सोयं योगस्त्रिपु
ष्करसंज्ञकस्त्रिगुणफलदो वृद्धौ नष्टे दृष्टमृते न तथा ५९ पौष्णाश्विन्योः सार्पपित्र्यर्क्षयोश्च यच्च ज्येष्ठामूल
योरंतराले। तद्गंडांतं स्याच्चतुर्नाडिकं हि यात्राजन्मोद्वाहकालेष्व निष्टं ६०॥

॥ संबंधी। शेषपादत्रयमन्यराशिसंबंधि
। न हि विषमचरणनक्षत्रं यथा कृत्तिका पुनर्वसुरित्यादि तस्मिन्नक्षत्रे भद्रातिथिर्द्वितीया सप्तमी द्वादशी। गुरु भौम शनिवारेषु त्रिपुष्करसंज्ञो
योगो भवति। वृद्धिप्रस्तावान्नष्टमृती अप्युक्ते। योगसाम्यात् ५९ एवं शुभाशुभफलाभिधाय उत्सवकार्ये पद्धार्यं गंडांतं शालिन्याह। पौष्णे
हे घटिके रेवत्याः प्रांते हे चाश्विन्याः प्रथमे। तच्चतुर्नाडिकं गंडांतं। एवं मघाश्लेषयोः। ज्येष्ठामूलयोश्च। एतस्य फलमाह। यात्रेत्यादि
। यात्रोद्वाहादौ शुभकार्ये तद्गंडांतं वर्जयेत् जन्मनस्त्वावश्यकत्वात्प्रमाणं त्यक्तुं न शक्यते। तत्फलं च पवनजातके उक्तं। जातो न जीवति नरो मा २९

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्दशींचषड्भागंकुर्यादाद्यंशुभंस्मृतं। द्वितीये पितरं हंतितृतीयेमातरंस्मृतं। चतुर्थेमातुलं — हंतिपंचमेवंशनाशनं। षष्ठेतुधनहानिःस्याद्दालनोवंधुनाशनं॥
यदिजीवतिगंडान्तोवहुगजतुरगोभवेद्भूपइति ६० अथजन्मप्रस्तावेमूलजातस्यापत्यस्ययत्कृत्यंतत्प्रमाणिकयाह। अभुक्तमूलेतिअ
भुक्तेऽन्ननीतेमूलेयस्यजन्मतंसमाष्टकंवर्षाष्टकं। समशब्दोवर्षवाची। मूलनक्षत्रस्यमूलस्तंभादिविभागेनफलंत्रिविक्रमेणोक्तंवेदा
४मुनि७गजा८नेत्रा९दि१०गवाणा५ष्वरसा६भवाः११मूलस्तंभत्वचाशाखापत्र॥पुष्पंफलंशिखा। मूलोमूलविनाशःस्यात्स्तंभेहा
निर्धनक्षयः। त्वचिभ्रातृविनाशःस्याच्छाखायांमातृजस्यतु। पत्रेचराजपात्रत्वंपुष्पेमंत्रीफलेनृपः। एतेषांमूलजातानांशिखायांचिरजी

अभुक्तमूलसंभवंपरित्यजेच्चवालकं। समाष्टकंपिताथवाननन्मुखंविलोकयेत् ६१ तदाद्यपादकेपिता
विपद्यतेजननीयथा। धनक्षयस्तृतीयकेचतुर्थकःशुभावहः ६२ प्रतीपमंत्यपादतःफलंतदेवसार्पभे।
तद्दुस्थदोषशांतयेविधेयमत्रशांतिकं ६३ शतौषधीमूलमृदंवुरत्नैःसद्बीजगर्भैःकलशैःसमंत्रैःकुर्या
ज्जनित्रीपितृवालकानांस्नानंशुभार्थीसहहोमदानैः ६४॥ वितेइति ६१ अथामूलजातस्यापत्यस्यापरित्यागेऽष्ट
वर्षमध्येतन्मुखावलोकनेयत्फलंतत्प्रमाणिकयाह। तदाद्यपादेति ६२ अथाश्लेषाजातस्यफलमाह। प्रतीति। सार्पभेऽश्लेषायां
तदेवफलंप्रतीपविपरीतं। प्रथमःपादःशुभः। द्वितीयोधनक्षयकारी। तृतीयोमातृघ्नः। चतुर्थःपितृघ्नःइत्यर्थः। तयोर्मूलाश्लेषयोः
र्जातस्यदोषोपशांतयेदोषोपशमनायशांतिकंकार्यं ६३ तदेवशांतिकमुपजात्याह। शतौषधीति। शतौषधीमूलानियथा। वर्हिषास
हदेवीचविष्णुक्रांतापुनर्नवा। शरपुंखावराहीचकाकजंघाचलक्ष्मणा। तुविकाचैवकर्कंधूःकार्वेल्लकरणेनथाऽर्ककोटिकासुखेनाऽ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रुदन्ति चाप्यपामार्गः श्वेता च गिरिकर्णिका। वटः शमी च प्लक्षश्चोदुंबरो ऽश्वत्थ एव च। चूतो जंबुकपालाशौ नंदिवृक्षो ऽथ वेतसः। पुंनागो ऽथ॰
र्जुनश्चैव ह्यशोको बकुलस्तथा शालस्ताल —— स्तमालश्च पाटलाशनपत्रिका। मधूकश्च सिरीषश्च शल्यको ऽश्मंतकस्तथा। वला चा
निवला चैव पाठा नागवला तथा। जाती च वकुलश्चैव केतकी कदली तथा। मातुलुंगो जयंती च जवानी पुंड्रिका तथा। द्रोणपुष्पी तथा कुंभी श्री
पर्णी मुद्गपर्णिका। चंपकं पीतकं चैव स्वर्णकंटक एव च। सिंदुवारश्च काशश्च शिखी राजशमी तथा। कुंदं च कुमुदं चैव गोजिह्वा सीरकं
टकी। अहिवर्त्तं च धात्री च ब्राह्मी कांचनपुष्पिका। भृंगराजमधोपुष्पमत्स्याक्षी चाटरूषकः। नारंगी च गुडूची च शतमूली शतावरी। प
र्वो चकारणी वेल्ल —— ववीरी मुसली तथा। तुलसी च कुशं चैव काशमूलं च दीर्घिका। जलतृणमिक्षुमूलं यवशर्षपमूलजाः। एवं मूल
शतं कृत्वा ततः कुंभे विनिः — क्षिपेत्। १२ सप्तमृत्तिका यथा। राजद्वाराच्च वल्मीकान्महानदतटद्वयात्। गोशृंगान्मृत्तिका ग्राह्या अश्व॰
स्थानाद्गजात्तथा। पंचरत्नं ततः क्षिप्त्वा कषायैः पंचभिर्युतं। प्लक्षोदुंबरमश्वत्थन्यग्रोधं च पलाशजं। तीर्थोदकानि सर्वाणि पंचगव्यं
ततः क्षिपेत्। दंतीमदसमायुक्तं हेममूलेन संयुतं। बीजगर्भं यथा। देवदारुं च शैलेयं पद्मनीलोत्पलं तथा। कुष्ठं लोध्रं प्रियंगुं च नागरं मुस्त
संयुतं। धात्रीफलसमायुक्तं सर्षपास्तगरास्तथा। मुरामांसि हरिद्रा च कुञ्जकोशीरविल्वजं। मदनं ग्रंथिपर्णं च श्रीखंडमगुरुं तथा। मुरामां
सि हरिद्रा च सर्वौषधिसमन्वितं। एवं मूलशतैः हेममूलसहितैः सप्तशाष्टिकाभिस्तीर्थोदकैः पूर्वोक्तबीजैः। सपंचरत्नैः पूर्वोक्तपात्रे
परिविन्यस्तशतच्छिद्रकुंभमध्यनिक्षिप्तैः पितृमातृसुतानां वेदिके मंत्रैः स्नानं कारयेत्। हेममूलं तु मूलविधाने अष्टादशयवप्रमाणेन कं॰

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

।आश्लेषाविधाने सर्पाकारं अष्टादशयवप्रमाणं हेममूलं कारयेत्। कुंभे चोर्णवस्त्रेणाछादयेत् स्थापयेच्च महान् सर्वान् नैऋतेनैऋतेश।केरक्तवर्णं महादंष्ट्रं रक्तधाम्नैः समालिखेत्। चरुं च अपि पत्रे नैऋते दुष्टवर्हणं। आज्यभागेन नो हुत्वा यथास्थाने विचक्षणः। अनंतरं च होतव्यं पायसं नैऋतं नतथा। पुष्यस्नानोक्तमंत्रैश्च स्नापयेद्दंपती शिशुं। गुरुं देवानथ पपित्वा दानं वित्तानुसारतः। दानांते भोजयेद्विप्रांसर्वमूलानि तत्रैव। एतच्च मूलविधानं गृहस्थधर्मसमुच्चये सविनारमुक्तं ६४ अथ पुष्यगुणप्रशंसां पुष्पिताग्रयाह॥ परकृतेति तिथिवारयोगकृतं पुष्यो हंति नाशयति। पुष्यदोषं तु ग्रहवेधविरुद्धतारेत्यादिवक्ष्यमाणं परोऽन्योवा न स्वत्र तिथ्यादिर्न हंति। अष्टमेपीत्यपिश

परकृतमखिलं निहंति पुष्यो न खलु निहंति परस्तु पुष्यदोषं। ध्रुवममृतकरे ह्यमेपि पुष्यो विहितमुपैति सदेव कर्मसिद्धिं ६५ सिंहो यथा सर्वचतुष्पदानां तथैव पुष्यो बलवानुडूनां चंद्रे विरुद्धेप्यथ गोचरेपि सिद्ध्यंति कार्याणि कृतानि पुष्ये ६६ ग्रहेण विद्धोप्यशुभान्वितोपि विरुद्धतारोपि विलोमगोपि। करोत्यवश्यं सकलार्थसिद्धिं विहाय पाणिग्रहमेव पुष्यः ६७॥ ब्दाच्चतुर्थेपि ६५ अथया दृशः पुष्यो निखिलार्थसिद्धिकरस्तमुपजातिद्वयेनाह। सिंहो यथेति। गोचरे पीत्यपिशब्दाद्दष्टकवर्गेपि विरुद्धे। चंद्रे विरुद्धेपि पुष्यः सकलार्थसिद्धिकारीत्यर्थः यथा शब्दइवार्थे ग्रहेण विद्धोपि पंचशलाके सप्तशलाके वा दुष्टग्रहेण विद्धोपि। अपिशब्दात्पोभिधूमितोपि। तारावलहीनोपीत्यपिशब्दात्त्रैधनप्रत्यरिविपत्करनक्षत्रस्थोपि पुष्यो विवाहविना सर्वकार्येषु प्रशस्तः। तथा चल्लः। अपरहितः सर्वोहितो वा प्रत्यरिनिधनविपत्करे वापि। पाणिग्रहणं मुक्त्वा

मु० चि० टी०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नैधनप्रत्यरिविपन्नाराणितारा प्रकरणोव्याख्यास्पान्ते। विलोमगोपिपश्चिमायांगमने विपरीतोपि ६६। ६७ अथनक्षत्राणामाकाशस्थानं
आकारज्ञानार्थम्मालिनीशार्दूलोपजातिवंशस्थतिलकैराकारंसंख्यांचतारकाणामाह। अश्विनीअश्वमुखाकारा: त्रितारा:ध्रुवकांत्दृशा
भिर्विक्षेपांशैरुत्तरतोविक्षिप्ता। भरणीभगाकारा। त्रितारा कृत्तिका क्षुरभा षट्तारा पंचभिर्विक्षेपांशैरुत्तरतस्तिष्ठन्ति। रोहिणीशकटतुल्यापंच

तुरगमुखसदृशंयोनिरूपंक्षुराभंशकटसममथैणस्योत्तमांगेनतुल्यं। मणिगृहशरचक्राभानिशालोपमाभेशयन
सदृशमत्रचापिपर्य्यंकरूपं ६८ हस्ताकारमतश्चमौक्तिकसमंचान्यत्प्रवालोपमं धिष्ण्यंतोरणवत्स्थितंम
णिनिभंस्यात्कुंडलाभंपरं क्रुद्धत्केसरिविक्रमेणसदृशंशय्यासमानेपरंचान्यद्दंतिविषाणवत्स्थितमतःशृंगा
टकव्यक्तिच ६९ त्रिविक्रमाभंचमृदंगरूपंवृत्तंततोऽन्ययुगलद्वयाभं पर्य्यंकतुल्यंमुरजानुकारमित्येवमश्वा
दिभचक्ररूपं ७० वह्नि३ त्रि३ ऋ६त्विषु५ गुणे३ दु१ कृता४ ग्नि३ भूत५ बाण५ श्वि२ नेत्र२ शर५ भू१ कु१ युगा४।
ब्धिरामाः३ रुद्राब्धिरामगुण३ वेद४ शत१०० द्वि२ युग्म२ दंता ३२ बुधैर्निगदिता:क्रमशोभतारा:७१ ॥ ७१ ॥

तारा पंचविक्षेपांशैर्दक्षिणतः। मृगशिरोहरिणमूर्द्धाकारा त्रितारा दशविक्षेपांशैर्दक्षिणतः। आर्द्रामणितुल्या एकतारा एकादशविक्षे-
पांशैर्दक्षिणतः। पुनर्वसुः गृहतुल्यः चतुस्तारः षड्विक्षेपांशैरुत्तरतः। पुष्यः शराकारः त्रितारकः विक्षेपमध्येस्वमध्येतिष्ठति ॥ ॥ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आश्लेषा चक्राकाराः सप्ततारा सप्तविक्षेपांशैर्दक्षिणतः मघा शालाकारा पंचतारा विक्षेपरहिता पूर्वाफाल्गुनी शय्यारूपा द्वितारा द्वादशविक्षेपांशैरुत्तरतः उत्तरफाल्गुनी पर्य्यंकतुल्या त्रितारा त्रयोदशविक्षेपांशैरुत्तरतः हस्तो हस्तसदृशः पंचतारकः एकादशविक्षेपांशैर्दक्षिणतः चित्रा मौक्तिकतुल्या एकतारा विक्षेपांशैर्दक्षिणतः। स्वातिर्विद्रुमतुल्या एकतारा सप्तत्रिंशैर्विक्षेपांशैरुत्तरतः॥ विशाखा तोरणरूपाः चतुस्ताराः सार्द्धांशेन दक्षिणतः। अनुराधा पूजातुल्या चतुस्ताराः त्रिभिर्विक्षेपांशैर्दक्षिणतः॥ ज्येष्ठा कुंडलतुल्याः त्रितारा चतुर्विक्षेपांशैर्दक्षिणतः॥ मूलं सिंहपुच्छाकारं सार्द्धाष्टांशैर्दक्षिणतः। पूर्वाषाढा शय्यारूपा चतुस्तारा सार्द्धपंचांशैर्दक्षिणतः॥ उत्तराषाढा हस्तिदंततुल्या चतुस्ताराः पंचविक्षेपांशैर्दक्षिणतः अभिजित् शृंगाटकनिभं त्रिकोणं त्रितारं द्वाषष्टिविक्षेपांशैरुत्तरतः॥ श्रवणो त्रिविक्रमतुल्यस्त्रितारं त्रिंशद्विक्षेपांशैरुत्तरतः। धनिष्ठा मर्द्दलतुल्या चतुस्तारा षड्विक्षेपांशैरुत्तरः। शतभिषक् वृत्ताकारा शततारा दशविक्षेपांशैर्दक्षिणतः। पूर्वाभाद्रपदा यमलद्वयरूपा द्वितारा॥ चतुर्विंशतिविक्षेपांशैरभिरुत्तरतः॥ उत्तरभाद्रपदा द्वितारा षड्विंशविक्षेपांशैरुत्तरतः॥ रेवती मृदंगतुल्या द्वात्रिंशत्तारा विक्षेपरहिता रवमध्ये एव तिष्ठति॥ अत्र क्षेपांशाः पौलिशादिदृष्टा इति॥ तथा च ब्रह्मसिद्धांते। ध्रुवक्रांते भे विक्षेपाद्॥ तारासंख्या यां लक्ष्वः शिखिशिशिरसशरगुणशशिकृतगुणशरविषयमलयमविषाः। शशिशशिशिक्षतयुगशिखिशिवयुगगुणदहनजलधिशतयमलाः यमलरदाः साभिजितां तारासंख्याश्विन्यादीनामिति॥ ७१॥ इति श्रीमहादेवविरचिते रत्नमालाविवरणे नक्षत्रप्रकरणं षष्ठोऽध्यायः॥ ६॥ ॥ ६॥ ॥ ६॥ ६॥ ६॥ ॥ ६॥ ६॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथनक्षत्रदेवतासमाननाम्नांमुहूर्तानांप्रकरणमारभ्यते।तत्रादावेवपंचदशदिनमुहूर्त्तान्वसंततिलकेनाह।रुद्राहीति।एषांदेवतना मेवव्यवहारोनानाभिधानान्तरमस्ति।योनिर्भेगः १ अथरात्रिमुहूर्तान्पंचदशोपजात्याह।निशामुहूर्ता इति।चसमुच्चये।नकेवलंदिनमु। हूर्त्ताराात्रिमुहूर्त्ताश्च २ अथमुहूर्तप्रमाणंतत्कार्येचोपजात्याह।दिनस्येति।पूर्वोक्तप्रकारेणदिनमानंरात्रिमानंचानीयपंचदशविभक्तं

रुद्रा१ऽहि२मित्र३पितरो४वसु५वारि६विश्वे७वेधा८विधिः९शतमखः१०पुरुहूत११वह्नी१२नक्तंचर१३
श्चावरुणा१४ऽर्यमयोनय१५श्चप्रोक्तादिनेदशपंचतथामुहूर्ताः १ निशामुहूर्तागिरिश१ाऽजपाद२ाऽ
हिर्बुध्न्य३पूषा४ऽश्वि५यमा६ऽग्नय७श्च।विधातृ८चंद्रा९ऽदिति१०जीव११विष्णु१२तिग्मद्युति१३त्वष्टृ
१४समीरणा१५श्च २ दिनस्ययःपंचदशोविभागोरात्रेस्तथातद्धिमुहूर्तमानं।नक्षत्रनाथप्रतिमेमुहूर्तेमौहूर्ति
कास्तत्समकर्मचाहुः ३ अष्टमोह्यभिजिदाह्वयःक्षणोदक्षिणाभिमुखयानमंतराकीर्तितोपरककुप्सूरि
भिर्यायिनामभिमतार्थसिद्धये ४ अर्यमार्केतुहिनकिरणोराक्षसब्राह्मसंज्ञौपित्र्याग्नेयौसितिसुतदिनेचंद्रपुत्रे
ऽभिजिच्च॥

मुहूर्तोतंघटिकादिलभ्यते।तत्रनक्षत्रसमानदैवत्येमुहूर्तेतन्नक्षत्रकर्मकार्यं।एतदाम्नायिककर्मकार्यविषयं ३ अथाष्ट मम्मुहूर्तस्यवेधाभिधानस्यनामांतरंतत्कार्यंचरथोद्धतयाह।अष्टमेति।दिनेअष्टमोऽभिजिन्नामामुहूर्त्तोदक्षिणदिग्गमनंवर्जयित्वा अन्यदिग्यायिनामिष्टफलाप्तयेभवति ४ अथयेषुवारेषुमुहूर्त्तावर्ज्यास्तानाह।अर्यमेत्यर्केइति।अर्केरविवारेआर्यम्णो वर्ज्यः उत्तराफा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चंद्रवारेमूलरोहिणीसमानदैवतौराक्षसब्राह्मसंज्ञौ। भौमेमघाकृत्तिकासमानदैवतौपित्र्याग्नेयौ। बुधेअभिजित्। गुरुवारेमूल
पूर्वाषाढादैवतौराक्षसाप्यौ। शुक्रेमघारोहिणीदैवतौपित्र्यब्राह्मौ। शनिवारेऽश्लेषार्द्रादैवतौभौ जङ्गःशैवज्यौविति ५ अथ पौ
राणिकान्पंचदशमुहूर्त्तानुपजातिस्वागताभ्यामाह। पौराणीति। सितचारभवैराजकरौहिणबलविजयादेवताविशेषाः अशुभसकुन
पद्मतिनामप्रयोजनं चैषां। श्राद्धेत्रीणिपवित्राणिदौहित्रःकुतपस्तिलाइत्यादि ६।७ ॥ अथपौराणिकान्पंचदशरात्रिमुहूर्त्तानाह

पित्र्यब्राह्मौभृगुसुनदिनेराक्षसाप्यौचजीवेभौजङ्गःशैवसवितृननयेवर्ज्जनीयौमुहूर्त्तौ ५ पौराणिकारौद्र १ सि
तो २ ख्यमैत्राः ३ स्रणा ४ स्मृता। श्चारभट श्चतुर्थः। सावित्रवैराजकसंज्ञितौचगांधर्वनामाभिजिदष्टमःस्या
त् ६ रौहिणाह्वयबलौविजयोन्योनैर्ऋतिशक्रमखौवरुणश्च। अंतिमस्तुभगसंज्ञितउक्तोयोऽष्टमःस
चभवेत्कुतपाख्यः ७ रौद्रोगांधर्वनामाद्द्रविणपरिदृढःसारणोवासुरग्निरस्रोधातााथसौम्यस्तदनुक
मलजोवाक्पतिःपौष्णनामा वैकुंठोऽन्यःसमीरोनिर्ऋति रितिनिशाचारिणोऽमीमुहूर्त्ताःप्रोक्तास्त्रिः
पंचसंख्यामुनिभिरिहपुराणार्थचिंताप्रवीणैः ८ वैराजनामाविजयःसितार्ख्यःसवि त्रमैत्रावभिजिद्
रौद्रेति ॥ द्रविणपरिदृढोधनदः॥ मारणोदेवविशेषः वैकुंठोविष्णुः समीरोवायुः॥ शेषंप्रसिद्धम् ॥ ८॥ ॥ ((लाश्च॥
॥ अथैषांमुहूर्त्तानांयेप्रधानास्तस्मान्नानिन्द्रवज्रयाह ॥ वैराजेति ॥ सुगमंपद्यमिदं॥ ९ ॥ ॥ ९ ॥ ९ ॥ ॥ ९ ॥ ९ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

अथज्योतिषमुहूर्तानांरुद्रादिप्रभृतीनांप्रयोजनंशालिन्याह। यस्मिन्निति। नाक्षत्रंदिक्शूलंवक्ष्यमाणंपरिघदंडश्च मुहूर्तैश्चापिनक्ष
त्रवद्विचार्यं। एतदप्याल्पयिकेकार्यविषयं १० इतिश्रीमहादेवविरचितेरत्नमालाविवरणेमुहूर्तप्रकरणंसप्तमं ७ एवंतिथिवारयो
गकरणनक्षत्रगुणानभिधायतेषांयोगायोगभवंप्रकरणमारभ्यते। तत्रसूर्याक्रांतादिषुनक्षत्रेषुचन्द्राश्रितेषुयेदोषास्तान्स्रग्ध
रावसंततिलकाभ्यामाह। भूकंपइति। भूकंपाद्यपशुल्यफलाभवंति। तत्रपुनःसवितृभात्सप्तमेनक्षत्रेभूकंपोभवति। एवमन्यत्रापि। ए

सर्वार्थसिद्ध्यैकथितामुहूर्तामौहूर्तिकैरत्रपुराणविद्भिः ९ यस्मिन्धिष्ण्येयच्चकर्मोपदिष्टंतद्देवत्येनमुहूर्तेपि
कार्यं। दिक्शूलद्यंचिन्तनीयंसमस्तंतद्वद्दंडःपारिघश्चाक्षरेषु १० भूकंपःसप्तमर्क्षेभवतिसवितृभान्यच्चमेवि
द्युत्तुर्येशूलंचैवाष्टसंख्येऽशनिरितिदशमेकेतुरष्टादशेच। दंडस्त्विपंचसंख्ये १५ सनवदशमिते ११ नून
मुल्काप्रदिष्टाः। धिष्ण्येद्विसप्तसंख्ये १४ मुनिभिरभिहितश्चात्रनिर्घातपातः १ भादेकविंशतिमितान्कथिताश्च
मोहनिर्घातकंपकुलिशाःपरिवेषयुक्ताः। एष्विंदुगेषुनशुभंखलुकर्मकार्यंसिद्धिंप्रयातिदहनास्त्रविषादि
शास्त्रं २ सूर्याधिष्ठितभाद्भुजंगपितृभत्वाष्ट्रेषुमैत्रेश्रुतौपौष्णेचक्रमशोऽश्विभाद्गणनयाशीतांशुनासंयुताः॥

कविंशतितमान्नक्षत्राच्चंद्रयुक्तायथासंख्यंमोहनिर्घातादयःपंचभवंति। एषुइंदुगेषुनशुभमिति। एषुप्रतिदिननक्षत्रस्थेष्विंदुषुनःशुभं
कर्मकार्यं। क्रूरकर्मतुविष्टिवदेषुसिद्ध्यतीति १२ अथार्गलाचक्रंशार्दूलेनाह। सूर्याधिष्ठितेति। स्वाजूरूचक्रंवदेखाःकृत्वातत्रयस्मिन्नक्ष ३३

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तदाद्यौ कृत्वा नक्षत्राणि विन्यसेत् । तेषु नक्षत्रेषु मध्ये आश्लेषामघाचित्रानुराधाश्रवणरेवती घ्नभिन्नानं कुर्यात् ततोऽश्विन्यादिगणनया तावत्तिथेर्भिन्नानसमसंख्यके नक्षत्रे हरायुधं त्रिशूलं पतति । तत्र विवाहादि मंगलं न कुर्यात् । अत्राश्विनीस्थेरवो नव दश चतुर्दश सप्तदश द्वाविंशति सप्तविंशति संख्येषु नक्षत्रेषु हरायुधपातो दृष्टः ततो नक्षत्राणामपि तत्संख्या वक्तुं भुजंगादीनि ग्रंथकृतानि । हि स्थानि । यथाश्विनीं परित्यज्य रविरग्रतो याति तथा भुजंगादिन्यपि पश्चात्सर्पंति । अत एवोक्तमश्विभाद्गणनया धिष्ण्येनावतिथ्य इति ।

धिष्ण्येनावतिथेः पतत्यवितथं चंडीशचंडायुधं तस्मिन्नात्महिते शुभैर्निजहितं कार्यं न कार्यं बुधैः ३ आनंदः
कालदंडो धूम्राख्योऽथ प्रजापतिः सौम्यः । ध्वांक्षो ध्वजनामाथ श्रीवत्सो वज्रमुद्गरौ छत्रं ४ मित्रं मानसनामा
पद्माख्यो लंबकस्तथोत्पातः । मृत्युः काणः सिद्धिः शुभामृतौ मुसलमथ गदाख्यश्च ५ मातंगराक्षसाख्यौ च
रस्थिरवर्द्धमानाद्यमे योगाः । अष्टाविंशतिसंख्या निजसंज्ञासमानफलं कुर्युः ॥ ६ ॥ ॥ ६ ॥ ६ ॥ ॥ ६ ॥ ॥

तथा च विक्रमः । साध्यहर्षणशूलानां वै धृतिव्यतीपातयोः अर्द्धं गंडस्य चांते स्यात्तत्स्थानेन निपातितम् ३ अथानंदादीनष्टाविंशतियोगानार्यात्रयेणाह ॥ आनंदेति एते सर्वेपि स्वनामतुल्यफलदा ज्ञातव्याः ध्वांक्षादिदुष्टयोगेषु वर्ज्यघटिकास्त्रित्रिविक्रमेणोक्ताः ॥ तथा च । ध्वांक्षे वज्रे पुधमुद्गरेषु घटिकास्त्याज्यास्तु पंचादितः पद्मालंबकयोश्चतस्र उदिता धूम्रे सदैका पुनः द्विकाणेसुरालाहुयेपि हि गदे सप्तैव निस्वं श्वरे मृत्यूत्पातकरस्ससां दिनगतास्ताः कालदंडे नव ॥ दिनगता दिनप्रमाणाः षष्टिघटिकाः ॥ ४ ॥ ॥ ५ ॥ ६ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ यस्य वारस्य यस्मान्नक्षत्रादेते योगा भवंति तदुक्तं तिलकयाह॥ सूर्येइति। रवावश्विनीप्रभृतिगणनाय कार्या। तथा रविवारेऽश्विनीनक्षत्रे आनंदयोगो भवति। भरण्यां कालदंडः। कृत्तिकायां धूम्राख्यः रोहिण्यां प्रजापतिरित्यादि। एवं सोमे मृगशिरःप्रभृति आ— नदादयः। भौमे श्लेषातः। बुधे हस्तात्। गुरावनुराधायाः। शुक्रे उत्तराषाढायाः। शनौ शतभिषजो यथाक्रममानंदादय योगा भवंति ॥ ॥ अत्र सूर्यादीनां सर्वेषां युगपद्योगसंभवात्क्रम उपनिबद्धः योगेषु सप्तभकेषु चत्वारो योगा लभ्यन्तेऽतोऽस्मान्नक्षत्रान्नख्यादिवाराद्यथा

सूर्येश्विभात्तु हिनरो विषि सौम्याधिष्ण्यात्साप्योच्चभूमितनये च बुधे च हस्तात् मैत्राद्गुरौ भृगुसुते खलु वैश्वदेवा च्छायासुते वरुणभात्क्रमशः सुरेन्द्रे ७ हस्तोरवौ शशधरे च मृगोत्तमांगं भौमेऽश्विनी बुधदिने च तथानुराधा पुष्यो गुरौ भृगुसुतेपि च पौष्णधिष्ण्यं रोहिण्यथार्कितनयेऽमृतसिद्धियोगाः ८ तिथ्यश्च वारस्य च यत्र संख्या यत्र योदशसु मिलनेऽकृते मतिः। स एव योगः क्रकचाभिधानकोविवर्जनीयः खलु कर्मसु ध्रुवं ९ नंदा शुक्रे सोमपुत्रे च भद्रा रिक्ता मंदे लोहितांगे जया च वाचांपत्यौ याच पूर्णाभिधाना सर्वारंभे षड्वा सिद्धा तिथिः स्यात् १०॥

संख्यं नक्षत्रेष्वेतेषु योगा भवंति यतः सर्वेषामष्टाविंशतियोगा भवंति ७ अथामृतसिद्धियोगानाह। हस्तोरवाविति। अमीषु योगेषु कार्ये कर्तुरवश्यं सिद्धिर्भवतीत्यर्थः ८ एवं नक्षत्रवारयोगानभिधायेदानीं तिथिवारभवं क्रकचाख्ययोगं वक्ष्यन्नाह। तिथ्यश्चेति। तिथिसंख्यायाः वारसंख्यायोश्च योगे यत्र त्रयोदशसंख्या भवति स क्रकचयोगः यथा रविवारे तिथिर्द्वादशी एवं सोमवारे एकादशी। भौमवारे दश

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथसंवर्त्तयोगंप्रहर्षिण्याह। सप्तम्यामिति। सप्तम्यांशुक्लायांकृष्णायांवा। यदिरविवारः प्रतिपदिचबुधवारःतदासंवर्त्ताख्योयोगः। ११ सतेयोगायेषुदेशेषुनिषिद्धास्तानुपजात्याह। विरुद्धयोगेति। तिथिवारजाताःक्रकचसंवर्त्तादयः। नक्षत्रवारजाताउत्पातमृत्युकाणादयः। हूणेषुउत्तरदेशेषु। वंगेषुवंगालइतिप्रसिद्धेषु। खसेषुकेदारमंडलेषु वर्ज्जनीयाः अन्यदेशेषुनवर्ज्याः॥ चकाराद्यमघंटोपकुलिककंटकादयोविवर्ज्जनीयाः यथा मघाविशाखाआर्द्राचमूलमृक्षंचकृत्तिकारोहिणीहस्तइत्येतेयमघंटाःक्रमाद्रवेःप्रच॥

सप्तम्यादिनकरवासरोयदास्याद्वारश्चेत्प्रतिपदिचेन्दुनंदनस्य संवर्त्ताख्योमुनिभिरुदीरितःसयोगःसंन्याज्यः शुभफलकांक्षिभिःप्रयत्नात् ११ विरुद्धयोगास्तिथिवारजातानक्षत्रवारप्रभवाश्चयेच। हूणेषुवंगेषुखसेषुवर्ज्याःशेषेषुदेशेषुनतेनिषिद्धाः १२ इतिश्रीपतिभट्टविरचितायांरत्नमालायांशुभयोगप्रकरणं ८ घोरारवौध्वांक्षमन्दस्तुनौचसंक्रान्तिरारेचमहोदरीस्यात् मंदाकिनीत्वेषुगुरौचमंदामिश्राभृगौराक्षसीचार्कपुत्रे

।५।वेद४गुणाद्य१२केस७प्राणाग्रहराईकाःउपकुकाश्चविज्ञेयाइतिवाराक्रमादमी। गुणा३ द्वि२ चंद्र१ सप्त७ग ६ शर५वेद४स्तुकंटकाः। कालस्तुवसु८रामा३ग ६ भू१ वेद४मुनि७ पक्षकाः२॥१२ इतिश्रीमहादेवविरचितेरत्नमालाविवरणेउपयोगप्रकरणमष्टमम्८ एवंदिनग्रहर्क्षभवंशुभाशुभमभिधायेदानींमासराशियोगभवायाःसंक्रान्तेःप्रकरणमारभ्यते। तत्रादौवयेषुवारेषुसंक्रान्तिनोयाःसंज्ञास्ताइंद्रवज्रयाह। घोरेति। रविवारेघोरादयःसंक्रान्तयोभवंति॥ अथवक्ष्यमाणोक्तादिनक्षत्रैरपिघोरादिसंज्ञाभवंति॥ १॥ ६॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र॰मा॰ अथ नक्षत्रोत्थाः संक्रांतिसंज्ञास्त्वनुष्टुभाह। उग्रेति। रविवारे उग्रनक्षत्रे घोरासंज्ञा संक्रांतिर्भवति। चंद्रवारे क्षिप्रनक्षत्रे ध्वांक्षी। भौमवारे चर
टी॰ भे महोदरी। बुधवारे मैत्रभे मंदाकिनी। गुरुवारे ध्रुवभे मंदा। शुक्रवारे मिश्रभे मिश्रा। शनिवारे दारुणभे राक्षसी। या वारतो नक्षत्रतश्च
३५ घोरा संक्रांतिः सा च समा यथोक्तफलदा भवति। या पुनर्वारतो घोरा नक्षत्रतो ध्वांक्षी सा मिश्रफलं ददाति। एवमन्यासामपि तथा च
केशवव्यवहारेपि। घोरार्के क्रूरनक्षत्रे ध्वांक्षी वै क्षिप्रकारकैः महोदरी चरैर्भौमे मैत्रैर्मंदाकिनी ध्रुवं। मंदा गुरौ ध्रुवैर्विद्धे मिश्रा मिश्रोडुभि

उग्रक्षिप्रचरैर्मैत्रध्रुवमिश्राख्यदारुणैः। ऋक्षैः संक्रांतिरर्कस्य घोराद्याः क्रमशो भवेत् २ ध्वांक्षी वैश्यान्सुख
यति महोदर्य्यलं चैरसार्थं घोरा शूद्रानथ नरपतीनव मंदाकिनी च। मंदाख्याथ द्विजवरगणं मिश्रकाख्या पशूं
श्चचंडालानां प्रकृतिमखिलां राक्षसी संज्ञका च ३ पूर्वाह्णे काले नृपतीन्द्विजेंद्रान्मध्ये दिने चाथ विशोपराह्णे शू
द्रान्रवावस्तमिते प्रदोषे पिशाचकान्रात्रिचरान्निशीथे॥ ४॥ ॥४॥ ॥ ४॥) (भृंगौ॥ राक्षसी दारुणैर्मंदे

संक्रांतिः सवितुः स्मृता २ अथ संक्रांतिर्येषां हितकारिणी तानाह। ध्वांक्षीति। एतन्मासफलं यथोक्तं विचारणीयं ३ अथ यत्र काले संक्रांतिर्ये
षां निघ्नानामुपजातिवृत्तेनाह। पूर्वाह्णे काले इति। दिनमानं त्रिभिर्भक्त्वा प्रथमोंशः पूर्वाह्णः तत्र नृपतीन्नाशयति मध्याह्ने वीप्रान्॥ अपराह्णे
वैश्यान्। अस्तकाले शूद्रान्। प्रदोषः प्रथमो यामः द्वितीयस्तु महानिशा॥ तृतीयस्तु महारात्रिश्चतुर्थः शेष उच्यते। सूर्यास्तान्नक्षत्रदर्शने भा॰
पावत्सायंसंध्या॥ नक्षत्रदर्शनात्सूर्योदयं यावत्प्रातःसंध्या॥ नदाहिकान्त्रंकाद्रीकान्॥ पशुपालकानां भीरान्॥ ४॥ ४॥ ४॥ ४॥ ३५

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

५ अथ येषु करणेषु सुप्तोपविष्टोर्ध्वेषु रवेः स्थितस्य संक्रमणं तानुपजातिवसंततिलकाभ्यामाह। चतुष्पादेति। एतत्सुप्तोपविष्टोर्ध्वत्वं धा-
न्यार्घवृद्धिपुष्ट्यौ नमध्योत्कृष्टत्वार्थं। नपुनः सूर्यस्य सुप्तोपविष्टत्वं घटते। यानि च तत्र प्रकरणे जघन्यसमबृहत्त्वेन कथितानि तानि पं-
चदशत्रिंशत्पंचचत्वारिंशन्मुहूर्तत्वेन नक्षत्राण्युक्तानि। फलसाम्यात् ६। ७ अथ संक्रांतेः पुण्यकालस्तं श्लोकद्वयेनाह। पूर्वतोपीति। सं-

नवत्यादिकाश्चापरात्रिकाले प्रत्यूषकाले पशुपालकाश्च संक्रांतिरर्कस्य समस्तलिंगिनां तेच संध्यासमये निहं-
ति ५ चतुष्पादेनेतिलनागयोश्च सुप्तो रविः संक्रमणं करोति। विष्ट्यां ववाख्ये च गरे तु ह्ययेच सवालवाख्ये वणि-
जेति विष्टः ६ किंस्तुघ्ननाम्नि शकुनाव पि कौलवाख्ये चोर्ध्वस्थितस्य खलु संक्रमणे रवेः स्यात्। धान्यार्घवृ-
द्धिसुभवक्रमशस्त्वनिष्टमध्येष्टतेति मुनयः प्रवदंति पूर्वे ७ पूर्वतोपि परतोपि संक्रमात्पुण्यकालघटिकास्तु
षोडशः। अर्द्धरात्रसमयादनंतरसंक्रमे ऽपरदिनं हि पुण्यदं ८ यद्यर्द्धरात्रएव स्यात्संपूर्णसंक्रमो रवेः तदादिनद्व-
यं पुण्यं स्नानदानादिकर्मसु॥९॥ (स्थि) संक्रांतिकालो द्वात्रिंशद्घटिकाद्वैर्वतः। ताश्च घटिका रविविंबमानान्यत्र स्पष्टाः रविभुक्तिभक्ताः उपप-

पपद्यते। तथाच भास्करसिद्धांते षष्टिघ्नविंबं ग्रहभुक्तिभक्तं संक्रांतिनाड्यास्विलधर्मकृत्या रवेस्तुनाः पुण्यप्रमाणगृहश्च संक्रांतिर्गो मिश्रफ-
लं विधत्ते। ताश्च षोडशगतराशेः संधिः षोडशाग्यराशेः संधिः। तदनंतराले संक्रांतिकालः रविभुक्तिरेकादशगुणा विंशतिभक्ता कलात्मकं

मानं भवति ८ अथ परार्द्धरात्रे एवं संक्रां-
जिस्ल रार्द्धरात्रान्पूर्वदिने॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आगामिदिनं च स्नानादिकर्म सुपुण्यं दर्शयित्वाह। यद्यर्द्धरात्रे त्रि। एवं सामान्येन संक्रान्तिपूर्वकालमुक्त्वा संक्रान्तिविशेषेण कालमभिधातुमिच्छुः संक्रान्तीनां नामानि सराशीन् द्रुतविलंबेनाह ९ हरिपदमिति स्थिरभे वृषसिंहवृश्चिककुंभराशौ हरिपदमुच्यते द्वितनुभे मिथुनकन्याधनुर्मीनराशौ षडशीतिमुखं भवेत्। मकरे उत्तरायणे। कर्कटे दक्षिणायने। मेषतुलयोः विषुवत्स्मृतं कथितं १० अथ याः पूर्वभागिन्यो याश्चोत्तरभोगिन्यो याश्च समभोगिन्यस्ता उपजात्याह। याम्यायनेइति। दक्षिणायने हरिपदे च स्थिरराशिसंज्ञिते संक्रान्तिकाला

हरिपदं स्थिरभे रविसंक्रमाद्द्वितनुभे षडशीतिमुखं भवेत् उदगवागमने मृगकर्किणोः क्रियतुलाधरयोर्विषुवत्स्मृतं १० याम्यायने विष्णुपदे तथादौ दानाद्यनंतं विषुवे च मध्ये। वदंति येते षडशीतिवक्त्रे महर्षयः स्वल्पतने च सौम्ये ११ मकरकर्कटकादिगतस्य चेद्भवति उत्तरयाम्यगमो रविः कथितराशिषु संक्रमणं तदा हरिपदाद्युदितं च महर्षिभिः १२ यावद्भिरंशैरयने च्युतिः स्यात्तद्भोगकालेन दिवाकरस्य। च्युतिर्भवेद्विष्णुपदादिकानां रहस्यमेतन्मुनिभिः प्रदिष्टं

सूर्वपुण्यकालः मेषतुलेच संक्रान्तिकाल एव। द्विस्वभावराशौ उत्तरायणे च संक्रान्तिकालानंतरं पुण्यकालः ११ अथ संक्रान्तिभोगो यादृशेन रवेर्याम्योत्तरगमनेन न भवति तं द्रुतविलंबेनाह। मकरेति। यत्रकाले मकरसंक्रान्तिस्तदैव चेद्भवेदुत्तरागतिः यदा च कर्कसंक्रान्तिस्तदैव चेद्भवेद्दक्षिणागतिस्तनो निर्दिष्टकाले संक्रान्तिप्रवृत्तिः १२ अथ यदि मकरकर्कटादिस्थस्य रवेरुत्तरयाम्यगती न भवतस्तदा किं कार्यमित्यत आह। यावद्भिरंशैरिति। धनुःस्थे मिथुनस्थे वा भानौ समदिक्सूत्रे उन्नच्छन्नं सूर्यविलोकावशकाष्ठादिनिरवमेतत् ततो द्वितीयदिने पाचनादिकस्तूत्रे सं

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तावतिप्रसंशेऽपरं सूत्रं विन्यसेत्। तदन्तरेण त्रिंशत्काष्ठानि विन्यसेत्। ततोऽन्तिमादेशाद्यावद्भिर्वांगुलैस्तरतोद्क्षिणतो वा रविर्गच्छति तेऽय
यनांशाः। तद्दृशेनान्येषामपि संक्रांतिकालानां चलनं भवति॥ ते चायनांशा अष्टत्रिंशदधिके चतुःशते शके आसन्। तद्दिनादेकैका कलाप्र
तिवर्षं वर्द्धते॥ तथा च करणोत्तरे। रविच्छायाभान्वोर्विवरमयनांशाः स्फुरथवा कलारूपा पाताः करणशरदः षट्शतयुताः॥ करणोत्तर
दीचायनांशास्तु दशसंख्या। तथा चाशकोवसुदस्यं ३ वर चंद्र१ हीनइति १३ अथसंक्रांतिमासस्याधिमाससंज्ञाद्युत विलंबेनाह॥
सवितृमंडलेति। यदामावास्यासमये एवं संक्रांतिर्भवति अन्याचापरमासप्रतिपद्दिने तदा संक्रान्त्यभावादधिष्ठोमासः। यद्वा खेकाप्रति

सवितृमंडलमेति यदा शशी तदनु संक्रमणं कुरुते रविः मरमहंतोत्सवनाशकरस्तदा मुनिवरैः कथितोधि
कमासकः १४ यादृशेन हिमरश्मिमालिना संक्रमो भवति तिग्मरोचिषा तादृशं फलमवाप्नुयान्नरः साध्वसाध्व
पिवशेन शीतगोः॥ १५॥ यदि॥ अन्यात स्येवामावास्यायां॥ तदाहीनमासः॥ स च कार्त्तिकमार्गशीर्षपौषाणां मध्ये भवति॥ त
था च भास्करसिद्धांते॥ असंक्रांतिमासोधिमासः स्फुटः स्याद्द्विसंक्रांतिमासः क्षयरव्याः कदाचित्। क्षयः कार्त्तिकादित्रये नान्यतस्या
त्तदा वर्षमध्येधिमासद्वयं च। फलं चरतत्कोशत्। प्रायशो न शुभः सौम्याज्येष्ठ श्रावाषाढ एव च॥ मध्यमो चैत्रवैशाखावधिकाऽन्यः
सुभिक्षकृत् १४ अथ चंद्रबले संक्रांतिबलं श्लोकद्वयेनाह। यादृशेति। यादृशेन चंद्रेणामो चरविधिना जन्मराशेः शुभेनाशुभेन वार
विसंक्रांतिर्भवति संक्रांतिमासः शुभेन च ~ द्रमसा शुभः। अशुभेनाशुभः। एतेन सूर्ये द्वादशाष्टगेपि शुभ चंद्रबलजातः संक्रमो भवति १५

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ननु चंद्रबलात्संक्रांतिबलमुक्तं चंद्रबलं त्वन्यस्माद्बलमस्तीत्याह॥ ताराबलेति। ताराबले सति चंद्रोऽशुभोपि शुभः
स्यात्। चंद्रे गोचरेणाशुभे संक्रांतिगः सूर्योपि शुभः सूर्येऽनुकूले सर्वेपि ग्रहाः भौमादयोऽनुकूला भवंति। ताराब
ले पुनरशुभेव स्यात्। एतेन सर्वत्र चंद्रबलं प्रधानं चंद्रबलात्ताराबलमिति १६ इति महादेवविरचिते रत्नमालाविवरणे
संक्रांतिप्रकरणं नवमं ९ तत्र जन्मराशेर्ग्रहाणां यच्छुभाशुभफलं तत्प्रत्यासन्नमेव न स्फुटं। प्रायेण गोचरोक्तमेव

ताराबलादिंदुरथेंदुवीर्याद्दिवाकरः संक्रममाणऋक्षः ग्रहाश्च सर्वेपि बलेन भानोर्भवंत्यशस्ताअ
पि सुप्रशस्ताः १६ इति श्रीसंक्रांतिप्रकरणम् ९ सर्वे लाभगृह ११ स्थितास्त्रि ३ ख १० रिपु ६ स्वर्के कुजार्कौ त्रि ३
षट् ६ प्राप्तौ त्र्या ३ द्या १ ख १० मन्मथा ७ रि ६ षु शशी ख १० स्ता ७ रि ६ वर्ज्जं भृगुः। धी ५ धर्मौ ९ स्त ७ धनेषु २ वाक्प
तिररि ६ स्वाष्टां २ ८ बुध्यखस्थे १० बुधः श्रेष्ठो जन्मगृहादिगोचरविधौ विद्धो न चेत्स्याद्ग्रहैः॥१॥ ॥

हार्ष्योर्णान्नफलानि वस्वामिना नाहुनैस्तन्नो मुखं च फल त्वं समं लयाँ इति वराहो ― क्तत्वात्। तत्रादौ जन्मराशेर्यो
ग्रहो यावद्राशिस्थितः शुभो भवति तं शार्दूले नाह। सर्वे इति। जन्मराशेरेकादशस्थाः सर्वेपि ग्रहाः शुभफलदाः। त्रि
दशायषट्सु रविः शुभः। भौमशनी त्रिषष्टप्राप्तौ त्रिषष्ठगतौ॥ त्रिजन्मदशसप्तषष्ठेषु चंद्रः दशसप्तषष्ठवर्ज्जं भृगुः।
पंचमनवमसप्तद्वयेषु गुरुः। षड्स्वाष्टचतुर्थदशमगो बुधः श्रेष्ठः यद्यपरैर्न विद्धः स्यात्। तदा सर्वे ग्रहाः शुभा इति

रविः	[illegible]	[illegible]
चंद्रः	[illegible]	[illegible]
कं	[illegible]	[illegible]
कं	[illegible]	[illegible]

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ सूर्यस्य श्रेष्ठत्वं वेधं च रथोद्धतयाह। लाभेति। एकादशत्रिषट्स्थानस्थो रविर्जन्मराशेः श्रेष्ठः यद्यपरैर्ग्रहैर्यथासंख्यं जन्मराशेः पं-
चमनवमचतुर्थद्वादशगैर्व्योमकिंभिः शनिरहितैर्न विध्यते। विद्धस्तु यत्र स्थाने ग्रहेण विद्धस्तत्रात्यंतफलं ददाति २ अथ चंद्रस्य श्रेष्ठत्वं
वेधं च रथोद्धतयाह। द्यूनेति। सप्तएकषडेकादशत्रिस्थो हि पंचद्वादशाष्टमचतुर्थनवमगैर्बुधवर्जितैरविद्धो भव्यः ३ अथ भौमशन्योः श्रे-

लाभ ११ विक्रम ३ ख १० शत्रुषु ६ स्थितः शोभनो निगदितो दिवाकरः। खेचरैः सुत ५ तपो ९ जलां ४ त्यगैर्व्योमकिं-
भिर्यदि न विध्यते नदा २ द्यून ७ जन्म १ रिपु ६ लाभ ११ ख १० त्रि ३ गश्चंद्रमाः शुभफलप्रदस्तदा। सा २ त्मजा ५ न्त्य
१२ मृति ८ बंध ४ धर्म ९ गैर्विध्यते न विबुधैर्यदि ग्रहैः ३। विक्रमा ३ य ११ रिपुगः ६ शुभः कुजःसान्तदोन्त्य १२ सु-
त ५ धर्म ९ गैः ख १० गैः। चेन्न विद्ध इनसुनुरप्यसौ किंतु धर्मघृणिना न विध्यते ४ स्वां २ बु ४ शत्रु ६ मृति ८ खा १०
यगः शुभो नस्तदा न खलु विध्यते यदा आत्मज ५ त्रि ३ नवमा ९ य ११ नैधनैः ८ प्रान्त्यगो १२ र्विविधुभिर्न भश्च-
रैः ५ स्वा २ य ११ धर्म ९ तनपा ५ द्यून ७ स्थितो नाकनायकपुरोहितः शुभः॥ ष्ठत्वं वेधं चाह। विक्रमेति। त्र्येकादशषष्ठे-

ष्ठु भौमो द्वादशपंचनवमगैरविद्धः शुभः। इनसूनुरपि शनिरपि त्र्येकादशषष्ठेषु भौमस्थानेषु स्थितः शुभः। धर्मघृणिना उ ष्मरोन्विषारवि-
णा द्वादशपंचनवमगैरविद्धः ते. ४ अथ बुधस्य श्रेष्ठत्वं वेधं चाह। स्वा बुद्धीति। द्विचतुःषडष्टदशैकादशगः पंचत्रिनवमायाष्टद्वादशगैश्चंद्रव-

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वनेति। द्व्येकादशनवमपंचमसप्तगोः द्वादशाष्टमदशमचतुर्थगैरविद्धो —— गुरुः शुभः ६ अथ शुक्रस्याप्येषु स्थानेषु वेधं चाह। आसुनेति। जन्मद्वि
त्रिचतुःपंचाष्टनवमद्वादशैकादशगोऽष्टसप्तायदशनवमपंचैकादशषष्ठत्रिगैर्ग्रहैरविद्धः शुक्रः शुभः। एषां लाभविक्रमेन्धादिनाश्रेषु स्थलेषु उक्तेऽपि
पुनरपि विधानं वेधप्रतिपादनार्थं ७ अथ विद्धानामशुभफलत्वं वामवेधेन शुभफलं च रयोद्धतयाह। एवमन्त्रेति। वामवेधस्तु सूर्यः पंच

विष्फ १२ रंध्र ८ ख १० जलध त्रिगै ३ र्यदा विद्धो न गगनचारिभिर्न हि ६ आरसुरनाथ ष ५ म ८ नयो ९ व्यया १२ प
११ गो विद्ध आस्फुजिद् शोभनस्मृतः नै ८ धना ७ स्तन १ तुक १० र्मधर्म ५ धीलाभ ११ वै ६ रिस ३ हजस्थ खेचरैः ७ एव
मत्र खचराव्यधान्विधाः सत्फलं न हि दिशंति गोचरे वामवेधविधिनात्वशोभना अप्यमी शुभफलं दिशंत्यलं ८ ये
वदंति खचरव्यधक्रमं नो ग्रहः क्रमविदो हि गोचरे। ते मृषावचनभाषिणो जना यांति हास्यमपकीर्तिलांछिताः
। ९ यो वसिष्ठयवनादिसूरिभिर्भाषितः खचरगोचरव्यधः। गोपनीयरहदैववेदिनः प्रस्फुटं स च मया प्रकाशितः॥
१० रविरुपचयेष्विंदुस्त्वाद्यस्मरे षु कुजार्कजौ विदशसुरगुरुर्यूनस्वायत्रिकोणगृहास्थितः॥ ७॥ ९॥

मनवमचतुर्थद्वादशगोऽपि·एकादशत्रिदशषष्ठगैर्ग्रहैर्विद्धो निंद्यः यत्र स्थेन ग्रहेण विद्धस्तस्य स्थानस्य फलं दत्तानीत्यर्थः ८ अथ वेधं वामच
येन जानंति तेषां दोषमाह। येवदंतीति — ज्योतिर्विदो ग्रहक्रमं ग्रहपरिपाटीं जानंति। खचरवेधक्रमं ग्रहवेधपरिपाटीं नो जानंति। जन्मराशेरसु
कस्थाने युक्तो ग्रहः शुभ इति न जानंति। अपकीर्तियुक्ता उपहासं यांति ९ अथ वेधप्रशंसां रथोद्धतयाह। यो वसिष्ठेति। सुगमं १० अथ वेधं विनाये ३८

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रविरुपचयेष्विति। रविरुपचयेषु त्रिषड्दशैकादशेषु शुभः। इन्दुश्चाद्यसप्तमसहितेषूपचयेषु। भौमार्कीमंगलशनी दशमवर्जितेषूपचयेषु
। गुरुः सप्तद्व्येकादशनवपंचस्थितः शुक्रः सप्तषड्दशमवर्ज्जेशेषस्थानेषु शुभः। बुधो द्वादशरहितेषु समस्थानेषु एकादशे च बुधः शुभः खलु नि
श्चये। जन्मलग्नादप्येवं तेषु शुभाः। गोचरानु शुभ एव ११ अथ पूर्वोक्तविधिना यो ग्रहो विरुद्धः स चेत्सौम्यग्रहदृष्टस्तदा निःफलः अन्योपि।
पापग्रहदृष्टो विरुद्धफलः यश्च शत्रुदृष्टः सोपि निःफल इत्युपजात्याह। असत्फल इति। दृष्टिजानकोक्ता। त्रिदश ३।१० त्रिकोण ९।५ चतु
रस्र ४।८ सप्तमा ७ न्यवलोकयन्ति चरणाभिवृद्धितः। रविजामरेज्यरुधिराः परे च ये क्रमशो भवन्ति किलवीक्षणेऽधिकाइति १२ अथ नीचस्थे

स्मररिपु विपद्धर्ज्जे शुक्रो बुधो व्ययवर्ज्जितेष्व विषमगृहे पापे चोक्तः शुभः खलु गोचरे ११ असत्फलः सौम्य
निरीक्षितोपः शुभप्रदश्चाप्यशुभेक्षितश्च तौ निःफलौ द्वावपि खेचरेन्द्रौ यः शत्रुणा स्वेन निरीक्षितश्च॥१२
। स्वनीचगोऽस्तगोपि वारिपोर्गृहे स्थितो ग्रहः वृथा फलप्रकीर्तितं समस्तमेव सूरिभिः॥ १३॥ सूर्यवशादस्तगे
च शत्रुक्षेत्रस्थे च ग्रहे न किंचित्फलं भवतीति प्रमाणिकयाह। स्वनीचगेति। आत्मीयनीचस्थानस्थे ग्रहे तथास्तमिते ग्रहे शत्रुक्षेत्रस्थे
च ग्रहे समस्तफलं शुभमशुभं वा निःफलं वा भवति। नीचसंज्ञा जातकात्। अजवृषमृगांगनाकर्किमीनवनिजांशकेष्विनाद्युच्चाः। दश।
शिख्यष्टाविंशतितिथींद्रियत्रिघनविंशेषु। उच्चान्नीचं सप्तममिति। शत्रुमित्रसमा जातकोक्ता। तथा च। शत्रू मंदसितौ समश्च शशिजो मि
त्राणि शेषा रवेस्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः। जीवेन्दूष्णकराः कुजस्य सुहृदो ज्ञोरिः सितार्की समौ मित्रे सूर्यसितौ बु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र.मा. टी. ३९ सूरेः सौम्यसितावरी रविसुतो मध्योपरेत्वन्यथा सौम्यार्कौ सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी । शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्येरयो ये
प्रोक्ताः स्वत्रिकोणभादिषु पुनस्तेऽमी मया कीर्तिताः ॥ २ ॥ १३ ॥ रवेः शनिसितौ शत्रू भवतः ॥ बुधः समो भवति । शेषा बृहस्पतिचंद्रमंगलरा-
केतवो मित्रा भवंति १ शीतगोः सूर्यबुधश्च सुहृदौ । मंगलबृहस्पतिशुक्रशनिराहुकेतवः समाः २ कुजस्य जीवेंदुसूर्या एते मित्राः । बुधः
शत्रुः । शुक्रशनी समौ १३ ॥ बुधस्य सूर्यशुक्रौ मित्रौ । चंद्रः शत्रुः ॥ मंगलगुरुशनिराहुकेतवः समाः ॥ ४ ॥ जीवस्य बुधशुक्रौ शत्रू । शनिम-
ध्यमः ॥ मंगलचंद्रसूर्या मित्राणि १५ शुक्रस्य शनिबुधौ सुहृदौ । कुजगुरू समौ ॥ चंद्रमंगलराहुकेतवः शत्रवो भवंति ६ ॥ सौरस्य बुध-

विकालचर्या मृगया च साहसं सुदूरयानं गजवाजिवाहनं । गृहे परेषां गमनं च वर्ज्जयेद्ग्रहेषु राज्ञा विपक्षि-
तेष्विह १४ धार्यं त्रुष्टौ विद्रुमं भौमभान्वोः रौप्यं शुक्रेंद्वोश्च हेमेंदुजस्य । मुक्ता सुरेज्ये हमर्कात्मजस्य राजावर्त्तः किति-
तः शेषयोश्च १५ ॥

शुक्रौ सुहृदौ ॥ गुरुः समः ॥ आदित्यचंद्रमंगलराहुकेतवः एते ग्रहाः शत्रवः ॥ ७ ॥ अथ विरुद्धेषु ग्रहेषु रा-
ज्ञा यत्न कार्यं तदृशस्येनाह ॥ विकालचर्येति । विकालरात्र्यादौ भ्रमणं ॥ साहसं न्मशकाकर्म ॥ परेषां शत्रूणां गृहे गमनं ॥ प्रतिकूले ग्रहे व-
र्जयेत् ॥ राज्ञे सुपलक्षणं अन्येनापि सुखिनेन हूर्जमिति ॥ १४ ॥ अथ दुष्टस्य विकालचर्यादिव्यतिरेकेन जीवनासंभवे विद्रुमरू-
प्यहेममौक्तिकराजावर्त्तैः पंचभिः पंचरत्नधारणं कार्यं शालिन्याह ॥ धार्यमिति ॥ विद्रुमप्रवाले राजावर्त्तो रावटोमणिः ॥ १५ ॥ रम. ३९

॥ १५ ॥ श्री ॥ ० श्री ॥ ०

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ सुरितनामपि नवग्रहनिर्मितस्य कंकणस्य धारणं शार्दूलेनाह। माणिक्यमिति। रवेः प्रीत्यै माणिक्यं धार्यं चंद्रस्य मुक्ता भौमस्य वि-
द्रुमं सौम्यस्य मर्कतं गुरोर्गारुत्मकं शुक्रस्य पुष्परागं। शनेर्निर्मलं नीलं॥ राहोर्गोमेदो मणिः केतोर्वैडूर्यमणिः॥ रत्नानि प्रसिद्धान्येव। न
नु सप्तानां ग्रहाणां शुभाशुभफलमुक्तं। दिनमासवर्षहोराधिपत्यं चैषामेवोक्तं॥ कथं राहुकेत्वोर्ग्रहत्वं॥ ग्रहत्वे च प्रतिकूल्याकथनात्त-
र्थं गोमेदवैडूर्यधारणं राजावर्त्तधारणं धारणं च प्रीत्यर्थमुक्तं। तयोः प्रतिकूल्याकथनात्। उच्यते। राहुकेत्वोर्ग्रह—त्वमस्त्येव। तयो-
श्च दिनाधिपत्याभावान्नात्रोदाहरणं। यत्र नक्षत्रे ग्रहणं स्यात्तत्रैव षण्मासात् राहुरिति केतुश्च यत्र दृश्यते तत्रैव षण्मासमिति॥ तथा चो-

माणिक्यं तरणेः सुजात्यममलं मुक्ताफलं शीतगोर्माहेयस्य च विद्रुमं मरकतं सौम्यस्य गारुत्मकं। देवेज्यस्य च पुष्प-
रागमसुराचार्यस्य वज्रं शनेर्नीलं निर्मलमन्ययोश्च गदिते गोमेदवैडूर्यकं १६ मनःशिलैलासुरदारुकुंकुमै-
रुशीरयष्टीमधुपद्मकान्वितैः सतारपुष्पैर्विषमस्थिते रवौ शुभावहं स्नानमुदाहृतं बुधैः॥ १७॥ १७॥

क्तं। यत्रैव धिष्ण्ये ग्रहणं रवीन्द्वोस्तत्रैव षण्मासमशुभं तु राहुम्॥ केतुश्च यस्मिन्नुदयं प्रयाति शुभेषु कार्येषु च तं हि वर्ज्यं प्रतिकूल्यं च प्रथ-
मचतुर्थाष्टमद्वादशेषु॥ उपचयेषु शुभत्वं। शेषेषु मध्यमत्वं २।५।७।९॥ शांतिकं चैतयोः समधिदक्षिणाश्च वस्त्राणि १६ अथ विषमस्थे
रवौ शुभार्थं स्नानं वंशस्थेनाह। मनःशिलेति। मनःशिला प्रसिद्धा। एला एलाची। सुरदारु देवदारु। उशीरं कत्तरा। यष्टी यष्टिमधु। नामसु-
ध्यं। करवीरस्य सूर्यपूजायां च सिद्धोक्तत्वात्। शेषं प्रसिद्धमेतानि मिश्रजलमध्ये निक्षिप्य वैदिकमंत्रैः स्नानं कार्यं ग्रहपूजा च रविवारे कुर्या-

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ विषमस्थे चंद्रे स्नानं स्वागतयाह। पंचगव्येति। शंखः शुक्तिः प्रसिद्धे। कुमुदं कुमुदपुष्पं स्फटिकं प्रसिद्धं। एतैः पंचगजमदजलसहितैः स्नानं चंद्रपीडाशमनं। पंचगव्येति। कृष्णायाः सुरभेर्गोमयं। नीलायाः मूत्रं कपिलायाः घृतं श्वेतायाः दधि। ताम्रायाः दुग्धमाहरेत्। १८ अथ भौमे विषमस्थे स्नानमाह। विल्वेचंदनेति। विल्वविल्वफलं। चंदनं रक्तचंदनं। वला वरिआरइति प्रसिद्धा। अरुणपुष्पं जपापुष्पं। वसिष्ठात्कत्वात् हिंगुलकः इंगुलइति प्रसिद्धः। फलिनी प्रियंगुः। मसी जटामासी १९ अथ विरुद्धे बुधे स्नानमाह। गोमयेति। गोमयं प्रसिद्धः

पंचगव्यगजदानविमिश्रैः शंखशुक्तिकुमुदस्फटिकैश्च। शीतरश्मिकृतवैकृतहंतृ स्नानमेतदुदितं नृपतीनां॥

१८ विल्वचंदनवलारुणपुष्पैर्हिंगुलूकफलिनीवकुलैश्च। स्नानमद्भिरिह मांसियुताभिर्भौमदोषविनिवारणमाहुः १९ गोमयाक्षतफलैः सरोचनैः सौद्रशुक्तिभवमूलहेमभिः। स्नानमुक्तमिदमत्र भूभृतां बोधनाशुभविनाशनं बुधे २० मालतीकुसुमशुभ्रशर्षपैः पल्लवैश्च मदयंतिकोद्भवैः। मिश्रमंबु मधुकेन च स्फुटं वैकृतं गुरुकृतं निकृंतति २१ एलया च शिलया समन्वितैर्वारिभिः सफलमूलकुंकुमैः स्नानतो भृगुसुतोप्सदोषितं दुःखमेति विलयं न संशयः २२॥

॥अक्षताः यवाः। यद्यपि सामान्येनोक्तं फलं मूलं च तथापि नागरंगस्यैव। वासिषु शांतिके कथितत्वात्। हेमं सुवर्णं। रोचना गोरोचना। शुक्तिभवं मौक्तिकं। सौद्रं मधु २० अथ विषमस्थे गुरौ स्नानमाह। मालतीति। मालतीकुसुमजातीपुष्पं शुभ्रशर्षपः श्वेतशर्षपः। मदयंतीपल्लवैर्विकसितपल्लवैः। मधुकं यष्टीमधु २१ अथ शुक्रे विषमस्थे स्नानमाह। एलया चेति। शिलाम॰

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ विषमस्थे शनौ स्नानं नामरसेनाह। असितेति तिलामिति। असिततिलाः कृष्णतिलाः। अंजनं सौवीरांजनं। वला प्रसिद्धा। शतकुसुम सोंफ इति प्रसिद्धा। घनं मुस्तं। लाजा भ्रष्टव्रीहयः २३ राहुकेतुस्नानं भास्करव्यवहारे। तथा च। लोध्रगर्भतिलपत्रकमुस्ताहस्तिदानमृगनाभिपयोभिः स्नानमाज्ञिमपसेधति राहोः। साजमूत्रमिदमेव च केतोः। सप्रियंगुरजनीहयमांसिकुष्ठलाजसितशर्षपचंदैः। वारिभिः सह वचैः सहलोध्रैः स्नानमंति निखिलैर्ग्रहपीडामिति। चांडेलाबहुकोटरेतिप्रसिद्धः॥ अनिनाशयति। सूर्यप्रभृतिग्रहपीडामथ स्नानेन दुः

असिततिलांजनलोध्रवलाभिः शतकुसुमाघनलाजयुताभिः। रवितनयेकथितं विषमस्थे दुरितहृत्ताप्लवनं
मुनिमुख्यैः २३ सदौषधैर्यो तिगदाविनाशं यथा यथा दुःखभयानि मंत्रैः। तथोदितस्नानविधानतोपिग्रहा
शुभं नाशमुपैति वश्यं २४ अर्को ब्राह्ममहीरुहा खदिरतोपामार्गतोपिप्पलादार्द्रौदुंवरशाखिनोप्यथशमी
दूर्वाकुशेभ्यः क्रमात्। सूर्यादिग्रहमंडलस्य समिधो होमाय कार्या बुधैः सुस्निग्धाः सरलास्त्वचाविनिर्वित्ताः प्रादेश
मात्राः शुभाः २५॥ धेनुः शंखोरुणरुचिवृषः कांचनं पीतवस्त्रं श्वेतश्चाश्वः सुरभिरसिता कृष्णलोहं महाजा॥

स्वोपशमनमुक्तं तस्य दृष्टांतमुपेन्द्रवज्रेणाह। सदौषधैरिति। पुस्तके तु शनौषधैरिति स्थितं। सदौषधैरुत्तमौषधैः यथा रोगा विनश्यंति। यथा च मंत्रैः सद्गुरूपदिष्टैः दुःखानि भयानि च यांति। तथोक्तस्नानतो ग्रहपीडापि शाम्यति २४ अथ सूर्यादिग्रहानुकूलार्थं नाना वृक्षोद्भवाः समिधः शांतिकहोमोपयोग्यः शार्दूलेनाह। अर्कोदिति। आर्द्रौदुंवरस्तु पलक्षणं अन्येषामपि समिधः आर्द्रमेव। ब्राह्ममहीरुह पालाश २५ अ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धेनुरिति। स्नानाद्यैः पूर्वोक्तैः २६ अथ यथाकरणाद्ग्रहास्तुष्यंति पीडां च न कुर्वंति तदाह। देवब्राह्मणेति। गुरुः पीता अध्यापको देवस्य श्रुतिर्वेदो वेदध्वनिः श्रेयःकथा पुण्यकथा भारतादि। मंत्राणां जपात्। गायत्र्याश्च। एवंविधं कर्म कुर्वतः पुरुषस्य ग्रहाः पीडां न कुर्वंति २७ इति श्रीमहादेवविरचितरत्नमालाविवरणे गोचरप्रकरणं दशमं १० पूर्वंतावत्सर्वेग्रहाश्चेद्बलाद्बलिनश्चेदश्वताराबलाह

सूर्यादीनां मुनिभिरुचिता दक्षिणास्तु ग्रहाणां स्नानैर्दानैर्हवनबलिभिस्ते च तुष्यंति यस्मात् २६ देवब्राह्मणवंदनाद्गुरुवचःसंपादनात्प्रत्यहं साधूनामभिभाषणाच्छ्रुतिवचःश्रेयःकथाकर्णनात्। होमादध्वरदर्शनाच्छुचिमनोभावाज्जपाद्दानतो नो कुर्वंति कदाचिदेव पुरुषस्यैवं ग्रहाः पीडनं २७ इति गोचरप्रकरणम् १० रविर्नृपावलोकने सुरगुरुर्विवाहोत्सवे रणे धरणीनंदनो भृगुसुतः प्रयाणे बली शनिश्चरखलुदीक्षणे निखिलशास्त्रबोधे बुधः शशी सकलकर्मसु ध्रुवमुदाहृतः सूरिभिः ३ बलसपक्षादिगते हिमांशौ शुभेऽशुभं पक्षमुदाहरंति। सिते तु रात्रावशुभे शुभं च पक्षावनिष्टौ भवतोऽन्यथा तौ २ ॥

॥ बलवानित्युक्तं। अतस्ताराप्रकरणमारभ्यते। तत्रादावेव चंद्रस्य सर्वकर्मप्राधान्यं वक्तुं शेषग्रहाणां च येषु कर्मसु बलं तत्पृथक्पृथगाह। यो यस्य स्वामी स तस्य नृपस्य दर्शने रविः सूर्यः। गोचराद्बलवान् शुभः। चंद्रबलं सर्वत्रान्वेषणीयं। एषां वारेषु कालहोरादौ अनुकूले कार्यसिद्धिः १ अथ शुक्लप्रतिपदा चेद्गोचरेणाशुभे पक्षस्याशुभत्वं कृष्णप्रतिपदि गोचरे शुभे चेत्कृष्णपक्षस्याशुभत्वं चोपजायते तदाह। बलसेति। बलसंज्ञः शुक्लपक्षः। तत्रस्थे चंद्रे गोचरेणाशुभे सकलोऽपि पक्षः शुभः। सिते

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिपदिन्याशुभे चंद्रे सकलोपि पक्षः शुभः। अन्यथा विपरीतं शुक्लादावशुभे कृष्णादौ शुभे पक्षद्वयमप्यशुभमिति २ अथ शुक्लपक्षे च
द्रस्य फलविशेषेणारथ्यो ऽनयाह। गोचरेणेति। देवमंत्रिगुरुयो दृष्टो द्विपंचनवमगोचे धवामवेधाभ्यां रहितः शुभस्ता दृशो वर्द्धमानस्त
नुः शुक्लपक्षे चंद्र इति ३ अथ जन्मनक्षत्रान्नवसंख्याकानां ताराणां नामान्याह। जन्माह्वयेति। जन्मनक्षत्रात्प्रथमं जन्मतारा नवमी
अतिमैत्रा। एवं पुनर्दशमीजन्माह्वया। जन्मनक्षत्रात्त्रिर्वारं पंचसप्तताराववर्ज्याः। जन्मतारानुक्षारतारावर्ज्जं सर्वत्र शुभः। हित्वासैरं
थायात्रां जन्मताराशुभावहाः इति देवज्ञवल्लभोक्तत्वात्। पुनः लल्लेन सविस्तारमुक्तं यथा जन्मर्क्षं संपत्स्मिंश्च द्वयुते भवति जन्म

गोचरेणनवमो द्वितीयगः पंचमोपि शुभकृन्निशाकरः। वर्द्धमानतनुरिष्यते बुधैः वेदमंत्रिशाहशः फलेनसः

।३ जन्माह्वयासंपदत्तो विपच्च क्षेमा च पापा च शुभा च कष्टाः। मैत्रातिमैत्रेतिन वैवताराः स्युर्ज्जन्मभात्त्रिः परि

वर्त्तनेन ४।

सत्वानो। तस्माद्दशमं कर्माधानं चैकोविंशः स्यात्। संपत्करं द्वितीयं विंशं चैकादशं परिज्ञेयं। भं — द्वादशं तृतीयं विपत्क
रं चैकविंशः च स्यात्। क्षेमकरं चतुर्थं त्रयोदशं द्वाधिकविंशमपि चाद्यात्। पंचमचतुर्दशे द्वे प्रत्यरिभे सत्रयोविंशे। षष्ठंस चतुर्विंशं पं
चमाधानं परिज्ञेयं। षोडशं सप्तममृक्षं नैधनं पंचविंशं। जन्मसंवदाधानं कर्मसु शस्तेशस्तं स्यात्। यच्च जन्मनिकार्यं विवर्ज्जनीयं तदाधा
ने। संपत्करं क्षेमकसाधकेषु मैत्रातिमैत्रे च कृते च कर्म। सर्वेनृणां निःफलमेवमेषु विंयान्कृतेपि कर्त्तुमेशुभंहि किंचिन्नैधनाधान
जन्मसंप्रत्यरिसविपत्करे। यस्य व्याधिः समागच्छेत्तत्क्लेशं मरणं च। ताराखथ च शेषासु व्याधिविनाशो भवति यतः। व्याधिवधवद्दो

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ताराबलं चन्द्र कृष्णपक्षे विलोक्यमित्यर्थे हेतुमाह। न खल्विति सुगमं ५ अथ शुक्लपक्षे कथं न ताराबलमित्याशंक्याह। शुक्ल इति सुगमं ६ अधिराशि किंचिदधिके कादशप्रमाणस्य चन्द्रस्य द्वादशावस्थाः स्वसंज्ञासमानफलाश्शालिन्याह। राशाविति। केश्चिदिति परमतं सप्रतिषिद्धमनुमतमिति न्यायात्स्वमतेऽपि ज्ञातव्याः ७ अथासां नामान्युपजात्याह। प्रवासेति। द्विषट्कसंज्ञाः द्वादशनाम्न्यः यात्रादौ चैता अवस्था विलोकनीयाः। एताः पुनर्मेषराशिप्रभृतिषु यथासंख्यं भवन्ति। यथा मेषराशौ प्रोषितास्या। वृषराशौ नष्टास्या इति। तथा च तिलक

न खलु बहुलपक्षे शीतरश्मेः प्रभावः कथितमिह हि ताराबीर्यमार्यैः प्रधानं। अतिविकलशरीरे प्रेयसि प्रोषिते च प्रभवति खलु कर्तुं सर्वकार्याणि योषा ५ शुक्ले पक्षे शीतरश्मिर्वलीयान् प्राधान्यं तारकायास्तु तत्रा। श। तयायुक्ते विद्यमाने च कान्ते न स्वातन्त्र्यं योषितः क्वापि दृष्टं ६ राशौ राशौ द्वादशैतेऽवस्थाः प्रोक्ताः केश्चित्सूरिभिः प्रोषिताद्या यात्रोद्वाहाद्येषु कार्येषु नूनं संज्ञातुल्यं तत्फलं चिन्तनीयं ७ प्रवासनष्टास्यमृता जयाख्या हास्या रतिः क्रीडितसुप्तभुक्ताः। ज्वराह्वयाकंपितसुस्थिते च द्विषट्कसंज्ञामिह गोचरस्थाः ८॥ ॥८॥

व्यवहारे। मेषे तु प्रोषितां विंद्याद्वृषे नष्टां विनिर्दिशेत्। मिथुने तु मृतां ज्ञेयां जयां कर्किणि निर्दिशेत्। हास्यां सिंहे रतिं नार्यां क्रीडितां तुल एव च। जानीयाद्वृश्चिके सुप्तां भुक्तां धनुषि निर्दिशेत्। ज्वरितां मकरे ज्ञेया कंपितां कुंभ एव च। विद्यात्सुस्थितां मीने द्वादशावस्थिकं फलं। स्वसंज्ञासदृशं प्रोक्तं शुभकार्येषु सूरिभिः। अश्वादिभुक्तोडुघटीसमूहो वेदाब्धिहतो वाणसमुद्रभक्ताः लब्धार्कशेषे शशिनि क्रियाद्या भवंत्यवस्था ४२

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रवासे च प्रवासी स्यान्नष्टे हानी च जायते॥ मृतावस्थेन चंद्रेण गतस्समरणं भवेत्॥ जयावस्थेन चंद्रेण गतो राजा रिहा भवेत्। क्रीडावस्थे भवे-
त्क्रीडासुप्ते शोकं विनिर्दिशेत्। भुक्तावस्थेन चंद्रेण सौख्यं भोगमवाप्नुयात्। ज्वरिते ज्वरितं विद्यात्कंपिते कंपएव चा सुस्थिते सुस्थि-
तः कर्ता चंद्रः सर्वार्थसाधकः। इत्यपि त्रिविक्रमोक्तं ज्ञेयं ८ इति श्रीमहादेवविरचिते रत्नमालाविवरणे तारा प्रकरणं ११ एवं दिन
मासमुहूर्तानां फलमभिधायावसरप्राप्तस्य लग्नस्य प्रकरणमारभ्यते। तत्र मेषलग्नकृत्यमाह। विरोधश्चेति विरोधः कलहः। अभि-
षेको राज्ञः। साहसमशक्यं कर्म। धातुसंबंधो धातुवादादिना स्वर्णादिघटनं वा। आकरसंबंधो रत्नाकरादिसंबंधः। तेषां संबंधो मेषल

इति ताराप्रकरणम् ११ विरोधश्चाभिषेकश्च राज्ञां साहसकर्म च। धात्वाकरादिसंबंधो मेषलग्ने प्रसिध्यति १
वृषोदये विवाहश्च ध्रुवं वेश्मप्रवेशनं। कुमारीवरणं दानं क्षेत्रारंभादि चेष्यते २ कलाविज्ञानसंबंधो वृषल-
ग्नोदिते च यत् विभूषणादिकं कर्म तद्व्यमिथुनोदये ३॥ ग्ने सिद्ध्यति। आदिग्रहणाद्विजयाधिककूटकर्म संग्रामाः
तथा च भीमपराक्रमे। अभिषेकसमरसाहसविजयाधिककूटकर्माणि। मेषोदये विरोधं च धात्वाकारकर्म च विदध्यात् १ अथ वृषलग्न-
कृत्यमाह। वृषोदयेइति। वृषोदये वृषलग्ने ध्रुवं ध्रुवकार्यं। दानमर्पणमेव। आदिग्रहणात्पशुकर्मादि। तथा च भास्करव्यवहारे कन्या च वर-
णं दानं कृष्युद्वाहमखाः कृषिः। धर्मगृहप्रवेशाय पराणपमरकर्म च २ अथ मिथुनलग्नकृत्यमाह। कलाइति। कला गीतादिका तासु ज्ञप्तिः
विज्ञानं विशिष्टज्ञानं। संबंधः स्त्रीपुंसः। आदिग्रहणात्कामोपयोगिवस्तुगणितधातूनि। तथा च भास्करः। कलागणितविज्ञाने धातुकर्मादिभू-

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

अथैषां लग्नानां कृत्यविशेषमाह। शुद्धेष्विति। शुद्धेषु केवलेषु शुभग्रहयुतदृष्टेषु वा १३ अथ षड्वर्गमाह। विलग्नेति। लग्नं मेषादि। होरा राश्यर्द्धं। द्रेष्काणो राशित्रिभागः राशेरेव। नवद्वादशत्रिंशद्विभागाः नवांशद्वादशांशत्रिंशांशाः। तत्र मेषादिराश्यधिपतयो भौमशुक्रबुधचन्द्ररविबुधशुक्रभौमगुरुशनिसौरिगुरवः। होरा तु विषमे राशौ रविचंद्रयोः समराशौ चंद्रसूर्ययोः। द्रेष्काणास्तु प्रथमे लग्नाधिपतिः स्वामी द्वितीये लग्नात्पंचमाधिपस्य। तृतीये लग्नान्नवमाधिपस्य स्वामित्वं। मेषसिंहधनुर्नवांशानां मेषादिनवराशीनां स्वामिन एव नाथाः। वृषकन्यामकराणां मकराद्या नाथाः मिथुनतुलाकुंभानां तुलाद्या नाथाः कर्कवृश्चिकमीनानां कर्काद्या नाथाः स्वं

शुद्धेषु मेषाद्युदयेषु कर्माण्येतानि सिद्ध्यन्ति यथोदितानि। क्रूरग्रहालोकनयोगदुष्टेष्वेतेषु कर्मादिनमुग्रमेव १३ विलग्नहोराद्रेष्काणनवांशद्वादशांशकाः त्रिंशांशकश्चेति षड्वर्गः ससौम्यग्रहजः शुभः॥ १४ ॥ ॥

नवराशिनाथाः द्वादशांशाधिपतयस्तु लग्नादि द्वादशराश्यधिपतयः त्रिंशांशानां विषमराशौ प्रथमपंचमांशानां भौमः। तदनंतरं पंचानां शनिः। ततोऽष्टानां गुरुः ततः सप्तानां बुधः। ततोऽन्तिमानां पंचमांशानां शुक्रः। समराशौ वैपरीत्येन॥ तथा च लघुजातके। कुजशुक्रज्ञेन्दुर्कज्ञशुक्रकुजजीवसौरीयमगुरवः। भेशाः नवांशकानामजमकरतुलाकुलीराद्याः। स्वगृहाद्द्वादशभागा द्रेष्काणाः प्रथमपंचनवमानां। होरे विषमेऽर्केन्द्वोः समराशौ चंद्रतीक्ष्णांश्वोः। कुजयमजीवज्ञसिताः पंचेन्द्रियवसुमुनीन्द्रियांशानां। विषमेषु समर्क्षेषूत्क्रमशस्त्रिंशांशकाः कल्प्याः। एवं सति यो लग्नाधिपतिस्तस्य षड्वर्गोऽन्यस्तु। यो होरानवांशादित्रिवारमाधिपत्यं करोति। तस्य षड्वर्गः

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथाचगार्गिः आदिष्वपिपदार्थेषुस्थितस्वेषुस्ववर्गतः परवर्गगतोप्येवंग्रहोभवतिनान्यथा १४ अथपशूनांरक्षालग्नमाह। शुभ
लग्नेइति। लग्नेशुभग्रहयुते। नैधनेष्टमेपापरहिते स्वर्क्षयोनिषु अश्वेभाजफणिहयमित्यादिषु पूर्वोक्तेषु नक्षत्रेषुपशूनांरक्षापा
लनं वृद्धिपोषणं क्रयोद्रव्येनराशिषुनक्षत्रयोनिषुनिधनविशुद्धौशुभग्रहविलग्नेपशुवृद्धिक्रियारक्षाः कार्याः। प्रागुक्तयोपेक्षि
तिलग्नोक्तत्वात्। १५ अथसौम्यग्रहषड्वर्गेयात्रादिकार्यसिद्धानिपापग्रहषड्वर्गेचयात्राकृत्तदुपजान्याह। वर्गेशुभेइति। गतार्थमिदं १६

शुभग्रहोदये शुद्धे नैधने स्वर्क्षयोनिषु। रक्षावृद्धिक्रियाः शस्ताः पशूनां मुनिभिः स्मृताः १५ वर्गे शुभे लग्नगतेपि
सौम्ये सपौष्टिकं कर्म बुधैः प्रदिष्टं। लग्नप्रपन्ने पुनरुग्रवर्गे स्यात्कर्मणः क्रूरतरस्य सिद्धिः १६ घटमिथुनकु
लीराधन्विनोमीनकन्याइहशुभभवनस्वाराशयः सप्तसौम्याः। अलिघटमृगसिंहाजाश्चपापास्पदत्वान्मु
निभिरभिहितास्तेराशयः क्रूरभावाः १७ सौम्या ग्रहेषां न खलु प्रकृत्या योगेन सा साध्वितरग्रहाणां। क्रूरोपि
सौम्यः सशुभाश्रितः स्यात्सौम्योपि पापाश्रित उग्र एव १८ ग्रहासन्नावलोकाभ्यां राशेर्भावानुवर्तिने ग्रहोन्य

अथपूर्णचंद्रगुरुबुधशुक्राःसौम्यग्रहास्तत्संबंधिराशीनांसौम्यत्वं 'क्षीणचंद्ररविं' स्तद्धिहीनोसौसमभावमुपसर्प्यति १९॥
भौमशनयःपापग्रहास्तत्संबंधिराशीनांपापत्वंस्यात्। नतत्समालिन्याह। घटेति। अथैषांराशीनांपापग्रहयोगात्पापत्वं शुभग्रहयोगाच्छु
भत्वंचाह। सौम्याइति। गतार्थं १७।१८ अथग्रहाणांयोदृष्टिवशेनराशेर्ग्रहाधीनत्वंकेवलस्यस्वाधिपतिसमत्वंचाह। ग्रहासन्नेति। ग्रहो

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्यत्नमेशुभवर्गेवमनुष्यराशौस्थिरसिंहकुंभनाम ५

तद्धिहीनःग्रहदृष्टिसंयुक्तहीनग्रहासन्नावलोकेनरहितः।स्वभावस्वाधिपतिभावेस्वस्वामिस्वरूपंगतिः १९ अथपूर्णमध्याधमत्व फलराशीनामाह। आदौहीति। आदौदृशांशान् यावत् मध्येविंशत्यंशान्यावत्। अंत्येविंशत्यंशान्नूहं २० अथवास्तुनिवेशलग्नमाह। शुद्धेति। केंद्रेषुलग्नचतुर्थसप्तमदशमेषु निधनेष्टमेएतेषुशुद्धेषु पापग्रहरहितेषुस्थिरलग्नेवृषसिंहवृश्चिककुंभानामन्यतमेशुभवर्गे मनुष्यराशौस्थिरसिंहकुंभानामेकमनुष्यराशौमनुष्यराशयस्तुमेषाद्याविषमाः षड्राशयः वास्तुनिवेशःकार्यःशुद्धचतुर्थनिधने।

आदौहिसंपूर्णफलप्रदं स्यान्मध्येपुनर्मध्यफलंविलग्नेअंतीवतुच्छंफलमस्यचांतेविनिश्चयोयंविदुषामधीषः २० शुद्धकेंद्रनिधनस्थिरोदयेसौम्यवर्गमनुजोद्गमेपिच। संनिवेशउदितोहिवास्तुनःसूरिभिर्नतुचरोदयेक्वचित् २१ कुंभराशिमपहायसाधुषुद्व्यकर्मभवमूर्तिवर्तिषु। अव्ययेष्वसुभदायिषूद्गमेभार्गवेविपणिरिंदुसंयुते २२ शुद्धेषुधर्मात्मजनेधनेषुचरेचवर्गेद्रविणप्रयोगः।वुधेविलग्नेदशमेचभौमेचौर्यस्यकालः

सौम्यग्रहभागराशिलग्नेच। स्थिरपुंसोदयलग्नेवास्तुनिवेशोनरराशौवेतिलल्लोक्तत्वात् २१ अथपण्यारंभलग्नौ कथितोमुनींद्रैः २३ रयोद्भूतयाह। कुंभराशीति। कुंभराशिंविनान्यराशिषु द्विदशैकादशलग्नस्थानस्थेषुशुभग्रहेषुपापग्रहेषुव्ययरहितेषुद्वादशस्थानरहितेषु। चंद्रेशुक्रेणसहितेलग्नस्थेहट्टारंभःकार्यो। तथाचलल्लः। होरार्थलाभपूरणा १० षुकुंभादनेषुशुभयुतेषुलग्नेस्थाव्ययपापैर्विपणिः सेंद्रौसितेलग्ने २२ अथद्रव्यप्रयोगस्यचौर्यस्यलग्नमाह। शुद्धेष्विति। नवमपंचमाष्टमेषुशुद्धेषुपापरहितेषु चरेवर्गेद्र

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथद्रव्यप्रयोगस्यचौर्यस्यलग्नमाह ॥ शुभेइति ॥ शुभग्रहेलग्ने । रवौभौमेवादशमगे एकादशस्थेवा । योनिवशेन गोव्याघ्रगजसिंह मित्यादिवर्जयित्वा विद्याभ्यासरतेनकलाविदा योद्धावास्वामिसेवाकार्येति २४ चतुर्विंशतितमश्लोकस्यार्थस्तु । अत्रैवयवनपीयर त्रिंशतितमपद्येनिरंकएषश्लोकोलिखितमेव २५ अथाधानलग्नंस्वागतयाह । वीर्यभाजिनि ॥ शुक्रेगुरौचसवलेस्वक्षेत्रेमित्रक्षेत्रेवाशु भग्रहदृष्टेवेतिस्थानवलं । चंद्रशुक्रौसमराशिषु । शेषाविषमराशिषुलग्नेजीवबुधौ । दशमेभौमसूर्यौ । सप्तमेशनिः । चतुर्थेचंद्रशुक्रा वितिदिग्वलं । रविचंद्रौमकरादिषट्केऽन्येचकर्कटादिषुस्थितायनवलं । शुक्रगुरुसूर्यादिवसे । चंद्रभौमशनयोरात्रौ । वुधःसर्वकालेसवा

शुभेविलग्नेदशमायगेचरवौकुजेवापिवशेनयोनेः विद्याश्रुधाभ्यासरतेनकार्यःसमाश्रयःस्वामिनःसेव
केन२४ वीर्यभाजिसगुरौभृगुपुत्रेदुर्वलेषुचपरेषुनितांतं पुंप्रसूतिकथितेनपि चकालेकामयेत्प्रियतमां
तनयार्थी२५ लग्नधर्मसुतराशिमुपेतेवाक्पतौदनुजराजगुरौवा ॥

॥ रेकालहोरादौचसर्वग्रहाः । शुभग्रहाःशुक्लपक्षे पापाःकृष्णपक्षेइतिकालवलं । स्निग्धस्थूलविंवाःस्फुटकिरणाश्चसर्वेपिइतिचेष्टावलं । शनेर्भौमोवलवान् । भौमाद्वुधोवलवान् वुधाद्गुरुः । गुरोःशुक्रः । शुक्राच्चंद्रः । चंद्रात्सूर्यः । इतिनिसर्गवलं । स्वोच्चसुहृत्स्वत्रिकोणनवांशैःस्थानवलंस्वगृहोपगतैश्च । दिक्षुवुधांगिरसौरविभौमौसूर्यसुतःसितशीतकरौचा उदगयनेरविशीतमयूखौवक्रसमागमगाःपरिशेषाः विपुलकरायुधिचोत्तरसंस्थाचेष्टितवीर्ययुताःपरिकल्प्याः । निशिशशिकुजसौराःसर्वदाज्ञोह्निचान्येवहुलसितगताःस्युःक्रूरसौम्याःक्रमेण स्वदिवससमहोरामासवर्षैःकालवीर्यं ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शक्तवुगुरुश्चरणाह्वदिनोवीर्यवंतः इति वृहज्जातककौतूहलात्। एभिर्बलेयुक्तेगुरौशुक्रेशेषेषुबलहीनेषु पुरुषप्रसवोक्ते च काले स्त्रीसंयो
गः कार्यः। पुंप्रसूतिकालश्च जातककौतूहलेयः लग्नधर्मसुतेति। गुरौशुक्रेवा। लग्ननवमपंचमस्थेपुरुषस्यजन्मलग्नेवा। आनंदि
नः प्रपेसी कांतांगच्छेत् पुत्राभिलाषीगुरुशुक्रयोर्बलेपरेषांतुबलेस्थितेस्त्रियां। भजेत्स्वधीनवलरंध्रेषु निजोदयेवा यदि वा नृजन्मभे
लग्नस्थेधी ५ धन २ त्रिकोण ५।९ ऊवा। इति भास्करव्यवहारे २५।२६॥ अथगृहप्रवेशलग्नं श्लोकद्वयेनाह सद्ग्रहैरिति। शुभग्रहैः चतुर्थे

पुत्रकाम उदयेऽथ निजेवाप्रेयसीमुपसुस्थितः समुपेयात् २६ सद्ग्रहैर्हिबुकलग्नगैर्बलैर्नोज्झितैः पुनरशोभनैर्ग्रहैः
। अष्टमेग्रहविवर्जिते स्थिरे ग्राम्यभे नवगृहप्रवेशनं २७ हिबुकेर्के गुरौ लग्ने धर्मारंभोरवेर्दिने। मांगल्यमभि
चारश्च स्वस्थ सूर्ये गुरूदये २८ पूर्णे चंद्रे वेश्मगेर्के स्वरस्थे जीवे लग्ने वाक्पतौ वा सवे च। श्रीमत्यायुष्याणि कार्या
णि कुर्यात् पुष्टिस्तस्मिन्नेव राजाभिषेकः॥२९॥

लग्नयोः स्थितैः पापैर्बलरहितैः अष्टमेपापग्रहरहिते स्थिरेग्राम्यभेपाद
मं लग्ने मिथुनधन्विकुंभा ग्राम्यराशयः। स्थिरग्राम्यनवांशकेनवगृहंप्रविशेत्॥ तथा च लल्लः होराहिबुकोपगतैः सौम्यैः पापेषुब
लवियुक्तेषु। स्वग्राम्यस्थिरलग्ने गृहप्रवेशोऽष्टमे शुद्धे निधनचतुष्टये शुद्धे ग्राम्ये लग्ने तथा स्वलग्ने वा। भवनप्रवेशकालाविबुधगुरौ
शुक्रेलग्नेवा २७ अथधर्मारंभमांगल्याभिचारलग्नमाह। हिबुकेर्क इति। चतुर्थेरवौ लग्नेगुरौ। धर्मारंभः सूर्यवारेकार्यः लग्नेगुरौदश
मेरवौ मांगल्यं अभिचार उच्चाटनं च कार्यं २८ अथायुष्यादिकर्मणो लग्नमाह। पूर्णे चंद्रेति। पूर्णे चंद्रे चतुर्थभवने। रवौ दशमस्थे॥०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुरौलग्नेगुरुवारेच। श्रीमत्पापुष्युष्टिकरणानिकुर्यात्।राजाभिषेकश्चतस्मिंल्लग्ने २९ अथरससंग्रहसेवावाप्यादिश्चलग्नमुपजात्याह
।चंद्रोदयेइति। चंद्रोदये चंद्रेलग्नगते चंद्रस्यवारेच।गुरौचतुष्टयस्थेकेंद्रस्थेरससंग्रहः कार्यःवाटिकारोपणे।धान्यवपने।तडागवा
प्योःखाननारंभः सेवायांचैवंविधेलग्नेआरंभेसिद्धिर्भवति।लग्नस्थेशशिनिदिनेचतस्यजीवेकेंद्रस्थेकथितोरससंग्रहोमुनीन्द्रैः इतिभा।
स्करव्यवहारात् ३० अथदीक्षालग्नंशालिन्याह।देवाचार्यइति।गुरौदशमस्थे। पापेरवलेनवमस्थेःजातकोक्तप्रव्रज्यायोगेस्थिरेलग्ने

चंद्रोदयेनहिबुमेरिज्ये चतुष्टयस्थेरससंग्रहःस्यात्।उद्यानसस्योप्तितडागवापीसेवादिकार्यस्यचसिद्धिरुक्ता
३० देवाचार्येकर्मभावप्रपन्नेपापेधर्मस्थानगेवीर्यहीनेः।योगेप्रव्रज्याह्वयसुस्थिरेचकार्यातज्ज्ञैस्तत्रदी
क्षामुमुक्षोः ३१ श्रुतिस्मृतिपुराणादिप्रोक्तानांधर्मकर्मणांगुरुज्ञलग्नवर्गेषुप्रारंभस्तद्बलेसति ३२ लग्नक
र्मगतेसौम्येजीवेवास्तदीधिते॥तयोर्वर्गस्थितेशिष्यविद्यारंभःप्रशस्यते ३३॥ चमोक्षार्थिनोदीक्षाकार्या।कर्मणि

देवाचार्येनवमस्थेदुर्बलेग्रहेः पापेः प्रव्रज्यायोगेषुस्थिरेचमोक्षार्थिनोदीक्षाइतिलल्लोक्तत्वात्।तथाचलघुजातके।चतुरादिभिरेक
स्थैःप्रव्रज्यांस्वाग्रहःकरोतिबली।बहुवीर्यैस्तावद्भिःप्रथमावीर्याधिकस्यैव ३१ अथश्रुत्यादिधर्मकर्मणांलग्नमाह।श्रुतीति।गुरुबुध
योर्लग्नेधनुमीनकन्यामिथुनेष्वित्यर्थः।गुरुबुधयोर्वाषड्वर्गेगुरुबुधयोर्बलेचश्रुत्याद्युक्तधर्मारंभःकार्यः ३२ अथविद्यारंभलग्नमाह।
।लग्नेति।बुधेलग्नदशमस्थे।गुरौवा।लग्नदशमस्थे।चंद्रेचगुरोर्बुधस्यवाषड्वर्गस्थे।शिल्पस्य विज्ञानस्यःविद्यानांचारंभःकार्यः।वाशब्दादस्

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथाचलल्लः। सौम्यैर्दशमोपगते लग्ने चंद्रात्मजे गुरौ वापि। विद्याशिल्पारंभा जीवेन्दुभार्गवे चंद्रे ३३ अथ स्नानलग्नमाह। शीतांशाविभ-
ति। चंद्रे बुधराशिस्थिते। कन्यामिथुनस्थे। शुभे बुधगुरुशुक्रेषु लग्नदशमस्थेषु। स्नानस्य मंत्रादेर्ग्रहणं कार्यं। शनिभौमरवियुते लग्नं-
त्यक्त्वा। तथाचलल्लः बुधराशिस्थे चंद्रे गुरुबुधशुक्रेषु विलग्नेषु। स्नानस्य ग्रहणं कार्यं सौरारार्कान्विनां हित्वा ३४ अथ नाट्यारंभलग्नमा-
ह। बुधेइति। बुधलग्नगते चंद्रे कन्यामीनस्थे गुरुदृष्टे। शुभैश्चतुर्थगतैः नाट्यारंभः कार्यः ३५ अथ पण्यलग्नमाह। दशमेति। ज-

शीतांशौ शुभराशिस्थे शुभे पूर्दयकर्मसु। स्नानस्य ग्रहणं कार्यं हित्वा पापग्रहोदयं ३४ बुधे विलग्ने शशिनि
तराशौ गुरुवीक्षिते। हिबुकस्थैः शुभैर्नाट्यप्रारंभः सिद्धिरिष्यते ३५ दशमैकादशे लग्ने विन्नकेंद्रत्रिकोणगैः शु-
भैः पण्यस्य कर्माणि कुंभं वर्जयित्वा घटोदयं ३६ लग्ने जीवेऽथवा दुर्बलैश्च क्रूरैश्शुक्रे चापि मेषूरणस्थे। अप्ये च
द्रे सर्वेनौयाश्च यात्रामारंभाः स्युः सिद्धये निर्विकल्पं ३७॥ ॥ ३७॥ ॥ ३७॥ ॥ ३७॥ ॥ ६ ॥॥

न्मराशेर्जन्मलग्नाद्वा दशमैकादशे वा लग्ने द्विलग्नचतुर्थसप्तमदशमपंचनवमगैः शुभग्रहैः। पण्यस्य विक्रेयस्य भांडादेः कर्म कार्यं
कुंभलग्नं वर्जयित्वा ३६ अथ जलारंभलग्नं शालिन्याह। लग्ने जीवे इति॥ गुरौ बुधे वा लग्नस्थे। पापैर्दुर्बलैः। शुक्रे दशमे चंद्रे जलचर-
राशौ कर्कटमकरमीनगे सर्वजलाश्रयाणामारंभः कार्यः। लग्ने गुरौ बुधे वा क्रूरेष्वबलेषु भार्गवे स्वस्थे। आप्यगते हिमरश्मौ सर्वेन्तो-
याशयाः साध्या इति भास्करव्यवहारे॥ ३७ ॥ ३७॥ ॥३७॥ ३७॥ ॥ ३७॥ ॥ ३७॥ ॥३७॥ ॥३७ ॥ ॥३७ ॥ ३७ ॥३७॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथौषधलग्नमाह। घूनेति। सप्तषडष्टद्वादशेषु पापरहितेषु शुभग्रहेषु षड्विधबलयुक्तेषु आयुषो जीवनस्यानुकूले योगे औषधरसायनं वाजीकरणादि कुर्यात् ३८ अथयात्राशेलग्नेसुखेनसंधिर्निश्चलोभवतितन्चालिन्याह। भाग्येइतिभाग्येपूर्वफाल्गुन्यां मैत्रेऽनुराधायां शीतरश्मौ मृगे पुष्येऽत्रस्थे चंद्रे द्वादश्यामष्टम्यां वा तिथौ नैतिलकरणे लग्ने च शुक्रदृष्टे संधानस्यसंधेः।

घूनशत्रुनिधनव्ययशुद्धौ सद्ग्रहेषु निजरोबलवत्सु आयुषश्च हितकारिणि योगे कीर्तितानियतमौषधिसेवा ३८ भाग्यमैत्रे शीतरश्मौस्तपौष्ये द्वादश्यांवाशुक्रदृष्टेचलग्ने। अष्टम्यांवा नैतिलाख्ये प्रदिष्टं पूर्वाचार्यैरत्र संधानसिद्धिः ३९ पित्र्याशयाम्यमूलेंद्रभेषुशुद्धेष्टमे पिचा। वेतालसिद्धिःपातालेभूगोज्ञेघटलग्नगे ४० सक्रूरेक्रूरलग्नस्थे चंद्रेबलिनि वाधने नष्टयोगेषु कर्तव्योह्यभिचारोरिनैधने ४१ व्ययनैधनसंशुद्धौ सदृशोपचयोदये। सर्वारंभेषुसंसिद्धिश्चन्द्रेचोपचयस्थिते ४२॥

॥ सिद्धिःस्यात् ३९ अथवेतालसिद्धिलग्नमाह। पित्र्येशेति। मघार्द्राभरणीमूलज्येष्ठास्थे चंद्रे अष्टमे पापरहिते बुधे कुंभलग्नस्थे वेतालसिद्धिरित्युपलक्षणं पिशाचादिकर्म सर्वमप्येवं विधेलग्ने कुर्यादिति ४० अथाभिचारलग्नमाह सक्रूरेइति। क्रूरग्रहसहिते चंद्रे पापलग्ने मेषसिंहवृश्चिकमकरकुंभस्थे बुधे बलयुक्ते रिष्टयोगेषुजातकोक्तेषुसत्सु शत्रुजन्मलग्नादष्टमे लग्ने अभिचारोऽर्थवादिनोच्चाटनं विधेयं ४१ अथसामान्येनसर्वकर्मलग्न

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

जन्मराशेस्त्रिषष्ठैकादशमे लग्न-द्यूने शुभदृष्टे चंद्रे लग्नादुपचयस्थे सर्वारंभाः सिद्ध्यंति ४२ अथ कृष्यारंभलग्नमाह। शक्तिशालिनी
ति। चंद्रे शुक्रे च सबले। पापैरबलैः चंद्रे जलराशौ कर्कमकरमीनस्थे गुरौ लग्नस्थे कृष्यारंभः कार्यः। तथा च भास्करव्यवहारे। प्राब
ल्यमितो भृगुनंदनस्य भौमार्कमंदेषु च दुर्बलेषु। वारिप्रसूतोदयगे मृगांके लग्ने च जीवे कृषिरिष्टहेतुरिति ४३ अथ सौम्यपापग्रहापे
क्षस्थानेषु शुभाशुभेषु च न शुभाशुभानि स्थानानि वसंततिलकेनाह। प्रायइति। प्रायो बाहुल्येन शुभग्रहाणामष्टमद्वादशस्थानस्थाः न व

शक्तिशालिनि सिते सशीतगौ दुर्बलैरसितभौमभास्करैः आप्यभे शशिनि वारिजोदये लग्नवर्तिनि गुरौ कृ-
षिक्रिया ४३ प्रायः शुभानशुभदा निधनव्ययस्था धर्मान्त्यधीनिधनकेंद्रगताश्च पापाः सर्वार्थसिद्धि-
शुभशीतगुभौ विलग्ने सौम्यान्वितोपि निधनं न शुभं विलग्नं ४४ सर्वत्र लग्ने प्रथमं प्रकल्प्यं कर्त्तुर्बलं चांद्र-
मसं ततोऽन्यत् बलोपपन्ने सति शीतरश्मौ भवंति सर्वे बलिनो ग्रहेंद्राः ४५ आधारमिन्दोर्बलमुक्तमार्यैरा-

मद्वादशपंचमाष्टमः लग्नचतुर्थसप्तमदशमस्थाः पापाश्च न शस्ताः। चंद्रः शुभग्रहयुतोपि लग्ने न शस्तः धेयमन्यद्धि जं च वर्यं॥
स्तः। जन्मराशेर्जन्मलग्नाच्चाष्टमं न शस्तं अत्र लग्नं कृष्यानंतरं वास्तुविपणिचौर्यादिलग्नानां क्रमः सत्त्वपि ग्रंथगौरवभयात्सत्वमक
रणोक्तन्यायेन सुखावबोधत्वात्प्रदर्शितः स्वयमेव गणितज्ञैरूहनीयः ४४ अथ चंद्रबलप्रशंसामाह। सर्वत्रेति। सर्वत्र काललग्ने
षु कार्यकर्त्तुर्जन्मराशेश्चांद्रबलं गोचरेण तत्काललग्ने चंद्रबलं प्रथमं प्रकल्प्य कल्पनीयं। यतः चंद्रबले सति अन्यबलन्यूनत्वेपि कार्यसिद्धिः स्यात् ४५ ननु चंद्रबलस्यैव किमर्थं प्राधान्यमि

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्रवजमाह। आरभिन्दोर्बलमिति। चंद्रबलमाधारं अबलेंबनस्थानं अन्यग्रहजं बलमाधेयं चंद्रबलाधीनं सर्वग्रहाणां शुभाशुभफ। लानि चंद्रबलाधीनानीत्यर्थः यत् ग्रहादीनामाधारभूमौ परिनिष्ठितायां दृढीकृतायां आधेयवस्तूनि यासां द्युवीर्यं वंति प्रचिरस्थायिनः। सुः ४६ अथ पूर्वोक्तं रत्नस्य स्फुटत्वं शालिन्याह। आमूर्तकिरणेति। ननु च आत्मा मनसा युज्यते मन इन्द्रियेण इन्द्रियं स्वस्वविषये न शब्दादिने निप्राप्यकारिणं मतं। अप्राप्यकारिणामपि मनो मनोधिष्ठितमिंद्रियं कार्यकरं भवति। तारावलादिद्युवी यादित्याद्यु।

आधारशक्तौ परिनिष्ठितायामाधेयवस्तूनि च वीर्यवंति ४६ आमूर्तकिरणावीर्याद्वीर्यमाश्रित्य सर्वेंद्रति
हि फलमेते खेचराः साध्वसाधु। निजनिजविषयेषु व्याप्रियंते यतो ऽमूर्त्यलमिह मनसैवाधिष्ठितानींद्रिया
णि ४७ ये ऽ शालग्नस्योदिता स्तेषु निखण्डतेल ग्नोन्त्यं च फलं खेचरेन्द्रः। यातिक्रान्तस्तान्भवेत्स्वद्दितीयः शे
षस्थानेष्वेवमेव प्रकल्प्यं ४८ समस्तगुणसंपदां न खलु लब्धिरल्पैर्दिनैर्गुणप्रचुरता ततो बहुमता च।
दोषाल्पता। न भूरिगुणसंचये प्रभवतीह दोषाल्पको ह्युदर्चिषि हुताशने सलिलबिंदुरेको यथा ४९ ॥।

क्रमेणैवमेव। तस्माच्चंद्रबलं सर्वग्रहबलवत्त्वे हेतुरिति। यथेंद्रियाणां मन इति ४७ अथ लग्नादिभावस्य अग्रहो यादृशः पूर्वोबली भवतितं शालिन्याह। येऽ शा लग्नस्येति। लग्नस्य राश्यंशकलाविकलारूपस्य येंऽशा गतास्तत्संख्यो ग्रहो यथोक्तं फलं करोति। यस्तु तानंशानुल्लंघ्य स्थितस्स द्वितीयस्य भावस्य फलं करोति। एवं भावांशेषु बहुषु शून्यांशो ग्रहः पूर्वभावस्य फलं ददाति। एवमन्यभावेषु धनसहजादिषु विचार्यं ४८ अथ

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र.मा. टी. ४९

दृष्टांतमाह। समस्तगुणसंपदामिति सुगमं ४९ अथवेधलत्ताविष्ट्यादिदोषो भवतिपदानदात्यगुणं सर्वेग्रहबलादिनाऽन्यगुणासद्भावे
पिलग्नंग्राह्यमितिदृष्टान्तेनाह। एकोपीति। तस्मात्तदल्पदोषंमहद्गुणं चलग्नंग्राह्यमिति ५० इतिश्रीमहादेवविरचितेरत्नमालाविवरणे
लग्नप्रकरणंद्वादशं १२ लग्नप्रकरणेप्रसंगाद्वीर्यभाजिसगुरौभृगुपुत्र इत्यादिनाआधानलग्नेउक्तसतिसीमंतोन्नयनादिसंस्कारप्र
करणमारभ्यते। तत्रादावेवसीमंतविधिलग्नंशार्दूलेनाह। षष्ठेमासीति। आधानात्षष्ठेमासि। अथचाष्टमे। तस्यमासस्याधिपतौ षष्ठमा

एकोपिहंतिगुणलक्षमपीहदोषः कश्चित्परो यदिगुणोस्तिनतद्विरोधी। मद्यस्यबिंदुरपिपावनपंचगव्यंसं
पूर्णमत्रकलशंमलिनीकरोति ५० इतिश्रीपतिभट्टविरचितायांज्योतिषरत्नमालायांलग्नप्रकरणंद्वादशं १२
षष्ठेमास्यथवाऽष्टमेतदधिपेवीर्योपपन्नेविधौचेष्टेदेष्टतनौनृनामभवनेपुंलग्नभावेपिचधीधर्मास्तचतुष्ट
येषुगुरौपापैश्चतद्व्यायगैर्मृत्युद्वादशवर्जितैश्चमुनिभिःसीमंतकर्मस्मृतं १ मृदुध्रुवक्षिप्रचरेषुभेषु
सूतौविधेयंखलुजातकर्म॥))सस्याधिपतेः। अष्टमासस्याधिपतेर्वाआधानलग्नाधिपतौचबलयुक्ते चंद्रेचशुभदृष्टे पुंनक्ष
त्रेपुरुषलग्नेमेषादिषड्विषमराशयः पुरुषराशयः पुंनवांशके। विषमराशौविषमराशिनवांशेचेत्यर्थः। पंचमनवमकेंद्रस्थेगुरौ पापैः
पंचनवकेंद्रद्वादशाष्टमरहितैः सीमंतविधिःकार्यः। त्रिषडेकादशेषुपापग्रहाः शुभाइत्यर्थः॥ १ ॥अथजातकर्मनामधेयलग्नेउप रत्म.
जात्याह॥ मृदुध्रुवेति॥ चित्राऽनुराधामृगरेवतीरोहिण्युत्तरात्रयं। ॥ [illegible] ॥ ॥ [illegible] ॥ ॥ [illegible] ॥ ॥ [illegible] ॥ ॥ [illegible] ॥ ॥ [illegible] ॥ [illegible] ॥ ४९

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रवणधनिष्ठाशतभिषकस्वातिपुनर्वसुपुष्यहस्ताश्विन्यभिजित्सुउदयस्तुवा। पुत्रस्यजातकर्मनामकरणेकार्यंतयोर्लग्नेतुगुरुःशु
क्रोवाकेंद्रस्थोग्राह्यः।अत्रमृदुध्रुवादिनक्षत्राभिधानंजन्मकालेजातकर्मकरणादेकादशेचनामकरणात्। अन्नप्राशनादौविचार्य
तद्दिवसेवा मृदुध्रुवादिनाउदयेग्राह्यः।तथाचलल्लः।क्षिप्रचरध्रुवमृदुभेषुकारयेज्जातकर्मनामयुतं। उदयेथवाचोक्तभानांगु
रौभृगौवाचतुष्टये २ अथान्नप्राशनलग्नशालिन्याह।षष्ठेमासीति।जन्ममासात्षष्ठेमासिदारकाणांबालकानां अन्नप्राशनंतदन्न।

गुरौभृगौवापिचतुष्टयस्थेसंतःप्रशंसंतिचनामधेयं२ षष्ठेमासिप्राशनंदारकाणांतत्कन्यानांपंचमेसद्भि
रुक्तं। प्रोक्तेधिष्ण्येवासरेसद्ग्रहाणांदर्शंरिक्तांवर्जयित्वातिथिंच ३ रवौलग्नेकुष्ठीधरणितनयेपित्तगद
भाक्शनौवातव्याधिःक्षशशशिनिभिक्षाटनरतः।बुधेज्ञानीभोगीभृगुशनसितिचिरायुःसुरगुरौविधौपू
र्णेयज्वाभवतिचनरःसत्रदइह।४ कंटकांत्यनिधनत्रिकोणगास्तत्फलंददतियन्ननावमी॥ ६ ॥

प्राशनं कन्यानांपंचमेमासि।ज्योतिर्विद्भिरुक्तंकथितं।तथाचभोजः।अन्नप्राशनंमासिषष्ठेपुंसः कन्यानांपंचमेमासि।शुभ
ग्रहाणांवारे।रिक्तामावास्यांचवर्जयित्वा३ अथान्नप्राशनलग्नेग्रहाणांफलंशालिन्याह।रवौलग्नेइति।रवौलग्नस्थेऽन्न
प्राशनकर्ताबालकःकुष्ठीभवति भौमेपित्तरोगी क्षीणचंद्रे।भिक्षाटनरतःदरिद्रइत्यर्थः।बुधेज्ञानवान्।शुक्रेभोगी।गुरौदीर्घायुः
।पूर्णचंद्रेयज्वा सत्रदाताचभवति।इहेतिलग्नस्थेपूर्णचंद्रेइत्यर्थः। लग्नस्थरव्यादिग्रहलग्नस्थयत्फलंतदेवकेंद्रत्रिकोणाष्टद्वादश

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कंटकांत्येति। अमी सूर्यादयो ग्रहाः। यत्तु नौलग्ने रवौ लग्ने कुष्ठीत्यादिकं यत्फलं केंद्रत्रिकोणाष्टद्वादशगास्तदेव फलं प्रयच्छंति। अन्नप्राशनलग्नात्केंद्रनवपंचमे द्वादशेष्टमे च पापवर्ज्याः। शुभाः श्रेष्ठाः इत्यर्थः। लग्नादष्टम द्वादशस्थो वा तन्व्याधिकर एव पू। अथ क्षौरलग्नमाह। क्षौरर्क्षेष्विति। स्वकुलविधिना स्वकुलाचारेण प्रथमे वर्षे तृतीये वर्षे वा गोत्रदेवीसंनिधौ चूडाकर्म कार्यं। तथा चाश्वलायनः तृतीये वर्षे चौडं यथाकुलधर्मं चेति। अत्रापि यथाकुलशब्देन प्रथमं वर्षं गृहीतं। तथा च शांखायनः। संवत्स

षष्ठेन्दुरस्त्रुभस्तथाष्टमः केंद्रकोणगास्तु एनिरन्तहृत् ५ क्षौरर्क्षेषु स्वकुलविधिना चौलमाहुर्मुनीन्द्राः केन्द्रं पातैर्गुरुभृगुबुधैस्तत्र सूर्योज्वरस्त्र शस्त्रान्नाशो धरणितनये पंगुता चार्कपुत्रे क्षीणज्योतिष्यपचितन नौ निश्चितं नाश एवा ६ धनव्ययत्रिकोणगैरसद्ग्रहैर्मृतावपि। सुरक्रियानशोभना शुभैश्च पुष्टिकारिणी। ७ गर्भाधानादष्टमे जन्मतो वा मौंजीबंधः शस्यते ब्राह्मणानां॥ ॥रे चूडाकर्म तृतीये वा वर्षे शुभैः केन्द्रगैः तत्र केंद्रस्थरवौ वा।

लकस्य ज्वरो भवति। भौमे केंद्रस्थे शस्त्रेनाशः। तथा चंद्रे वत्तवल्लभे। चूडा शुभाय शुभकर्मे मे षु सौम्ये सौम्येषु केन्द्रे मृत्तये कुजे स्यात्। शनौ केंद्रस्थे पंगुत्वं। क्षीणचंद्रे केंद्रस्थे मृत्युरेव। तस्मात्पापान् क्षौरलग्ने केंद्रस्थान्वर्जयेदिति ६ अथान्यस्थानगानामपि पापानां फलं प्रमाणिकयाह। धनव्ययेति। पंचमनवम द्वादशाष्टमद्वितीयैः पापैः क्षौरं न शस्तं। शुभैस्तु शस्तमिति। पापानां तत्स्थाने विनाशयित्वा सौम्यानां पोषकत्वादिति ७ अथ मौंजीबंधलग्नविवक्षुर्विप्रक्षत्रियविशां यस्मिन्वर्षे मौंजिबंधस्तच्छालिन्याह। गर्भाधानादिति। ब्राह्मण

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मौंजिबंधकार्यः। राज्ञां गर्भैकादशे। वैश्यानां गर्भाद्द्वादशे। तथा च याज्ञवल्क्यः। गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनं। राज्ञामेकादशे सैके विशामेके यथाकुलं। यथाकुलशब्देन गर्भैकादशमपि गृहीतं। तथा च शांखायनः। गर्भाष्टमे ब्राह्मणमुपनयेद्गर्भद्वादशे वा। मनुना तु विशेष उक्तः। ब्रह्मवर्चसकामस्य कार्यो विप्रस्य पंचमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ८ अथ येषु ग्रहेषु सबलेषु येषां मौंजीबंधस्तानाह। वर्णाधिपे ति। विप्राणां जीवशुक्रावधिपती राज्ञां रविभौमौ। विशां चंद्रः। तत्र स्ववर्णाधिपे बलयुते मौंजीबंधः। अथ गुरुचंद्ररविषु सबलेषु सर्वेषामेवेति ९ अथ शाखाधिपबलेनोपनयनमाह। शाखाधिपे इति। तत्र ऋग्वेदाधिपतिर्गुरुः। यजुर्वेदाधिपतिः

राजन्यानां नूनमेकादशेऽब्दे वैश्यानां च द्वादशे वेदविद्भिः ८ वर्णाधिपो बलोपेत उपनीतिक्रिया हिता। सर्वे
षां वा गुरौ चंद्रसूर्ये च बलशालिनी ९ शाखाधिपे बलिनि केन्द्रमुपागते वा वारस्य चोपनयनं गदितं द्विजानां।
नीचस्थिते रिपुगृहेऽथ पराजिते स्याज्जीवे भृगौ श्रुतिविधिस्मृतिकर्महीनः॥ १० ॥ १० ॥ १० ॥ ॥ १०॥

शुक्रः। सामवेदाधिपतिः भौमः। अथर्ववेदाधिपो बुधः। गुरुभृगुभौमबुधश्चैषां स्वामिनः क्रमशः इति वचनात्। स्वशाखाधिपतौ सबले केंद्रस्थे वा। अस्य शाखाधिपस्य वारे उपनयनमुक्तं। शाखाधिपस्य बले वर्णेशं करसंभवात्। द्विजानां ब्राह्मणक्षत्रियविशां। गुरौ शुक्रे वा नीचस्थे शत्रुगृहस्थे वा शत्रुजिते च श्रुतिविधिकर्महीनो द्विजो भवति। तत्र हविःसंस्थाः सोमसंस्थाः स्मार्तनामावसथ्यं। तथा चोक्तं। पाकसंस्था हविःसंस्थाः सोमसंस्थास्तथापरे एकविंशतिरित्येता यज्ञसंस्थाः प्रकीर्तिताः अष्टका पार्वणश्राद्धं वैश्वदेवं श्रावणी आश्वयुजी आग्रहायणी

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र॰मा॰ इतिसप्तपाकसंस्थाः। अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि। पशुबंधः सौत्रामणी च सप्तहविःसंस्थाः। अग्निष्टोमोऽत्यग्नि-
टी॰ ष्टोमे उक्थः षोडशी वाजपेयोऽतिरात्र आप्तोर्यामः सप्तसोमसंस्थाः। लग्नस्तु। ऋतुर्वसंतः कथितो द्विजानां ग्रीष्मो नृपाणां शिशिरो वि-
५१ शां च। व्रतस्यबंधे यद्दिवा रविलानां माघादयः पंच भवंति मासाः १० अथ यस्मिन्ग्रहे यत्रस्थे मौंजीबंधलग्नं प्रशस्तं तदाह। लग्नेति। लग्न-
गते गुरौ नवमपंचमस्थे शुक्रे शुक्रनवांशस्थे चंद्रे उपनीतो द्विजो वेदवेदी भवति। गुरुस्सुक्रलग्नाधिपैः शनिनवांशस्थे विद्याशीलवर्जि-
तः कृतघ्नश्च स्यात् ११ अथ यस्मिन्ग्रहे केंद्रस्थे यत्फलं तदाह। स्वानुष्ठाने इति। गुरौ केंद्रस्थे यजनयाजनादिषट्कर्मरतो भवति शुक्रे केंद्र-

लग्ने जीवे भार्गवे च त्रिकोणे शुक्रांशस्थे स्याद्विधौ वेदवेदी सौरांशस्थे सूरिलग्ने सशुक्रे विद्याशीलप्रोज्झितः स्यात्कृ-
तघ्नः ११ स्वानुष्ठाने रतः स्यात्प्रबलमतिगुनः केंद्रसंस्थे सुरेज्ये विद्यासौख्यार्थयुक्तो भृगुशनिशशिनि तेऽध्याप-
कश्च प्रदिष्टः सूर्ये राजोपसेवी भवति धरणिजे शस्त्रवृत्तिर्द्विजन्मा शीतांशौ वैश्यवृत्तिर्दिनकरतनये सेवकश्चान्त्य-
जानां।१२

स्थे विद्याधरसौख्यान्वितः। बुधे केंद्रस्थे ध्यापकः सूर्ये केंद्रगे राजसेवकः। चंद्रे केंद्रगे वैश्यवृत्तिः। कृषिपशुपाल्यादिक
रः। भौमे केंद्रगे शस्त्रवृत्तिः। क्षत्रियवृत्तिः। शनौ केंद्रस्थे अन्त्यजानां म्लेच्छानां सेवकः। चकारद्वयेन। षष्ठाष्टगं चंद्रसूर्यभौमशनियुनाशुभ-
स्वशुक्रचंद्रान् यथाकथंचिद्वर्जयेत्। षष्ठेऽष्टमे शशधरे मरणं प्रयाति जीवे दिवाकरयुते विगुणोऽर्थहीनः क्रूरः कुजेन मृदुनापि गुणोल र॰म॰
सश्च सौम्यैः पटुगुरुरिपुभृगौ विकलाविति लघ्वोक्तत्वान्॥ १२ ॥ ॥१२॥ ॥१२॥ ॥१२॥ ॥१२ ॥१२॥ ॥ ५१

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथयस्यनवांशस्थेलग्नेयत्फलंतदाह। शन्यंशेइतिसुगमं १३ इतिब्रतवंधविधिः। अथयत्रलग्नेऽग्निपरिग्रहेकृतेऽग्निरुपशाम्यतितल्लग्नमाह। राशाविलग्नेइतिकर्तुराशौलग्नेजलचरराशौवालग्ने कर्किमीनमकरपरार्द्धजलराशयः। अन्येपिजलराशिनवांशे कुंभलग्ने कुंभनवांशेवा चंद्रेवालग्नेजातोग्निर्निर्वाणमुपैतिउपशाम्यति १४ अथयादृशेलग्नेऽग्निपरिग्रहः कार्यस्तदाह। त्रिकोणेति॥ रविभौमचंद्रगुरुषुत्रिकोणकेंद्रोपचयेषु। शेषेषुशनिशुक्रबुधेषुउपचयेषु वह्निपरिग्रहंकुर्यात् [illegible] एकादशमास्तुपचयस्थानानि

शन्यंशेस्तुदयतिमूर्खेनाचार्कभागेकूरस्त्वंभवतिचपापधीःकुजांशे। चंद्रांशेलतिमा[illegible]बुधेपटुस्तयज्ञस्त्वंगुरुभृगुभागयोर्दिशंति १३ इतिब्रतवंधविधिः। शशौविलग्नेतुचरेघटेवातदंशकेवाप्यथवाशशांके। आधानकाले द्विजपुंगवानांजातोपिनिर्वाणमुपैतिवह्निः १४ त्रिकोणकेन्द्रोपचयेषुसूर्येचंद्रेसुतेशीतकरेकुजेच। शेषग्रहेषूपचयस्थितेषुधूमध्वजोत्पादनमामनंति १५ चंद्रेपत्नीमृत्युगेमृत्युमेतिस्त्रिप्रेवह्निप्राध्यापकःस्यात्सुतेच। भानोःसूनौदेवपूज्येरवौचरोगैर्युक्तोदुश्चिकित्स्योद्विजेंद्रः १६ अशुभेषुधनेधनेनहीनोधनवान्सद्भिरथान्नदोविधोस्यात्॥

१५ अथाष्टमस्थेयस्मिन्यत्फलंतच्छालिन्याह। चंद्रेपत्नीति। चंद्रेपरिग्रहलग्नादष्टमेअग्निपरिग्रहकर्तुः पत्नीमृत्युंप्राप्नोतिभौमेऽष्टमेऽग्निपरिग्रहकर्त्ताम्रियते। रविगुरुशनिष्वष्टमेष्वपिवह्न्याध्यापकोऽग्निपरिग्रहकर्त्तादीर्घरुगार्त्तोभवति। शेषयोर्बुधशुक्रयोरष्टमगयोर्नशुभंनाप्यशुभमितिचकारात् १६ अथद्वितीयस्थानेयत्फलंतदौपच्छंदसिकेनाह। अशुभेष्विति। अशुभेषुपापग्रहेषुद्वितीयस्था

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

ऽग्निपरिग्रहकर्त्ताद्व्यहीनो भवति। धने द्वितीयस्थाने शुभैः शुभद्व्ययुक्तः। चंद्रे बुधस्थे ऽनन्तदाना भवति। बुधशनियुक्ते लग्ने अग्निहोत्रा ग्निलोकाग्निसंगमेति। नस्मिन्दीपादिना ज्वालनं प्रमादाद्भवति। एवं सति विविधिसंज्ञिना आग्नेयीष्टिः कर्त्तव्या। अग्निहोत्रगृहं ज्वल नेस्नामवन्संज्ञिनेष्टिर्भवति। तथा च कात्यायनः। गृहदाहे ऽग्न्येषामवनेग्रामाग्निना चेत्तनये विविक्तये रेणवा ह्मणो न संसर्गो ऽग्नौ हो मस्तदाहुः। यस्याग्नयो ग्रामेणाग्निना दह्येरन् कानत्रप्रायश्चित्तिरिति· सो ऽग्नये संवर्तकायाष्टकपालं पुरोडाशं निर्वपेत्। लल्लः। अग्ने विधौ वा बुधसौरयुक्ते कुलाग्निनावह्निरुपैति संगं १७ अथ कुजेन्दुजीवानां बलं विना ऽग्निपरिग्रहो न कर्य इत्याह। कुजेन्दुजीवैरि

उदये सबुधार्कजे ऽथ चेद्धौ ज्वलनो लोककृशानुसंगमेति १७ कुजेन्दुजीवै रिपुराशिसंस्थैः पराजितै नी

चगहे परैर्वा। अस्तंगतैर्वाग्निपरिग्रहं यः करोति हासं विदुषां स याति १८ लग्नस्थे धनुषि गुरुएव यत्रि

ये वा भूसूनौ दशगे ऽथ सप्तमे वा। ति। भौमचंद्रगुरुभिः शत्रुराशिसंस्थैः नी[illegible]ः अस्तंगतैः सूर्याच्छादितैर्वा यो ऽग्नि

परिग्रहं करोति तस्याग्निहोत्रमनत्र विनश्यतीत्यर्थः। शत्रुमित्रस्वभावा गुक्तमेव। परस्परं तारा[illegible]हाणा[illegible] दक्षिणदिक्स्थाः पराजिताः शु

क्रस्तूत्तरसंस्थः तथा च वाराहसंहितायां। सर्वे बलिनः उदक्स्था दक्षिणदिक्स्थो बलवान्युक्तः शुक्रो दक्षिणस्याम् अन्यश्चोत्तरस्था

तयोः के बलवानिति वाराहेणोक्तं। दक्षिणदिक्स्थः पुरुषो वेपथुरप्याप्तनिवृत्तो ऽन्यः अधिरूढो विकृतो निःप्रभो विवर्णश्च यः सजि।

नः उक्तविपरीतरूपो बलवानिति। कर्कटराशौ भौम नीचः वृश्चिके चंद्रे नीचः मकरे गुरुर्नीचः वदति १८ अथ[illegible]यादशो लग्ने ग्रहहीनाग्निर्यज्वा भवति

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्रतत्रराशिस्थिते भौमे दशमसप्तमराशिस्थे रवौ चंद्रे च त्रिषडेकादशस्थे विधौ वेनिवाशत्रुसुखार्थे। जनानिर्वदहीनाग्निर्यत्तत्कृत् यन्त्रा
भवति। तथा चरस्थे वत्तवल्लभे। चापेगेगिरिसिलग्नगेऽथवा मेषगे भूसुते खेऽस्तगे पिवा। शीतगौ त्रिरिपुगेऽथवा यगेय त्तत्क्षज्जनितः
पावको भवेत् भास्करव्यवहारेपि। लग्नगते कार्मुकगे गुरौ वा भौमेऽथवा रवौऽस्तगते क्रूपस्थे। भानौ त्रिषडायमतो यवा व द्वा हिनः सो
भवनामुपैति १९ इति श्रीमहादेवविरचिते रत्नमालाविवरणे संस्कारप्रकरणं त्रयोदशम् १३ सांप्रतं राजाभिषेकप्रकरणमारभ्य
ते। तत्रादौ वेववपेषु सबले राजाभिषेकलग्नं विलोक्य नानुपजात्याह। जन्मलग्नाधिपतिर्लग्नेशः जन्मेशः जन्मकाले यत्र राशौ चंद्रः।

तिग्मांशौ शैसहजषडायगे विधौ वा ज्ञाताग्निर्यजनितसंशयो हि जेंद्रः १९ इति संस्कारप्रकरणं १३ विलग्न
जन्मेशदशाधिनाथमार्त्तेराड्धात्रीननयैर्वलिष्ठैः गुर्विन्दुशुक्रैः स्फुरदंशुजालैर्महीपतीनामभिषेक इष्टः
१ सुहृत्त्रिकोणस्वगृहोच्चसंस्थाः श्रियं च कीर्तिं च दिशंति खेटाः। १ स्थित लग्नराशिपतिः। अभिषेकसमये यस्य ग्रहस्य

दशावर्त्तते स दशाधिपतिः। एतेषु बलयुक्तेषु रविभौमयोः सबलयोः शुक्रचंद्रगुरुभिरनस्तमितैर्ल्लसत्किरणै राजाभिषेकः का
र्यः १ अथ ये ग्रहाः पूर्वकथिताः स्तैर्मित्रत्रिकोणोच्चस्वराशिस्थैर्यो दशाफलं तदुपजात्याह। जन्मेशलग्नेशदशाधिपतिगुर्विन्दु
शुक्राः स्वराशिमित्रराशित्रिकोणस्था ग्रहा लक्ष्मीकीर्तिं प्रयच्छन्ति। विशेषेण जन्मलग्नेशदशाः कीर्तिश्रीकारिणाः। तथा चल
ग्नः मित्रस्वोच्चत्रिकोणस्थे ग्रहैः श्रीकीर्तिसंयुताः नीचशत्रुगृहस्थैः स्यात्तत्कालमपशोऽविषाज्जन्मलग्नेशदशेशादिन भर्तृषु।

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

यस्मात्तस्मात्प्रयत्नेन सौस्थ्यमेषां प्रकल्पयेत्। अत एव ग्रहा अस्तंगताः शत्रुभनीचगा भयं शोकं चाभिषिक्तस्य कुर्युः २ अथ यादृशे लग्नेऽभिषेकः कार्यस्तदिङ्द्वयेनाह। जन्मभादिति। जन्मराशिरुपचयेन यास्थिरराशौ च शीर्षोदयाः सिंहकन्यातुलवृश्चिकमिथुनास्तेषामन्यतमलग्ने। तथा च वृहज्जातके। गोजाश्विककर्किमिथुनाः समृगा निशाख्याः पृष्ठोदया विमिथुनाः कथितास्त एव शीर्षोदया दिनबलाश्च भवंति शेषाः लग्नं समेत्युभयतः पृथुरोमयुग्मं। वृषमेषधन्विककर्किमिथुनमकराः षड्राशयो रात्रिबलसंज्ञकाः ते एव षड्राशयो मिथुनवर्जिताः पृष्ठोदयसंज्ञकाः पृष्ठोदयं यांति वृषमेषधन्विककर्किमकरेभ्यः। सिंहकन्यावृश्चिककुंभाः शीर्षोदय

अस्तंगताः शत्रुभनीचगास्ते भयाय शोकाय भवंति राज्ञां २ जन्मभादुपचयेन यास्थिरे लग्नवर्त्तिनि चमस्त
कोदये सद्ग्रहैश्च सहितेऽवलोकिते क्रूरदृष्टिसमुपास्तिवर्जिते ३ ॥

संज्ञका भवंति। दिनबलाश्च भवंति शिरसा उदयं यांति। पृथुरोमयुग्मं मीनसंज्ञकं लग्नं उभयतः पृष्ठशीर्षाभ्यां समेति उदेति इत्युभयोदयसंज्ञकमिति। श्लोकार्थः शुभग्रहयुतदृष्टे। पापग्रहयुतदृष्टिहीने। ताराबले चंद्रबले च। शुभग्रहवारे। रिक्तावर्जिते तिथौ च। द्वादशाष्टमद्विपंचनवमकेंद्रेषु शुभग्रहयुतेषु। पापैर्वर्जितेषु राज्ञामभिषेकः कार्यः। अत्र यद्यपि सामान्येन सद्युतव्ययत्रिकोणकंटकस्वाष्टमेष्विन्दुर्युक्तं तथापि व्ययाष्टवर्ज्यं सद्युतिस्तैया। व्ययरिपुमृत्युजितं वर्ज्यमिति वचनात्। अत एव सद्युतग्रहेणाग्रगुणीभूतास्थान्यो वर्ज्यंयति। तथा च दैवज्ञवल्लभे। केंद्रत्रिकोणसहजायधनेषु सौम्यैः कीर्तिश्रियं वितनुते विहितोऽभिषेकः सद्युतेष्वन्यत्रानुपयुक्तमपि व्ययाष्टमयोरुपादानमत्राशुभस्थानं योगनिरासं ५२

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृषमेषधनुःकर्कटमकराशयःएतेपंचराशयःपृष्ठोदयाःरात्रिबलाःसिंहकन्यावृश्चिककुंभाःशीर्षोदयसंज्ञकाभवंतिदिनबलाश्च।मीनराशौउभयतःपृष्ठोदयशीर्षोदयोरात्रिदिनबलश्च॥

तथाचलल्लः।त्रिकोणकेंद्राष्टधनव्ययेषुक्रूरैरयुक्तेषुशुभोऽभिषेकः३।४अथक्रूरग्रहाणांस्थानस्थफलंकुर्वंतितत्क्लिष्टवरिएयाह।धनान्यस्थैरि
ति।क्रूरग्रहैर्द्वितीयद्वादशस्थैर्द्रव्यवियुक्तोराजाभवति।लग्नस्थैरोगी।चतुर्थसप्तमस्वरस्थैर्भ्रष्टराज्यः।पंचमस्थैःसौख्यहीनः।नवमस्थैर्द्धर्म
हीनः।अष्टमस्थैरल्पायुः।त्रिषडेकादशगैःसुखद्रव्ययुक्तोराजाभवति५अथषष्ठाष्टचंद्रस्यशुभग्रहस्यचफलमालिन्याह।चंद्रेशुभग्रहे

नारकाशशभृतोबिलेद्विनेसद्ग्रहस्यचतिथावरिक्तके सद्युनव्ययत्रिकोणकंटकस्थाष्टमेषुरहितेष्वसाधुभिः
४धनान्यस्थैःक्रूरैर्भवतिनिधनोरोगभाग्लग्नसंस्थैश्चतुर्थेद्यूनस्थेश्च्युतिनिजपदःपुत्रगैःसौख्यहीनः
निरुद्योगःखस्थैःशुभविरहितोधर्मगैस्तान्तरेंद्रोनिरायुर्मृत्युस्थैःसुखधनयुतस्त्र्यायशत्रुस्थितैश्च ५ नि
धनरिपुगृहस्थेशीतगौपापदृष्टेयमनगरमुपैतिद्राक्नृपःसद्ग्रहेच व्ययमृतिरिपुवर्ज्जंसत्फलंद्युरिष्टाःसकल
भवनसंस्थानेष्वनिष्टाश्चतेस्युः६यस्याभिषेकसुराज्ञ मंत्रीभवेद्विलग्नेयदिवात्रिकोणे शुक्रोवरेशत्रुगृहेम
हीजःसमोदतेप्राप्यचिरायलक्ष्मीः७त्रिलाभसंस्थौशनितिग्मरश्मीमेषूरणेवधुगृहेगुरुश्च॥ चषष्ठाष्टमेपापदृष्टेराज्ञो

मृत्युः।शुभाश्चद्वादशाष्टमषड्वर्ज्जेशोभनंफलंप्रयच्छंति।तेषुद्वादशाष्टषड्।तेशुभाअनिष्टानशुभाःस्युरित्यर्थः६अथयादृशेलग्नेअ
भिषिक्तश्चिरंपृथ्वीपरिपालयतितदुपजात्याह।यस्येति।यस्याभिषेकलग्नेगुरुः।त्रिकोणेलग्नान्नवमपंचमेवाशुक्रोदशमे।भौमःषष्ठेसचि
रकाललक्ष्मींप्राप्यविलसति७अथपरस्मिन्योगेलक्ष्मीःस्थिरादीर्घायुषोभवतितमुपजात्याह।शनिसूर्यौयथासंख्यंत्रिलाभगौ८।

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्थे दशमे वा गुरुः एवंविधे योगे यस्याभिषेकः कृतस्तेन सदीर्घायुः सुखी लक्ष्मीः स्थिरा भवति। तथा च दैवज्ञवल्लभे। तृतीयलाभस्थितयोर्यमार्कयोर्गुरौ चतुर्थे यदि वाम्बरस्थे। लग्ने तु विशेषउक्तः उग्रैर्वीर्ययुतैरुग्रः सौम्यैः सौम्यः प्रजापतिस्त्रिकोणकेन्द्रगैर्मिश्रैर्ग्रहैर्मिश्रः क्षितीश्वरः। राजयोगाश्च योगाश्च चन्द्रयोगास्तथा शुभाः सर्वेप्यत्र विकल्प्याः स्युर्वास्तु लग्नगुणाश्च ये ८ इति महादेवविरचिते रत्नमालाविवरणे राजाभिषेकप्रकरणं चतुर्दशोध्यायः १४ अथाभिषिक्तस्य राज्ञो विजययात्रालग्नस्य प्रकरणमारभ्यते। तत्रादावेव प्रकरणसंबंधमुपजात्याह। यात्राभिधानमिति। सर्वैः शौर्यादिभिर्गुणैः उपेतस्य युक्तस्य जिगीषोः नृपस्य यात्रालग्नं कथयिष्यामीति संबंधः जिगीषो

यस्मात्त्रयोगे क्रियतेऽभिषेकः संपत्स्थिरा तस्य चिरायुषः स्यात् ८ इति राजाभिषेकप्रकरणं चतुर्दशः १४ यात्राभिधानं कथयाम्यथातः सर्वैरुपेतस्य गुणैर्जिगीषोः अतर्किते जन्मनि यस्य याने फलाप्तिरुक्ता घुणाक्षरेणतुल्या १ अज्ञातजन्मनोप्यस्मै प्रश्नोदयस्य लग्नं योज्यमिति स्मृतौ। इत्युपलक्षणं सा मन्त्रादीनामपी दमेव लग्नं सिद्धिकृदिति। तस्य राज्ञो जन्मन्यतर्किते अज्ञाते। यात्राफलस्य प्राप्तिर्घुणाक्षरतुल्या कदाचिद्भवति कदाचिन्न भवति। तस्माज्जन्मज्ञाने दशायुर्ग्रहबलान्यवलोक्य यात्रामुहूर्तं कथयेदिति। तथा च तल्लः। होराराशौ स्थाने सपरिग्रहे ग्रहाणां च। आयुषि च परिज्ञाने शुभमशुभं वा फलं वाच्यम्। भास्करस्य व्यवहारेपि। एकः स्वराशिमित्रेण तद्वर्मेनाथवोदये। स्थितेन नीयते जंतुः सार्वभौमत्वभूतताम्। अत्रोक्तरालंकारैः केनापि स्पष्टं जन्मकाललग्नवद्यात्रालग्नफलं यात्रालग्नफलं जन्मलग्नफलावलोकनं विना न सफलं भवतीति जन्मलग्नस्यैव बलवत्त्वमिति १ अथ जन्मलग्नाज्ञानेपि ५४

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृच्छालग्नशकुनउपश्रुतिप्रभृतिभिर्निमित्तैःशुभाशुभफलेज्ञातेसति। यतः प्रश्नलग्नफलमपिजन्मलग्नफलतुल्यं। तथाचविद्वज्जन्म
वल्लभायां। संप्रेक्ष्यमाणाद्यवशंशरीरिप्रसूहृदैवेनशुभाशुभेन। ज्योतिर्विदः सन्निश्चिरंत्रयस्मात् प्रश्नेतोप्यलग्नसमः फलेन। अत्रच
लग्नाज्ञेअनुमानालंकारैः प्रश्नशकुनादिभिः शुभैःशुभग्रहदशाफलमनुमीयते। अशुभैरशुभग्रहदशाफलमनुमीयते। ननुजन्मलग्ने
पिस्वोच्चमित्रस्वगृहादिषुसत्फलं। नीचशत्रुक्षेत्रादिष्वसत्फलंतच्चयात्रालग्नमाहजन्मेतिकथंजन्मलग्नस्यैवबलवत्वमिति। सत्यं
। जन्मलग्नेयत्स्वोच्चादिसत्फलंनीचाद्यसत्फलंग्रहाःकुर्वंतितत्सत्यमेवदैवशेनतरिमन्नेवकालेजन्मसंभवात्। नैवंयात्राका॥

प्रश्नोदयनिमित्ताद्यैर्विज्ञातेसदसत्फले२ जन्मराशिकृतजन्मविलग्नंतत्पतीउदयगोयदिवास्तः आय
कर्मरिपुभान्यथतताभ्यांशत्रुसंक्षयमवेहितदानीं ३॥ लोतस्माज्जन्मलग्नस्यैवप्राधान्यमितितथाचलघुजातके य
दुपचितजन्मलग्नैः शुभाशुभंतस्यकर्मणः पंक्तिः। व्यंजयतिशास्त्रमेतत्तमसिद्रव्याणिदीपइव॥ २॥ अथजातजन्मनोपियादृशे।
नलग्नेनजयोभवतितत्स्वागतोपृच्छदसिकाभ्यामाह। जन्मकालेयत्रराशौचंद्रःसजन्मराशिः॥ जन्मकालेपल्लग्नंततोजन्मरा।
शिस्तदधियोवापृच्छालग्नेभवति। अथवाजन्मलग्नेनतदधियोवापृच्छालग्नेभवति॥ अथवाताभ्यांसकाशात्जन्मराशेर्जन्म
लग्नाद्वासकाशात्यान्युपचयानित्रिषडेकादशराशयस्तेपृच्छालग्नेभवंतितदाशत्रुसंक्षयंजानीहि॥ इतिगर्गोक्तिःप्रश्ने
कृतेएवंविधेलग्नेराजाशत्रून्क्षयनीत्यर्थः ३२॥ श्री॥ श्री॥० ॥३॥ श्री॥३ ॥३॥ ॥३॥ ॥७॥ ॥०॥॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र॰मा॰ अथप्रकारांतरमाह। इदमपीति। शत्रोर्जन्मराशिर्जन्मलग्नं वा नरधिपो वा चतुर्थे सप्तमे वा स्थाने भवतः। ताभ्यां राशिजन्मलग्नाभ्यां
टी॰ शकाशात् षड्पंचप भवनानि चतुर्थे सप्तमे वा भवंति। तदापि जय एव। अथ वा शीर्षोदयराशिः शुभग्रहो षड्वर्गो वा लग्ने भवति। तदा
५५ पि पातुर्जय एव। तथा च दैवज्ञवल्लभे। जन्मोदयप्रसवभे यदि वा तदीशौ ताभ्यां यदीशपचयभं समवेक्ष्य लग्नं। प्रष्टुर्हतोऽरिरिति वाच्यम
नेरिहं वायदध्वुसंस्थमथवास्मरसंप्रयुक्त ४ अथ पादृशे लग्ने प्रष्टुर्यात्राफलं यात्रा च भवति तदुपेंद्रवज्रयाह। चरराशिप्रश्नलग्नतः

इदमप्यरिसंभवं यदाऽस्ते हिबुके वा विजयस्तथापि पातुः। शिरसोदयगेतियच्चराशिर्जयहृत्सोप्युदयेन
शेषवर्गः ४ करोति राशिर्गमने फलं च चरो विलग्ने शुभदृष्टियुक्तः। स्थिरोदये साक्रमनेन पातुः शुभं शुभे
दृष्टियुते हि वाच्यं ५ द्विमूर्तिराशावुदयं प्रपन्ने क्रूरग्रहैर्युक्तनिरीक्षिते च। प्रयाति यद्यप्यवुधस्तदानीं
विवर्त्तते शत्रुजनाभिभूतः ६ मनोरमो भूर्यदि पृच्छतः स्यान्मागल्यवस्तुश्रुतिदर्शनेस्तः॥ ॥ शुभग्रहदृष्टियुतः

प्रयाणे शत्रुजयं च करोति। स्थिरराशिर्गमनं न। तौ चरस्थिरौ पापयुतदृष्टौ विघ्नकरौ भवतः। शुभयुतदृष्टौ शुभकरौ मेषादयो यथासं
ख्यं चरस्थिरद्विस्वभावसंज्ञाः ५ अथ यादृशे पृच्छालग्ने कर्तुरनिष्टं तदाह। द्विस्वभावराशौ मिथुनकन्याधनुर्मीनानामन्यतमे प्र
लग्ने पापग्रहैर्युक्तनिरीक्षिते च यदि राजा प्रयाति तदा पराजितो भवति ६ पृच्छालग्नमभिधाय प्रष्टु ष्टाफलमाह। यदि पृच्छालग्नशा रम॰
द्वलास्याच्छन्नाजलासन्नासुसमार्ज्जिताभूर्भवति। तथा च विद्वज्जनवल्लभायां। खुरचरणगतावनीचरम्ये फलकुसुमद्रुमशालिनि प्रदेशे॥ ५५

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जवव्रतिधनगोमपार्द्धफेनेभवतिशुभंध्रुवमेवपृच्छकस्य॥ अथमंगलवस्तूनांदूर्वासनानांदर्शनेश्रवणंवाभवतिप्रष्टाचमहत्ता।
आदरेणपृच्छतिनद्राजपोवाच्यः ७ अथयेषुनक्षत्रेषुप्रयाणंकार्यंतानिनवीपजान्याहसुगमं ८ अथपरिघमाह। कृत्तिकायाः प्र
भृतिसप्तनक्षत्राणिपूर्वस्यां। मघायाः प्रभृतिसप्तदक्षिणस्यां। अनुराधायाः प्रभृतिसप्तपश्चिमायां। धनिष्ठायाः प्रभृतिसप्तोत्तर

स्यांद्वारांगच्छतिचग्रहत्तंनद्वादिशेदस्तिजयस्तवेति ७ हस्तेन्दुमैत्रश्रवणाश्विनिष्यपौष्णश्रविष्ठाश्च
पुनर्वसुश्च। श्रेष्ठानिधिष्ण्यानिनवप्रयाणेत्यक्त्वात्रिपंचादिमसप्तताराः ८ कार्शानवास्त्रभृतिभानिभवंति।
सप्तसप्तक्रमाच्चतसृणांककुभामपोह। वायव्याग्नेयकुपुष्पतिबद्धरेखातिर्यक्कुस्थितापरिघएष
नलंघनीयः ९ नैन्द्रीमैन्द्र्यमदिशिमित्रपान्त्राजयादेप्रतीचीनोरोहिणपाधपतिदिशंफाल्गुनीषून्नेरासु। शूलानी
तिस्फुटमभिहितान्येषुयेयान्तितेषांप्रत्याहत्तिर्गगनकुसुमोद्बोधकालेयदिस्यात् १० प्रयोजनेष्वात्ययिके
षुभूपतिर्विलंघ्यरेखामपिपारिघंव्रजेत्॥ ११ ॥स्यां। नक्षत्राणिक्रमाद्विन्यसेत्। ततोवायव्याग्निदिशोस्तिर्यग्रेखायांसापरिघः
। एषनलंघनीयः। पूर्वद्वारभैरुत्तरद्वारभैश्चपूर्वोत्तरयोर्गच्छेत् ९ अथनक्षत्रदिक्शूलमाह। ज्येष्ठायांप्राचींनगच्छेत्। पूर्वभाद्रपदा
सुनदक्षिणस्यां। रोहिण्यानपश्चिमायां। उत्तरफाल्गुन्यांनोत्तरस्यां। एषगच्छतांपुनरागमनेयत्रागगनपुष्पंभवतितत्राभवतीत्यर्थः
॥ १० अथपरिघदिक्शूलयोरपिकिंवलवदित्याह॥ आत्ययिकेषुकार्य्येषुपरचक्रागमनादिषु॥ ०॥ ०॥ ॥ ७॥ ७॥ ।७।

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र॰मा॰ परिघं लंघयेदनुमूलनक्षत्रेषु लग्नशुद्धावपि न गच्छेत्। मेषाद्यः क्रमात्पूर्वादिदिङ्नाथाः एवं सिंहाद्या धनुराद्याश्च पूर्वादिदिङ्नाथा भ
टी॰ वंति। तेषु लग्नेषु यस्यां दिशि प्रयाणं कर्तुमिष्यते तद्दिग्लग्नं यदि ग्रहबलोपेतं दोषरहितं च स्यात्तदा गच्छेदित्यर्थः ११॥ अथ
५६ विदिक्षु येन नक्षत्रेण गंतव्यं तच्छालिन्याह पूर्वद्वारभैः कृत्तिकादिसहितसप्तनक्षत्रेषु आग्नेयीं व्रजेत्। एवं विपूर्वाशादिशः विदिश
इति यावत्। ताः सर्वा अपि विदिशो विचार्याः प्राग्दक्षिणमिति प्रदक्षिणक्रमेण तथा च दक्षिणद्वारभैर्मघादिभिर्नैर्ऋतीं। पश्चि

विहाय दिक्शूलसमाह्वयानुडून्यदि स्वदिग्लग्नविशुद्धिराप्यते ११ यायात्पूर्वैर्द्वारिकैरग्निकाष्ठां प्राग्दक्षि
णं चैवमासादि पूर्वाः पुष्यो हस्तो मैत्रमप्याश्विनं च चत्वार्याहुः सर्वदिग्द्वारिभानि १२ चित्राविशाखानल
याम्यसार्पवायव्यपित्र्येश्वरदैवतानि यात्रास्वनिष्टान्यपराणि भानि स्मृतानि नेष्टानि न निंदितानि १३
पूर्वाह्णे ध्रुवमिश्रभैर्न गमनं नोग्रैर्न मध्ये दिने श्रेष्ठं नापरवासरे च लघुभिर्मैत्रैर्न रात्रौ सुखं ॥:९:॥

मद्वारभैरनुराधादिभिर्वायव्यां उत्तरद्वारभैर्धनिष्ठादिभिरैशान्यां व्रजेत्। हस्तानुराधापुष्याश्विन्यः सर्वासु दिक्षु गच्छेत् तेषु परिघदोष
इति १२ अथ नक्षत्राणि यात्रायां विरुद्धानि यानि च समानि तान्याह। शेषाणि रोहिणी पूर्वात्रयोत्तरात्रय ज्येष्ठा मूलशतभिषक् एतानि न नि
षिद्धानि नाप्युत्तमानीत्यर्थः १३ अथ येषु नक्षत्रेषु यस्मिन्काले न गंतव्यं तमाह। ध्रुवमिश्रनक्षत्रैः पूर्वाह्णे दिनस्य प्रथमे भागे न यायात्। रा॰म॰
नोग्रैर्न मध्याह्ने दिनस्य द्वितीये भागे लघुभिः क्षिप्रैरपराह्णे दिनस्य तृतीयभागे। मैत्रैर्मृदुभिर्न रात्रिप्रथमभागे ॥०॥०॥०॥ ५६

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उग्रैर्नेमध्यरात्रसमये। चौरैर्रात्रिशेषे। हस्तपुष्यमृगश्रवणैः सर्वेष्वेव कालेषु व्रजेत्॥१४॥ अथ चंद्रादित्यायनवशेन यात्रायाः फलं वसंततिलकेना
ह। तिग्मांशुशशिनः सूर्यचंद्रयोर्येऽयने उत्तरायणदक्षिणायने तयोरनुकूलमनुरूपउत्तरायणदक्षिणायनयोर्गमनं यात्राप्रयाणं प्रशस्तं सिद्धि
कारि भवतीत्याहुर्वदंति। अयमर्थः यदा सूर्यचंद्रौ मकरादिराशिषट्के। भवतस्तदा पूर्वमुत्तरां च गच्छेत्। यदा पूर्वचंद्रौ कर्कादिराशिषट्के भवतः।
तदा दक्षिणां पश्चिमां च गच्छेत्। अथ सूर्यो मकरादिराशिषट्के चंद्रः कर्कादिराशिषट्के अथवा सूर्यः कर्कादिराशिषट्के चंद्रो मकरादिषट्के। त
दा किं कार्यमित्त आह। उभयोरुपपत्त्यभावे यायाद्दिवानिशमिति। उभयोः चंद्रसूर्ययोः उपपत्त्यभावे एकायनासंभवे यथासंख्यं दिवानिशं।

उग्रास्त्यैर्नेत्रमध्यरात्रसमये नेष्टं निशांते चौरैः सर्वेष्वेव करैन्द्रवेज्यहरिभिः कालेषु यात्रा शुभा॥१४॥ तिग्मांशु
राश्ययनयोरनुकूलमाहुर्यानं प्रशस्तमुभयोरुपपत्त्यभावे॥ यायाद्दिवानिशमसंशयमन्यथा तु यातुर्भवंति
बहुधा वधबंधदोषाः॥१५॥

गच्छेत्। अयमर्थः। यदा सूर्यो मकरादौ तदा दिने पूर्वां उत्तरां च गच्छेत्। यदा चंद्रो मकरादौ तदा रा
त्रौ पूर्वां उत्तरां च गच्छेत्। सूर्ये कर्कादिस्थे रात्रौ दक्षिणां पश्चिमां च गच्छेत्। अन्यथा रविचंद्रयोर्मकरादिस्थयोर्दक्षिणपश्चिमगमनं क
र्कादिस्थयोः पूर्वोत्तरगमनं सूर्ये मकरादिस्थे दिवा दक्षिणपश्चिमगमनं॥ चंद्रे वा कर्कादिस्थे रात्रावुत्तरपूर्वगमनं कर्तुर्वधबंधका
रि भवति। तथा च रत्नकोशे। यत्नोऽयनं दिवसकरोडुनाथयोस्तनोव्रजेद्विपुनिधनाय पार्थिवः। तथायनेयुगपदेकसंस्थयोर्युनक्तयोर
विशशिनोर्व्रजेत्तदा। अयने गतयोरर्कसोमयोर्द्युनिशं वास्थितयोः पृथक्पृथक् विदुषामिव शास्त्रचिंतनं समवाये द्विषतां विराजते॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिनकरप्रतप्तमकराद्यं तु नरां च पूर्वीं च। कर्कटाद्यौ पापाच्च याम्या एं प्रतीच्यां च।१५ अथ वारशूलान्याह। येषु पुनः प्रयांति तेषां कार्यसिद्धिर्न भव
ति। चंद्रभौमशनिरविवाराः सर्वदिक्षु न व्रजेत्। तथा च लल्लः। सूर्यदिने र्थविनाशः ध्वंसे शनिक्षयो महानिश्च। ज्वलनास्त्रक्पितरुजः कौ
जे वाधे सुहृत्प्राप्तिः। जीवे जयधनलब्धिः शुक्रे स्त्रीवस्त्रधनलाभः। दैन्यवधबंधरोगान्प्राप्नोति गतोर्कपुत्रे। राहू किंशिखिविस्तारस्त
इन्दुस्तु कथित आक्रंदः। गुरुबुधसौराः पौराः पौरः सूर्योपि पूर्वाह्ने। रविशशिसुरगुरुमंदाः कुलग्रहा उपकुलास्त्रयः शेषाः उभयास्त
शोत्तनयो मध्यस्थः संधिशीलश्च १६ अथ प्रतिशुक्रं वर्जयितुकामो यासु दिक्षु शुक्रः सन्मुखो भवति ता आह। यस्यां दिशि प्राच्यां प्र

शुक्रादित्यदिने न वारुणदिशं न त्रेकुजे चोत्तरां मंदेन्द्वोश्च दिने न शक्रककुभं याम्यां गुरौ न व्रजेत् शूलानी
ति विलंघ्य यांति मनुजा ये वित्तसौख्याशयाः भ्रष्टाशाः पुनरापतंति यदि ते शक्रेण तुल्या अपि १६ उदयति दि
शि यस्यां याति यत्र भ्रमाद्वा विचरति च भचक्रे येषु दिग्द्वारभेषु॥ नीच्या वा उदयति यस्यां च भ्रमति उदयकालात्प्रागहर्नि
शं च एकैकस्यां दिशि याने न स्त्र्यंबुध्नमति। सूर्यभ्रमणं च वत्सराजेनोक्तं। दग्धा दिगैशी ज्वलिता दिगैन्द्री धूमान्विता वानलदिक्प्रभाते
। प्रत्येकमेव ग्रहरानेकान्भुंक्ते दिशोष्टौ गणनाक्रमेण। दग्धादिगुक्ता दिननाथमुक्ता सवितृयुक्ता भवति प्रदीप्ता। सा धूमिताया भव
ति प्रभाता शेषा दिगंताः खलु पंचशांताः। तस्यां सन्मुखः कृत्तिकादिषु परिघान्केषु नक्षत्रेषु यद्दिग्वारभेषु चरति तस्यां च संमुखः
॥ तथा चैवतवल्लभे। धनिष्ठादिकमश्लेषापर्यंतं भगणं भृगुः॥ यदा चरति नो दीचीं च न तदा व्रजेत्॥७॥ ॥७॥ ॥७॥ ॥७॥७॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अत्रविधेपि सन्मुखत्वेपि यस्यां दिशि बुधे इति सेयं यत्नात्त्याज्या। अन्यास्वपि सन्मुखदिक्षु आत्यायिककार्ये विना गच्छेत् १७ अथ प्रतिशु
क्रे गच्छतो प्रयाणवैजयी अस्तंगते च शुक्रे सर्वथा यान निषेधं चोपजात्याह। स्फुटार्थमिदं १८ अथ नीचादिस्थे शुक्रे गच्छतो फलमाह नी
चगो कन्यारथे ग्रहजिते तारा ग्रहयुद्धे नोत्तरदिक्स्थे। प्रतिलोमे वक्रगे सन्मुखे च। कलुषिते दीप्तिरहिते। अस्तमिते सूर्यवशादस्तंगते
शुक्रे राजा गच्छन् पराजयं प्राप्नोति। तथा च ल्लः वक्रमवलंबमाने दिक्प्रतिलोमेन यास्त्सुपजाते। भृगुतनये नृपाणां न यात्राकालं प्र

त्रिविधमिह सितस्य प्रोच्यते सन्मुखत्वं मुनिभिरुदितमेवं न्यज्यते नत्र यत्नात् १७ स्वल्पोपि नार्थः प्रतिशुक्र
॥ याने यियासतो सिद्धिमुपैति याने। कामं व्रजेद्युप्रतिशुक्रमस्तगते तु यायान्न जिगीषुरत्र १८ नीचगे
ग्रहजिते प्रतिलोमे भार्गवे कलुषिते ऽस्तगते वा प्रस्थितो नरपतिः प्रबलोपि क्षिप्रमेव वशमेति रिपूणां १९॥
एवंविधे प्यास्फुजिति प्रयायाद्बुधो यदि स्यादनुकूलवर्ती॥ श्रं संति। उक्तं च एकग्रामे पुरे वापि परिणयनविधौ धर्मतीर्थाभियाने
दुर्भिक्षे चाथभीते न हि दनुजगुरुर्विघ्नेसन्मुखो वा त्र। वासिष्ठात्रेयवत्साङ्गिरसभृगुसुवाकस्य यो त्रिषु वापि भारद्वाजा दस्यसु द्विजवरनिवहाः
कौत्सयन्येवमाद्याः १९ अथ शुक्रादपि बुधस्याधिकफलत्वमाह। वरं नीचादिस्थो शुक्रे गच्छेत् न पुनः प्रतिबुधमिति। बुधानुकूलप्रतिशुक्र
यायादिति वदता ग्रंथकृता बुधस्याधिकफलत्वमुक्तं। न पुनः प्रतिशुक्रं यानमिति। तथा नीतिशास्त्रे। वरं हालाहलं पीतं सद्यः प्राणहरं
विषं। न तु दृष्टं धनाढ्यस्य भ्रूभंगकुटिलं मुखं। अत्र न विषभक्षणं विहितं किं तु कुपितधनाढ्यमुखावलोकनप्रतिषेधः॥ ॥ ॥०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

नौबुधशुक्रौप्रयाणेसम्मुखदक्षिणौवर्जनीयौ।तथाचलल्लः।वारुण्यांदिक्षुदिनेशुक्रेपूर्वोत्तरदिशौयायात्।प्राच्यांदिक्षुदिनेपुनरपरयाम्येदिशौयायात्।उपनयनेगोदानेपाणिग्रहप्रवेशगमनानि।अस्तमितेषुनकुर्यात्सुरगुरुभृगुपुत्रचन्द्रेषु।पूर्वाह्णेउत्तरांगच्छेत्मध्याह्नेपूर्वतोव्रजेत्।अपराह्णेव्रजेद्याम्यामर्द्धरात्रेतुपश्चिमं।ततस्तांगारजंविष्टिंत्रिशनैश्चरजंभयं।व्यतीपातोनदुष्टःस्याद्यस्मात्कोदक्षिणेस्थितः २०अथाष्टानामपिदिशामधिपतीनाह।रविशुक्रभौमराहुशनिचन्द्रबुधगुरवःपूर्वादिदिशामधिपतयः ततोदिक्पतौललाटगेसम्मुखेनगच्छेत्। योग्रहोयस्यांदिश्यधिपतिःसतत्रस्थोललाटगइत्यभिधीयते।तथाचरत्नकोशे।योधिपतिर्दिशियस्यांतस्मिन्स्थितेनतांगच्छेत्

प्रतीन्दुजंभूमिपतेर्गतस्यनान्येग्रहास्त्राणविधौसमर्थाः२० दिशामधीशारविशुक्रभौमतमोयमेन्दुज्ञजसू
रयःस्युःललाटगेनप्रवशेद्दिगीशेगंतव्यमस्मिन्वलुकंटकस्थे २१जननसमयलग्नात्वैधनेजन्मभाद्वा
निजरिपुभवनाद्वाशत्रुभेलग्नयाते॥ २१अनुकूलेचदिगीशेगंतव्यंकंटकोपगते।लग्नस्थेर्केनपूर्वस्यांदशमस्थेभौमेनदक्षिणस्यां।सप्तमस्थेशनौनपश्चिमायां।चतुर्थस्थेबुधेनोत्तरस्यांगच्छेत्।एवंविदिक्षुदिक्पतिसम्मुखत्वंविलोक्यं।तथाचमार्तंडः।लग्नेर्केव्यय१२लाभ११गेभृगुसुतेकर्मे१०स्थितेभूमिजेराहौधर्म९विनाश८पोरविसुतेद्यूने७ऽरि६सुन्वौ५विधौबंधौ४ज्ञेसहजार्थयोः३२सुरगुरावेवंललाटोद्भवेयोगेनाशमुपैतिमानवपतिःपूर्वादिकाष्ठंगतः२१एवंनक्षत्रवारादिवारंदिगादीनांफलमभिधायसंप्रतियात्रेशोलग्नेनगंतव्यंतदाहजन्मलग्नाज्जन्मराशेर्वाअष्टमराशौलग्नगे।अथवास्वशत्रुलग्नात्शत्रुजन्मराशेर्वाषष्ठेराशौलग्नगे ८॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथवा जन्मलग्नजन्मराशितो यौ अष्टमौ राशी तत्पतिभ्यां लग्नगाभ्यां शत्रुजन्मलग्नात् शत्रुजन्मराशितो वा यौ षष्ठौ राशी तत्पतिभ्यां वा। लग्नगाभ्यां एवंविधे योगे राज्ञां गमनं विषभक्षणतुल्यं एवंविधे लग्ने गच्छन् म्रियत इत्यर्थः तथा च दैवज्ञवल्लभे। जन्मर्क्षलग्नाष्टमराशिलग्नषष्ठोदये शत्रुभलग्नतो वा तद्राशिनाथैरथवोदयस्थैः करोति यानं विषभक्षणं वा २२ अथ यादृशे लग्ने यात्रा या शुभकारिणी तदाह। जन्मलग्नपेषु राशिषु शुभग्रहाश्रभूव नृपस्य राशिः जन्मलग्नसूर्याधिष्ठितराशेर्द्वितीयो वेशिसंज्ञकः दिनकरस्थितराशेर्द्वितीयं भवे

पतिभिः कृदिनदीपैर्लग्नगैः पार्थिवानां गमनमथ विषं वा भक्षितं तुल्यमेव २२ यः स्वजन्मनि शुभग्रहान्वितो
यश्च राशिरिह वेशिसंज्ञकः। यश्च शत्रुभवनाच्च नैधनो लग्नगः स गमने शुभावहः २३ मस्तकोदयगृहेषु च
स्वदिग्द्वारभेषु च यियासतो जयः। मूर्तिवर्त्तिषु च हिंसगराणां भं तथैवमपरेषु राशिषु २४ ॥ २४ ॥।

शिरिव्विवराहोक्तत्वात्। यश्च शत्रुलग्नादष्टमो राशिः ते सर्वेऽपि राशयो यात्रालग्ने शुभाः २३ मस्तकोदयराशिषु यस्यां दिशि गन्तुमिष्यते तो द्दिग्द्वारराशिषु पूर्वोक्तेषु च यात्रालग्नेषु च गच्छतो जयो भवति। अपरेष्वन्येषु पृष्ठोदयराशिषु लग्नेषु उत्तरपूर्वद्वारराशिषु लग्नेषु यथासंख्यं दक्षिणपश्चिमगमने दक्षिणपश्चिमद्वारराशिषु लग्नेषु उत्तरपूर्वगमने भङ्गो भवति। तथा च लल्लः। शीर्षोदये यातुरभीष्टसिद्धिः पृष्ठोदये वांछितकार्यनाशः। यातव्यकाष्ठामुखमिष्टदं स्याद् दनिष्टदं दिक्प्रतिलोमलग्नं। गोजेत्यादिना शीर्षोदयादि पूर्वोक्तं। ज्ञेयं २४ ॥ २४ ॥ ॥ २४ ॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ शीर्षोदयस्यापि तत्त्वात्पृष्ठोदयस्य निषिद्धत्वादुभयोदयस्य मीनस्य फलमाह। मीनलग्ने वा मीननवांशे वा गच्छतो मार्गो वक्रो भ भवति। वक्रेण यथा पूर्वमाप्यते नैव वक्रकार्यं स्यात् निर्जितशत्रोर्निवृत्तिर्भवति। कुंभलग्ने कुंभनवांशे वा यात्रायां नेष्टः। रिक्तघटः कुंभस्तूक्तत्वात्। अपाम्पत्याप्यस्तत्र आप्ये जलचरलग्ने जलचरनवांशे वा नौयानसिद्धिः तथा च दैवज्ञवल्लभः। प्रवहनपूरणे निर्विघ्नता लाभो पत्नो प्रयाणे जललग्नोदये तत् २५ अथ लग्नादिभ्यो द्वादशभावेभ्यो रात्रौ मूर्त्यादीनां शुभाशुभं शालिन्याह

वक्रः पंथा मीनलग्नेंऽशके वा कार्ये सिद्धिः स्यान्निवृत्तिश्च तत्र नेष्टः कुंभोऽप्युक्रमेंशः स्थिरे वा लग्ने चाप्यंशे च नौयानमिष्टं २५ मूर्त्तिः केशा धन्विनो वाहनानि मंत्रः शत्रुर्मार्ग आयुर्मनश्च॥ व्यापारश्च प्राप्तिरप्राप्तिरेवं लग्नाद्भावा द्वादशैते विचिन्त्याः २६ घ्नंति क्रूराश्चाप्तिवर्ज्जं हि भावान्व्यापारं निघ्नतः सूर्यभौमौ। सौम्याः पुस्त्वन्मेव हित्वारिभावं शुक्रश्चास्तं मृत्युमृत्ती न चेन्दुः २७ क्रूरग्रहा —— स्वारिदशायगताः शुभाः सुहित्वाशनिं दशमभावगतं यियासोः॥

१ धन्विनो धनुर्द्धराः २ अथैषां मूर्त्यादिभावानां क्रूरयोगाः हिंनाशः शुभयोगाद्दुपचयं शालिन्याह। क्रूराः पापग्रहाः। आयेकादशवर्ज्जं सर्वान्मूर्त्यादीन्भावान् घ्नंति नाशयन्ति सूर्यभौमौ व्यापारं दशमं न निघ्नतः त्रिदशैकादशे पुष्टूर्यभौमौ यात्रालग्ने स्थिता विपर्ययः शुभग्रहाः षष्ठभावपतित्यज्य सर्वान्भावान्पुष्णन्ति पुष्टान्कुर्वन्ति सौम्याः षष्ठे ऽरिघ्नन्ति जातकोक्तत्वात् शुक्रस्तु सप्तमवर्ज्जं अन्यभावान् षष्ठरहितान् पुष्णाति चंद्रः पुनर्लग्नमष्टमं च हित्वा षष्ठवर्जितान्सर्वान्भावान्पुष्णाती रम ५९

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फलाभवंतिनान्याहु। पापग्रहास्त्रिषट्रस्थैकादशगाः प्रायः शोभनाः भवंतिशनिंदशमस्थंपरित्यज्यसामान्यग्रहस्थादिविषयं चवेदितव्यं।
।वक्ष्यमाणयोगानामभिधास्यमानत्वात्।तथाचरत्नकोशे। प्रायोजगुः सहजशत्रुदशायसंस्थाः पापाःशुभाःसवितृजंपरिहृत्यखस्थं।
सर्वत्रगाःशुभफलंजनयन्तिसौम्याहित्वास्तथास्तममरारिगुरुंजिगीषोः २८ अथैतेग्रहायादृशाविफलाभवंतितानाह अस्तगता
रविरश्मिप्रविष्टाः।ग्रहयुत्तेदक्षिणादिकस्थाः।रिपुखेटदृष्टाःनीचस्थिताःस्वनीचस्थानेस्थिताःरविराशिस्थाः।विरुचयोदीप्तिर

मूर्च्छारिभावतिचयेसकलेपिसौम्याः श्रेष्ठाभृगोस्तनयमस्तगतंविहाय २८अस्तंगताग्रहजितारिपुखे
टदृष्टानीचस्थिताविरुचयोरिग्रहंप्रयाताः।रूक्षाणवश्चकिमपिस्वफलंविलग्नेदातुंक्षमाःखलुभवं
तिनखेचरेन्द्राः२९ यथाहियोगादमृतायतेविषंविषायतेमध्वपिसर्पिषासमं।तथाविहायस्वफलं
हिखेचराःफलंप्रयच्छंतिहियोगसंभवं ३०॥हिताःरूक्षाअस्निग्धाः।अणवःअल्पविंबाः।एवंविधाग्रहाःयात्रालग्नेकिमपि

स्वफलंदातुंसमर्थानभवंति विपरीताःशुभाइत्यर्थः २९ अथग्रहाणांयत्फलमुक्तंतस्मादपियोगफलंमहदितिवंशस्थेनाह। यद्दा
योगादौषधान्तरसंसर्गादहिर्विषंवत्सनागादिअमृतायतेरोगहरंभवंति।एवंक्रूरग्रहाअपिशुभग्रहयोगवशात् शुभफलंप्रयच्छं
ति॥ ॥।तथाचसर्पिषासमंघृतेनतुल्यंभवति। घृतमधुनीमध्वंबुनीसमेविषमितिचरकोक्तत्वात्।एवमशुभग्रहाअपिशुभयोग
वशादिष्टफलदाभवंति। शुभग्रहाअपिकुयोगवशादनिष्टफलदाभवंति। सुयोगान्कुयोगांश्चवक्ष्यति ३० ॥३०॥३०॥३०॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र॰मा॰ टी॰ ६०

अथयेषांयोगवशात्येषांचनक्षत्रवशात्कार्यसिद्धिस्तान्वंशस्थेनाहमहाराज्ञोवंसमाणयोगजात्फलावाप्तिःब्राह्मणानांनक्षत्रगुणैः। चौरा ॥५८॥
णांशकुनात्।शेषस्यभूदकारूपभूनेर्मुहूर्त्तात्।रुद्राहोऽन्यारेः ३१ अथतिथिनक्षत्रादिचंद्रबलाभावेपियोगवशादेवकार्यसिद्धिरि
त्याह।तिथौप्रतिपदादिदृष्टेपूर्वोक्तावमपक्षरंध्रसंक्रांतिदुष्टेएवंलक्षणमुहूर्त्तेभेनक्षत्रेकरणेववादौयोगेविष्कुंभादौलग्नेचंद्रेचपू
र्वोक्तदोषैर्दुष्टेपियोगैर्यात्रासफलेति।एतच्चान्येवाकार्यविषयासुस्थतुतिथिनक्षत्रादियोगबलंचविलोक्यमिति।तथाचयोग

महीभृतांयोगवशात्फलोदयोद्विजन्मनामृक्षगुणेस्तुजायते।स्तनस्करादेःशकुनप्रभावतोजनस्यशेष
स्यमुहूर्त्तशक्तितः ३१ तिथौसमेभेकरणेचवारेयोगेविलग्नेहिमगौनृपाणां।पापाभियात्राफलदात्रयोगेभ्यो
नस्तनस्तान्क्रियतोहिवस्ये ३२ शशांकमंदभास्करैस्त्रिभोरिमूर्त्तिवर्त्तिभिर्गतस्यभूपतेरणेप्रमाणिकाजये
दिरा ३३ यमस्यसुक्रेजपमुहीन्नषुत्रिवंधुलग्नात्तरिपुस्थितेषु।विलीयतेवैरिचमूरणाग्नेलाक्षेववह्नौनृपते

यात्रायां।आरोग्यमृक्षेणधनंक्षणेनकार्यस्यसिद्धिस्तिथिनाशुभेन।राश्युद्भमेनाध्वनिसिद्धिमाहुःप्रायःसुखानिक्षर्योनस्य ३४
णाद्वाकरेण।तथाचभास्करव्यवहारे।अवमाधिमासयोर्व्यःप्रतिष्ठतेभीष्टकार्यसिद्ध्यर्थीदेवहतोमनोरथोसौक्लेशंकेवलमुपैति
कुधीः ३२ अथशशिशनिरविभियोगंप्रमाणिकयाह।चंद्रोदशमेशनिःषष्ठेरविर्लग्नेएवंविधेयोगेगतस्यराज्ञोजयश्रीःप्रमाणिका
अवश्यंभवतिअत्राचार्यैणप्रमाणिकाछंदोपिदर्शितं ३३ अथभौमादिभिःपंचभिर्योगमाह।शनिस्तृतीये।बुधश्चतुर्थेशुक्रोलग्नेगु

रम॰
६०

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वैरिसेनाग्निनालाक्षेव विलीयते अत्र यथासंख्यपूर्णोपमयाः संसृष्टिः ३४ अथ सर्वग्रहैर्योगमाह। गुरौ लग्नस्थे। शेषैर्यथाक्रमं वित्त-
व्ययैकादशस्थानगैः एवंविधे योगे गच्छता नृपेण अरिसेना विनश्यते। अपर्यायोऽलंकारः ३५ अथ चंद्रबुधशुक्रैर्योगं शशिवदनेनाह।
चंद्रे चतुर्थे बुधशुक्रयोः सप्तमस्थयोः एवंविधे योगे गतो राजा युद्धे ऽरीन् जयति। तथा च दैवज्ञवल्लभे। तेसिते सेनसहिते स्तेगे विधौ
बंधगे प्रवसता महीभृता। संगरे रिपुगणो विकीर्यते तूलराशिरिव मातरिश्वना। हरिरिव यथा विष्णुर्दैत्यान् सिंहो मृगान् शक्रो दानवान् सूर्यो

बाध्यतो ननु स्थिते वित्तलाभगैः खरैः गच्छतो विवाहिनी नीयते न कालयं ३५। शशिनि चतुर्थे सविदि सिने स्ते॥
जयति गतोऽरीन् हरिरिव युद्धे ३६ लग्नेऽर्के सप्तमे चन्द्रे वित्ते सौम्ये गतो नृपः सद्यो रिपून् निहंति पूतनामिव
केशवः ३७ आयारिषु पमारौ शक्तिभाजः शुभग्रहाः प्रयाणे नृपतिर्यस्य हस्तस्थानस्य मेदिनी ३८ ने
षः चतुष्टये वक्रो न ह्यगोऽपि विलग्नगः॥ एतस्मिन्नस्मादिश्लेषोपमलंकारः। वित्तबुधे विद्यासह विद्यते ससवित्ता तस्मिन्स-
विदि ३६ लग्ने रवौ सप्तमे चंद्रे द्वितीयस्थे शुभग्रहैः एवंविधे योगे गतो नारिसेना हंति। तथा च योगयात्रायां। शुक्रवाक्पतिबुधैर्हनं संस्थैः स
प्तमे शशिनि लग्नगतेऽर्के। निर्गतो नृपतिरेति कृतार्थो वैनतेयवदरीन्विनिगृह्य। अत्रानुप्रासपूर्णोपमलंकारः ३७ अथ सर्वग्रहैर्योगमा
ह। शनिभौमौ त्रिषडेकादशगौ यस्य तथा स्थितौ बुधगुरुशुक्राः सबला भवंति। एवंविधे योगे गच्छतः पृथिवी हस्तगता भवति। तथा च
दैवज्ञवल्लभे। लाभारिदुश्चिक्यगतोपमारौ। वीर्यान्विताः सौम्यसितामरेज्याः। यस्य प्रयाणे समुपैति रागाद्विपक्षलक्ष्मीरभिसारिकेव। पर्यायो

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लग्ने विलोक्यमाने वक्री ग्रहः केंद्रगतो वर्जनीयः॥ तस्य वक्रिणो ग्रहस्य षड्वर्गः तस्य वारश्च वर्ज्जनीयः। अपि शत्रोस्य कालहोरा वर्ज्या ३९ अथ बहूनां योगानां वक्तुमशक्यत्वात् उपजात्या योगबाहुल्यमाह ये जाता इति। ये जातकेषूक्ता राजयोगास्तैर्योगैः शत्रून् जेतुं तेषां कोपाग्निः। वैधव्यदुःखितनस्त्रियाश्रुजलप्रवाहैः शान्तिं प्राप्नोति। तथा च बृहज्जातके। वक्रार्कजार्कगुरुभिः सकलैस्त्रिभिश्च स्वोच्चेषु षोडश नृपाः कथितैकलग्ने। द्व्येकाश्रितेषु च तदेकतमे विलग्ने स्वक्षेत्रगे शशिनि षोडश भूमिपाः स्युः॥ वर्गोत्तमगते लग्ने चंद्रे वा चंद्रवर्जिते। चतुराद्यैर्ग्रहैर्दृष्टे नृपा द्वाविंशतिः स्मृताः। द्वाविंशतियोगं च मेषादौ राशौ स्थिते निरूप्यमाने वेदाङ्कयमाः २९४। एवं विलग्नगे पि २९४ उभ

करोति बहुधा नाशं तु हारोपि पिपियासतो ३९ ये जातकोक्तक्षितिपालयोगैर्महीभृतो यान्ति रिपून्विजेतुं।
तेषां प्रकोपाग्निरुपैति शान्तिं विद्वेषियोषाश्रुजलप्रवाहैः ४० प्रयाति यो विलग्नगे गुरौ मूर्त्तिस्थिते विधौ
सितेस्तगे स शात्रवारीन्दिवस्पतिर्यथासुरान् ४१ एकेनापि ज्ञासुजिद्वाक्पतीनां योगः प्राक्केंद्रधर्मात्मजेषु

यं ५९२८ एवमन्येपि जातकोक्ता राजयोगा यात्राकाले विलोक्या इति। अत्र निश्चयरूपकपर्याययोः संकरः ४० अथ गुरुचंद्रशुक्रैर्योगं प्रमाणिकयाह। लग्ने गुरौ अष्टमे चंद्रे सप्तमे शुक्रे एवंविधे योगे यः प्रयाति स रिपून् जयति ४१ योगाऽधियोगयोगाधियोगान् शालिन्याह। बुधगुरुशुक्राणामन्यतमे केंद्रस्थे नवमपंचमस्थे वा योगो भवति। एषामन्यतमाभ्यां केन्द्रधर्मात्मजस्थाभ्यामधियोगो भवति। नूनं निश्चयेन एतैः बुधगुरुशुक्रैः केंद्रधर्मात्मजस्थैर्योगाधियोगो भवति। एतत्फलं च ग्रंथांतरात्। तथा च। योगेन यो नृपतयो

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri

क्षेमं यशो रिपुविनाशमथाधियोगे योगाधियोगगमने विजये द्दुरित्री सौम्यैश्च पापैश्च चतुष्टयस्थैः द्विष्ठेण सिद्धिं समुपैति पानाः प्रयान्त यानप्रतिघातवक्रैर्नदीं च धात्रीधरकं धरेणोति ४२ अथ शकुनादीनां माहात्म्यं हरिण्याह। शकुनं ज्ञमुकादिवक्ष्यमाणं निमित्तमंगस्फुरणादिमनश्चिन्तं एभिः शुद्धैः शकुनादिभिः लग्नशुद्ध्या च जयो भवति ४३ अथ शकुनादीनामधमे मनसः प्राधान्यं प्रमाणिकयाह शुगमं ४४ अथ यस्मिन्नक्षत्रे यन्प्राश्य यियासतां कार्यसिद्धिः स्यात्तदूत्वोपजातिभ्यामाह। कुल्माषाः स्विन्नमाषाः अश्विन्यां प्राश्य

द्वाभ्यामेषां चाधियोगाभिधानं नूनं सर्वैरेव योगाधियोगः ४२ शाकुनं निमित्तमनोभिरनिंद्यैरुदयविशुद्धिमिह प्रतिपद्य। रिपुविषयं प्रतियाति विजिगीषुर्भवति न मेन्यचिराद्धि जयश्रीः ४३ निमित्तराशिरेकतोन्यतो मनस्तथैकतः। अतो पियासतां बुधैर्मनोविशुद्धिरिष्यते ४४ कुल्माषांस्तिलतंडुलान्दधि तथा गव्यं पृषज्जांगलं मार्गं मांसमसृग्विलापनमथ प्राश्यं ततः पायसं।

मत्स्यौ याः। अरूपमाषः स्विन्नः कुल्माषः इति लल्लोक्तत्वात्। तिलयुक्तांस्तंडुलाभरण्यां। गव्यं दधि कृत्तिकायां। पृषज्जश्चित्रमृगस्तन्मांसं रोहिण्यां। मार्गं मांसं हरिणमांसं मृगशिरसि असृग्रुधिरं यथाप्राप्तं यमार्द्रायां विलापनं नवनीतं पुनर्वसौ। पायसं पुष्ये। भोजनं पिशितं सर्पमांसं त्वश्लेषायां। केचिन्महिमांसं वदंति निलमिश्रमोदनं मघायां। षष्टिकान्नं पूर्वोत्तरफाल्गुन्योः। प्रियंगुकं गुहस्ते। चित्रा नानाप्रकाराः पक्षिणः चित्रायां। आएडजातीफलं देषफलं स्वातौ। केचित्तु चित्रायां चित्रमन्नं स्वातौ आएडजातीफलं आमलकं प्राश्यमिति वदंति। प्रियंगुचित्रान्नमामलकुलस्थान्मधुसर्पि

टि० ६८

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

इतिलशोक्तान्। यावं यवान्नमिति विशाखायां। अनुराधायां कुलत्थान घृतमिश्रमधु ज्येष्ठायां। मूलानि यथाप्राप्तानि मूले। अंबु जलं पू
र्वाषाढायां। उत्तराषाढायां सक्तून्। कमलशालिः श्रवणे। शाकं धनिष्ठायां। विडालमांसं शतभिषजि। मेषमांसं पूर्वभाद्रे। यथेष्टमांसा
न्युत्तरभाद्रे। सक्तुयुक्तान्माषान् रेवत्यां। तथा च भोजः सुरपतिगुरुभे च पायसं स्यात्फणिपतिभे पिशितं भुजंगमस्यापि त्र्योतिलोदनमु
शन्त्यथ षष्टिकान्नं योन्यर्थभस्य युगले रविभे प्रियंगुचित्रा एडजानमरवाह्निकिभे निलर्से प्राहुः फलान्यपि च पावकमिन्द्रवह्न्योः मित्रेकु

वैहंगं पिशितं तिलोदनमथो द्भिः षष्टिकान्नं क्रमाद्दश्विन्या द्युद्रषु प्रियंगुकमतश्चित्रा एडजानी फलं श्वप्यावं
कुलत्थान्मधु चाज्यमिश्रं मूलाम्बु शक्तून् कमलं च शाकं। विडालमांसं पिशितं तथाज्यं पथ्येष्टमांसान्यथ स
क्तुमाषान् ४६ आज्यतिलोदनमत्स्यपयोभिः प्राक्प्रभृति क्रमशः खलु भुक्त्वा हस्तिरथाश्वनरैर्यदि राजा
याति तदा स जयत्यरिचक्रम्॥ ४७॥

लत्थान्मधुसर्पिषी च ज्येष्ठासु मूलान्यथ नैर्ऋते सैं। अब्दैवतेऽभोऽपि च वैश्वदैवे सक्तू
लथाद्याः स्कुवणे च शालीन्। शाकं मार्जारमांसाजमांसे मांसं यथेष्टितं। सक्तवो मांससंपृक्ताः क्रमात्सुर्वासवादिषु। ननु नैवेवनक्षत्राणि यात्रेया
ण्युक्तानि कथं सर्वेषां दोहदमभिधानं नैवं। राज्ञो हि लग्नवलेन गच्छतो नक्षत्रदोषनिराकरणार्थं उक्तेष्वपि नक्षत्रेषु विरुद्धतारादोषनि
रासार्थं प्राशनमुक्तं एवमन्येषामपि ४५॥ ४६ अथ दिग्दोहदं दोधकेनाह। प्राच्यां घृतं प्राश्य हस्तिना प्रयाणं। दक्षिणस्यां तिलोद
नं प्राश्य रथेन गच्छेत्। पश्चिमायां मत्स्यान् प्राश्य हयेन गच्छेत्। उत्तरस्यां दुग्धं प्राश्य नरयानेन गच्छेत् विजयी भवति ४७॥ ४७॥ ४७

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ वारदोहदं रथ्योद्धृतयाह। माज्जिकाशिषरिणी। माजिकां रविवारे प्राश्या। घृतसहितं पायसं सोमे। कांजिकं भौमे। पाचितदुग्धं बुधे दधि गुरौ। अनग्निनापितं दुग्धं शुक्रे तिलोदनं कृशरान्नं शनिवासरे। अत्रापि वारदोहदं प्राश्य सर्वेष्वपि वारेषु गच्छेत्। तिथिदोहदं सुरत्नकोशात्। अर्कदलततुदकसर्पीषि हविष्यदधिसुवर्णतिलवारि बीजपूरकमाषान्सुमासूत्र पिष्टकश्रापि। तिलपृष्टकंदमूलानि शाकमथ [illegible] शस्त्रवृक्षपत्राणि। प्रतिपत्प्रभृतिषु भुक्त्वा प्रस्थानात्सिद्धिमाप्नुयान्नूनं ४८ अथ राज्ञा यत्कृत्वा प्रयाणं कार्यं तदाह। यस्यां दिशि। यातुमुद्यतस्तदधिपतिं ध्यायन् हृष्टो राजा गच्छेत्। अत्र लल्लः। यस्तु संप्रस्थितो यात्रां ब्राह्मणेन वमन्यते। नासौ प्रतिनिवर्त्तेत तद्दत्ते [illegible] स्वजीवितं

मार्जिका सघृतपायसं तथा कांजिकं स्त्रितपयो दधिक्रमात्। क्षीरमंक्कथितकं तिलोदकं वारदोहदविधिर्बुधैः स्मृताः ४८ हुत्वा वह्निं देवताश्च प्रणम्य श्रद्धायुक्तः स्वस्तिवाच्यं द्विजेन्द्रान्। ध्यायन्नाशाधीश्वरं हृष्टचेताः क्षोणीपानां निर्विकल्पं प्रयाणं ४९ अवेक्ष्य कार्यं स्वयमप्रयाणे महीभृतो निर्गममाहुराद्याः॥ छ ॥ छ ॥

स्वकीयां परकीयां वा स्त्रियं पुरुषमेव च। ताडयित्वा तु यो गच्छेत्तदन्तं न स्यजीवितं। कृत्वा तु मैथुनं यस्तु स्वभार्यां नाभिनन्दति। नासौ तत्फलमाप्नोति तदन्तं तस्य जीवितं ४९ अथ यदावश्यं गन्तव्यं गन्तुं न शक्यते न तदा किं कार्यमित्याह। स्वयं त्वप्रयाणे आर्यमुनयः राज्ञां प्रयाणमाहुः किं प्रस्थानमित्याकांक्षायां छत्रेति। छत्रखड्गधनुःप्रभृतिवस्त्रादिच मनोभीष्टजयाय प्रस्थापयेत्। तत्प्रयाणं। एवमन्येषामपि। अत्र रत्नकोशे विशेषतः धनुःपुष्पार्चितं कार्यं निर्गमं पूर्वयात्रिकं। शुचौ देशे ततः कुर्याद्यस्मिन्नाधानमिष्यते॥ ॥ ॥०

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र॰मा॰ छत्रं दंडाक्षमालादिकमंडलुसितांवरं। विप्राणां ब्रह्मसूत्रं च प्रयाणे कार्यसाधकं। शंखमथौषधस्थानेलवणोपानहौ गुडः। निर्गमेन
टी॰ प्रशंसन्ति यात्राप्युपहतं भवेत् ५० अथ यावति प्रदेशे प्रस्थानं तदाह। केचिदयं च धनुषः शतानि प्रस्थानमाहुः। केचित् शतार्द्धं पंचाश
६३ द्धनूंषि स्वमतमाह। स्वस्थानतो दशधनुर्भिर्यो गतः। आयुधादिवा गतं तदा प्रस्थानं सिद्धमेवमहमन्ये। स्वस्थानं प्रतोलीपर्यन्तं धनुः
प्रमाणं चत्वारो हस्ताः हस्तोऽङ्गुलचतुर्विंशत्या चतुःकरो दंडः। तद्द्विशतं दंडः क्रोशो योजनमेकं चतुःक्रोशमिति श्रीधरः। प्रस्थात

छत्रायुधाद्यं मनसस्त्वभीष्टं प्रचालयेद्धौ जयिकं जयार्थी ५० प्रस्थानमाहुर्धनुषां शतानि पंचात्र केचिद्धनुषां शता
र्द्धं॥ प्रस्थानतः स्याद्दशभिर्धनुर्भिर्गतः स्वलप्रस्थित एवमन्ये ५१ वसेन्न चैकत्र दशक्षितीशो दिनानि नो स
प्त च मंडलेशः यः प्राकृतः सोपि च पंचरात्रमद्रेण यात्रापरतः प्रयोज्या ५२ एकत्राप्युषितस्य यात्रामत्रात्रिगो
तमच्यवनाः॥ ९९ रैचाग्रामाज्ञामांतरं गर्गः सीमः सीमांतरं भृगुः शरक्षेपाद्भरद्वाजो वसिष्ठो नगराद्बहिः ५१॥ अथ प्रस्थाने।

स्थाने स्थितो राजा प्रस्थानिकं वा वस्तु यावंति दिनानि मुहूर्त्तान्तरमायसने तदाह। राजा एकत्र दश दिनानि न वसेत् तन्मध्ये गच्छेदि
त्यर्थः मंडलेशः सामन्तः सप्त दिनानि। यः प्राकृतो गृहस्थादिः सोपि पंचरात्रे॥ अथ कार्यवांछितश्चेत्तदा भद्रेण सुमुहूर्तेन यात्रा का
र्या॥ न पुनस्तेनैवेत्यर्थः ५२ अथ बहूनि प्रयाणान्यतिक्रम्य क्वचित् प्रदेशे चेद्वसति मुनेनतदा कति दिनानि स्थेयमिति मतान्तरेणाह। एम॰
अन्यादयः पंचत्रिसप्तदिनानि अवस्थानमाहुः अयमर्थः। अत्रिरेकत्र पंचदिनानि स्थितस्य रात्ज्ञो परस्तु दिवसे न यात्रामाह॥ ०॥ ६३

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गौतमस्त्रिदिनैः च्यवनः सप्तभिः अथैतान्निरूपयन्स्वमतमाह। एतत्पूर्वोक्तं मुनीनामयुक्तं प्रतिभाति॥ कुत इत्यत आह। यात्रासमाप्तिरिति। तस्मात्प्रथमेलग्ने सुनिश्चिते प्रस्थितो राजा यावद्यायाति तावत्तद्देवलग्नमित्यर्थः ५३॥ ५४ अथ येषु निमित्तेषु गमनं नेनाशस्तं तान्याह। अकालेषु वर्षाकालं विनाजातेषु विद्युदादिषु तथा दिव्यान्तरिक्षपार्थिवेषु उत्पातेषु राजा न प्रवसेत्। एतच्च प्रयाणान्तरसप्तरात्रे विलोक्यम्। त्रिविधोत्पातलक्षणं वराहे। दिव्यं ग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः गंधर्वपुरपुरंदरचापादिय

पंचत्रिसप्तरात्राद्भूयो भद्रेणसंयोज्या ५३ अयुक्तमेतत्प्रतिभाति नूनं होराविदां युक्तिमतां वहूनां यात्रासमाप्तिः खलुवांछितार्थफलस्य सिद्धौ नियतं प्रदिष्टा ५४ सौदामिनी वर्षणगर्जितेषु नाकालजेषु प्रवसेन्नरेंद्रः आसप्तरात्राद्भुवमद्भुतेषु दिव्यान्तरिक्षक्षितिपेषु चैवं ५५ छुछुकाभवनगोधिकारलापिंगलापिकवधूश्चपोतिका। शूकरीपुरुषसंज्ञिताः शिवावामतः खलु यियासतोऽशिवाः ५६॥ दान्तरिक्षं। भौमचरस्थिरभवं तत्कांतिराहतेशमुपैति। चकाराद्वायुयोगिन्यावपि वर्ज्यौ। तथा चलल्लः। शक्रमरुद्यमशंकरवरुणानलधनरक्षसां दिक्षु तिष्ठति यामार्द्धेन हि तत्र गतो जयति परचक्रं। एष्वृज्जोद्दाति जयं पुरस्त्वपराजयं रणे चाहुः। दक्षिणदिक्स्थोपि जयं पराजयं वामकरसंस्थः। प्रागुत्तराग्निनैर्ऋत्यपाम्यापरवायव्यांऽऽशान्यां चक्रमेद्वा उदयन्मर्द्धयामिकाः ५५ अथ शकुनानां मध्ये यानि वामतः शुभानि तान्याह। छुछुका छुछुन्दरी। भवनगोधिका पल्ली। रला कलहकारिणी। पिंगला भैरवी। कोकिला पोतिका दुर्गा शूकरी सूपरी। जिलोके पुरुषसंज्ञिताः पुन्नामा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिवा शृगाली एते वामभागे दृष्टाः शकुना अशुभाः ५६ अथ दक्षिणभागे ये शस्तास्तानाह। ऋक्षो भल्लूकः। भासः पक्षिविशेषः। छिक्करो मृगविशेषः। वानरो मर्कटः। श्रीकंठः चटकः। श्वा कुक्कुरः पिप्पिकाख्यः पक्षिविशेषः। कूलचारि शारदि शृङ्गेऽन्यदाये स्त्रीनामानः सारिकाचटका ईलिका एते सर्वे दक्षिणाः शस्ताः ५७ अथ येषां दर्शनं शस्तं येषां न शस्तं तानाह। भारद्वाजः पक्षिविशेषः नकुलश्चाषोप्रसिद्धो। छागो मेषः बर्ही मयूरः। एते दृष्टमात्रा यत्रतत्रस्थाः शुभाः। गोधासर्प्यशशकाः प्रसिद्धाः। जाहकोगात्रसंकोची। कृकला

ऋक्षो भासः छिक्करो वानरश्च श्रीकण्ठः श्वा पिप्पिकाख्यो रुरुश्च। ये स्त्रीसंज्ञा दक्षिणाः स्युः प्रशस्ताः प्रोक्ताः पूर्वैस्सूरिभिस्ते प्रयाणे ५७ भारद्वाजो नकुलश्चाषसंज्ञश्छागो बर्ही दृष्टमात्रः शुभः स्यात्। गोधा सर्प्पः शशको जाहकश्च याने दृष्टः कृकलासोपि नेष्टः ५८ जाहकाहिशशशूकरगोधाकीर्त्तनं शुभमुदाहृतमार्यैः। नो रुतं च न विलोकनमेषामन्यथा गदितमृक्षकपीनां ५९ भृंगाराञ्जनवर्द्धमान ——— मुकुराबद्धैकपश्वामिषोष्णीषक्षीरनृपासनपूर्णकलशच्छत्राणि सिद्धार्थकाः॥ ६०

सः शरटः। एषां दर्शनं प्रयाणे न शस्तमिति ५८ एषां कीर्त्तनं शुभं स्यादित्याह। जाहकादीनां नकेनाप्युच्चारितं यात्रुः शुभं न। पुनर्दर्शनशब्दौ ऋक्षकपीनामन्यथा। अथाग्रतो यानि दृष्टानि शुभानि तान्याह ५९ भृंगारस्ताम्रकलशः। अंजनं कज्जलं। वर्द्धमानः शरावः। अथवा विवर्द्धमानपुत्रपौत्रधनः पुरुषः मुकुरो दर्पणः। बद्धैकपशुः रज्वादिना बद्ध एकश्छागः। आमिषं रुधिराक्तमांसं। उष्णीषो मुकुटः। क्षीरं दुग्धं। नृपासनं सुखासनं पूर्णकलशः छत्रं प्रसिद्धं सिद्धार्थकः सर्षपः श्वेतः प्रसिद्धाः केतन

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मीनो मत्स्यः। पंकजं कमलं। क्षौद्रं गुडः। आज्यं घृतं गोरोचना प्रसिद्धा कन्या कुमारी। सितोस्राः श्वेतवृषभः। असावबद्धोपि वृषभः। वस्त्रा णि श्वेतानि सुमनसः पुष्पाणि विप्रो ब्राह्मणः ९० प्रज्वलनो ज्वलनाग्निः। भद्रपीठं सिंहासनादि। गणिका वेश्या। कुशः। मृत्स्ना मृत्तिका। अक्षता यवाः इक्षुः। फलानि सर्वाणि भक्ष्याणि पक्वान्नादीनि पश्चाद्भागे गच्छेदिति शब्दः। तथा च वसंतराजे। गच्छेत्ति पृष्ठे पुरतस्तथैव हि। वागीदृशी केनचिदुच्यमाना। सर्वाशिषश्चातिशयेन दत्ता विप्रस्य तुष्टिर्विजया यपुंसां सिद्ध्यै निरवाजहि छिंधि भिंधि चेत्यादयः शब्द

वीणाकेतनमीनपंकजदधिक्षौद्राज्यगोरोचनाकन्याशंखसितोक्षवस्त्रसुमनोविप्राश्वरत्नानि च ९० प्रज्व
लज्ज्वलनदंतितुरंगा भद्रपीठगणिकाकुशमृत्स्नाः अक्षतेक्षुफलचामरभक्ष्याण्यायुधानि च भवन्ति शुभानि
९१ भेरीमृदंगमृदुमर्दलशंखवीणावेदध्वनिर्मधुरमंगलगीतघोषाः। पुत्रान्विता च युवतिः सुरभी सवत्सा धौतांबर
वरश्च रजकोभिमुखः प्रशस्ताः ९२ तृणतुषफणिचर्माङ्गारकर्पासपंकेल्लवणगुडवसास्थिक्लीववैतैलौषधे

वधोद्यतानां कर्पासि मार्गं छत्रं तथैव माद्याः प्रयोजनारंभनिवारणार्थाः आदाय रिक्तं कलशं जलार्थी यदि व्रजेत्सोपि महाध्वगेन। पूर्णं समादाय निवर्तते सौ यया हृतार्था पथिकस्तथैव। भास्करव्यवहारेपि। रिक्तोऽनुकूलः कुंभस्तु पूरणाय प्रयोजितः। सिद्धार्थ चौरवणिजः प्रयाणेऽभीष्टसिद्धिदाः पूर्वस्यां तुरगः सितः याम्यां पश्चिम सितं च वस्त्रं कन्यापि शस्यते प्रतीच्यां गौ विप्रः सुजनस्तथोत्तरस्यां। ९१ भेरी दुंदुभीः मृदंगो मुरजः मृदुमर्दलः स्कंधासक्तमर्दलः। एषां शब्दमधुरमंगलगीतशब्दाश्च यात्रा सिद्धिकराः धौतवस्त्रो रजकश्च या।

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र·मा· नद्रा अशकुनाएव। रिपुः शत्रुः विट् विष्टा अस्सिन धान्यं तिलमाषादि पतितो हत्यादिदूषितः जटिलो जटावान् मुंडः समस्तमुंडितशिराः
टी· वांतभुक्तं अक्रमोदनादि ६३ अथ पान्यतिविरुद्धानि तान्याह। क्षुतं छिक्कानं च दक्षिणनेत्रकर्णस्य पृष्ठभागे न शुभं। वामनेत्रकर्णस्य पृ
६५ ष्ठभागे शुभं। तथा च वसन्तराजः निषेधमग्रे क्षितिदक्षिणे च धनक्षयं दक्षिणकर्णदेशे। तत्पृष्ठभागे कुरुते ऽरिवृद्धिं क्षुतं करोत्यशुभ
माद्धाति। भोगाय वामश्रवणस्य पृष्ठे कर्णे च वामे कथितं जयाय सन्नेत्रलाभाय च वामनेत्रे जातं क्षुतं स्यात्क्रमशोऽष्टधेयं स्खलितमेव

रिपुविडस्सिनधान्यव्याधितात्यक्तनक्रैः पतितजटिलमुंडोन्मत्तवान्तैर्नसिद्धिः ६३ विमुक्तकेशकाषाये
नग्नैर्धनबुभुक्षितैः। कुब्जांधबंध्याबधिरैर्दृष्टैः सिद्धिर्नजायते ६४ कुटुंबकलहो गृहज्वलनमात्तवेपोषिता
विडालसमरं क्षुतं स्खलितमंबरादेस्तथा दुरुक्तमपि कोपितो महिषयोश्च युद्धं भवेत प्रयाणसमये नृणामभि
मतार्थविच्छित्तये ६५ उद्वाहमंगलोत्सवकल्याणाभ्युदयसूतकाशौचे। आसमाप्तेनयात्रां कुर्वीत जिजीविषुपुरु
षः ६६ मृगा विहंगाश्च गता प्रदक्षिणं महीभृतां कांक्षितकार्यसिद्धये। मृगाः क्रजंतः पुनरोजसंख्यया नृपाव
रादेशामयत्तनं ६४ अथ येषु सत्सु यात्रा न त्रिनयेतानाह। सूतकं जननं नसूतकं। आशौचं गौ॥ लोके शकुनप्रयाणवत् ६७॥
त्रिमरणे ६५। ६६ मृगाः गौरहरिणाः। विहगाश्चाषप्रभृतयः। प्रदक्षिणं वामदक्षिणगतयः मृगाः पुनर्विषमसंख्यया न च कृष्णाः। तथा राम
च वसन्तराजः पुरायै नारणागमनेन युग्मा प्रदक्षिणा गौरमृगाः प्रयान्ति। समानशस्ता न च वामजाता कृष्णेन मिश्रा न भवंति दुष्टाः प्रदक्षिणे ६५

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समावेष्टयन्वह्निमसुग्मख्या अपि क्षुत्क्षमसारान्नवासज्ञाता अपि न प्रशस्ता ६७ पंचषट्प्राणान्प्रतीक्ष्य स्थित्वा स्थानस्य स्थानाकु
लस्य तस्योच्चारणात्तः प्राणः स च प्राणो दशभिर्गुर्वक्षरैर्विंशतिभिर्वा लघुभिर्भवति लघ्वक्षरैः स्फुटोक्तैः प्राणः कथितस्तु विंशतिभिः। वि
रुद्धे शकुने च संजाते करचरणप्रक्षालनं कृत्वा आचमनं कुर्यात्। तथा च वसन्तराजः। जाते विरुद्धे शकुने ध्वनौ वा व्याहृत्य कृत्वा करपादशौ-
चं ६८ आचम्य च क्षीरतरोरधस्तात्तिष्ठन्प्रतीक्षेच्छकुनान्तराणि। आद्ये प्रथमे अशकुने पंचषड्वा प्राणान्प्रतीक्ष्य अशकुनानन्तरं गृहीत्वा गच्छे

आद्ये विरुद्धे शकुने प्रतीक्ष्य प्राणान्नृपः पंच च षट् च यावत् अष्टौ द्वितीये द्विगुणं तृतीये व्याहृत्य नूनं गृहम
भ्युपेयात् ६८ न परविषयमाप्तो राजा द्विजाः नृपामरसज्जनद्रविणहरणे चेतः कुर्यान्न बालकुलयोषितां। वि
गजतुरगान्नान्नं न हन्यान्न भीतनिरायुधान्प्रमुदितमनाः सैन्यैः शस्तेक्षणे स्वपुरं विशेत् ६९ इति श्रीरत्नमा
लायां यात्राप्रकरणं पंचदशं १५ धर्मो गृहस्थपदतो न परोऽस्ति कश्चिद्यस्मात्स्थिरं तदपि पोषितशीलव
त्यां तस्याः सुलग्नवशतः खलु शीललब्धिस्तस्मात्प्रवच्मि नचिरेण विलग्नशुद्धिं १ मेषोक्षवैणिकमृगानतुकुंभ

न् गच्छेत् पुनर्द्वितीये अशकुने अष्टौ प्राणान् पुनस्तृतीये अशकुने अष्टौ प्राणान् ॥ संस्थे प्रद्योतने करतलग्रहणं प्रशस्तं ॥ ७ ॥
एवं पुनश्चतुर्थे अशकुने व्याहृत्य गृहमागच्छेदित्यर्थः ६९ इति श्रीरत्नमालाविवरणे यात्राप्रकरणं १५ अथ विवाहपटलप्रकरणमारभ्य
ते। सुगमं १ मेषवृषमिथुनमकरकुंभसंस्थे रवौ विवाहः कार्यः एतेन विवाहः सौरमासेन ज्ञेयः। गुरौ सिंहस्थे न कार्यो विवाहः॥ ७॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र.मा. टी.

केचिन्मघासंस्थमेव वर्जयंति।न्यजेज्जीवं मघासंस्थमिति विक्रमोक्तत्वात्।मासेधिके मलमासे त्रिद्युस्पृशि च्यवमेन च २ आषाढश्रा
वणभाद्रपदाश्विनेषु पौषे चैत्रे न विवाहः।कार्तिकमार्गशीर्षयोर्मध्यत्वात्‌ हीनजाति विवाहः।तथा च दैवज्ञवल्लभे।फाल्गुनेन तपस्सिमा
सिमाधवे शुक्रनाशि धनपुत्रो भवेत्।सोऽपरैः सुखसुतार्थमानदः कार्तिके सहसि च प्रकीर्तितः शुक्रे गुरौ चन्द्रास्तगते न याबाल्ये वृद्ध
त्वे च न कार्यः।अस्तमिते भृगुतनये नारी म्रियते हृहस्पतौ पुरुषः।इति लल्लोक्तत्वात्।विवाहादौ स्मृतः सौर इत्यादिन्यायेस्तत्रापि इह चां

गीर्वाणमंत्रिणि मृगेंद्रमधिष्ठिते न मासेऽधिके त्रिदिनसंस्पृशि नावमे च २ नाषाढात्प्रभृति चतुष्टये विवाहो
नो पौषे न च मधुसंज्ञितो विधेयः।नैवास्तंगतवति भार्गवे न जीवे हृद्धत्वे न खलु तयोर्न बालभावे ३ प्राग्गुरुः
शिशुरह स्त्रिनयं सितः स्यात्पश्चाद्दशाहमिह पंच दिनानि वृद्धः।प्राक्पक्षमेव कथितो त्रिवशिष्टमुख्यैर्जीव
स्तु पक्षमपि वृद्धशिशुर्विवर्ज्यः ४॥ इमासग्रहणं आषाढमासे मिथुनसंक्रांतौ सत्यामपि सर्वथा विवाहनिषेधार्थं केः।
श्चिदाषाढस्य त्रिभागः आहृतः।तथा च त्रिविक्रमः।केश्चिदिह त्र्यंशस्तु चेरपि।अत्र खलु शब्दाद्गुरुशुक्रयोर्नानुकूल्य तथा च विद्याधरीविला
से अर्के त्वनुकूले सुरपूजिते च वृद्धिं प्रपन्ने भृगुनंदने च।भवंति कार्याः सुतसौख्यसंपत्सौभाग्यभाजः सतशत्रुपक्षाः ३ प्राक् प्राच्यां ३ दिनः स्तु
कौ दिनत्रयं बालः।पश्चिमायां दश।अस्तादर्वाक्।पश्चिमायां पंच दिनानि वृद्धः प्राच्यां पंचदश।जीवो वृद्धो बालो वा पंचदशैव दिनानि परे
प्राच्यां बालः पश्चिमायां वृद्धः इयं च बालवृद्धकल्पना तत्फलावाप्त्यर्थमत एवात्रि वसिष्ठमुख्यैरित्युक्तं।देशविशेषशुक्रस्य बालत्वे विशेषो गर्गेण

६६

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वंगे बृहस्पतिषु चषट्सु च पञ्चशेषे चरेशेत्रिस्थिनं वदंति॥ हूणेषु उदीच्येषु जन्ममासो निंद्यः यस्मिन्मासे जन्मस जन्ममासः। जन्मकालनक्षत्रं जन्मभं जन्म
कालतिथिर्जन्मदिवसः। एतेषु विवाहादिमंगलं न कुर्यात्॥ प्रथमगर्भोत्पन्नस्य ज्येष्ठमासेन विवाहः। वधूवरयोराद्यगर्भोत्पन्नयोर्द्वयोः सुतयोरे
कस्मिन्ज्येष्ठं भवं स्मैव। तथा च सप्तर्षिमते। ज्येष्ठेनज्येष्ठयोः कार्यं नृनार्योः पाणिपीडनं। तयोरन्यतरस्मिंश्चेज्ज्येष्ठेपि च न विद्धनेद्वितीयग
र्भोत्पन्नस्यापत्यस्य जन्ममासादौ विशेषो भुजबलपराक्रमे। यथा। जन्मनि मासि विवाहः शुभदो जन्मर्क्षे जन्मराशौ च। लग्नेजन्मनि शुद्धे। शु
भदो जन्मनि तिथौ शशिनि प स्वर्भानुमित्रेति। स्वर्भानुः राहुः मित्रः सूर्यः असितः शनिः। भौमशुक्रौ प्रसिद्धौ। एभिर्युतश्चन्द्रो नारीणां दोर्भाग्यवैध

जन्ममासि न च जन्मभे न तथा नैव जन्मदिवसेपि कारयेत्॥ आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि न च जातु मंगलं॥
पु स्वर्भानुमित्रासितभौमशुक्रैः स्वकषारश्मिः सहितोऽङ्गनानां। दौर्भाग्यवैधव्यभयानि धत्ते शुभं चरंभो लिप्सुस्त्रिविद्भ्यो॥

व्यभयानि करोतीति गुरुबुधाभ्यां युक्तः शुभकृत्। चकारान्पापद्वयमध्यगः पापान्तमस्थः लग्नस्थश्चंद्रो वर्ज्यः। तथा च त्रिविक्रमः। पापान्तमध्य
स्थश्चंद्रस्याज्यस्तथा न नो। पापान्तमगते चंद्रे लग्ने च जामित्रे। तच्चतुः पंचाशत्तमेन वांशे परमजामित्रे। तथा च दैवज्ञवल्लभे नवांशादिंदुनाक्रो
तो चतुष्पंचाशद्दशके। ग्रहो स्याद्यदसौ दोषो न शुभैरपि हन्यते। एतेन यावन्तोंऽशो येन वांशे चंद्रो लग्ने वा भवति। तयोः सप्तमस्थानमितः पापग्रहो भवति
यदा तदा परमजामित्रं। ग्रंथान्तरेपि। पापान्तस्थमराः शशी यदि भवेत्पापेन युक्तोऽथवा यत्नेनापि विवर्जयेन्मुनिमते रोगोपि संकथ्यते। यात्रायावि
पदो गृहे पुमरणां सौरे श्वरो गोमहानुद्वाहे विधवा व्रते च मरणं शूलं च पुंसकर्माणि। मित्रालये मित्रसमीक्षितो वा मित्रांशके मित्रसमाश्रितो वाऽत्र

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र०मा०टी० ६७

तुंगत्रिकोणभवने भवने जिते वा सौम्याधिमित्रगृहगोऽथ नदीक्षितो वा। जामित्रवेधजनितानपहन्यदोषान्दोषाकरः सुखमनेकविधं विधत्ते ६ ऊर्द्धेति। पंचरेखा ऊर्द्ध्वोर्द्धगाः स्थाप्याः। द्वे द्वे चतुर्ष्वपि कोणेषु देये। तत्रेशानकोणायामध्ये द्वितीयरेखायां कृत्तिकां विन्यस्य ततः प्रदक्षिणं सर्वाण्यभिजित्सहितानि विन्यसेत्। अभिजिद्भोगश्च। उत्तराषाढापादश्चतुर्थपादः। श्रवणस्य आद्याश्चतस्रो घटिकास्ताभिर्भवतीति तस्मिन्चक्रे वैवाह्यं नक्षत्रं समरेखास्थं विद्धं त्यजेत्। केचिदत्र पादवेधं कथयं-


पंचशलाकाचक्रम्

ऊर्द्ध्वा रेखाः पंच तिर्यक् स्थिताः स्युर्द्वे द्वे रेखे कोणयोरत्र चक्रे। अग्नेर्धिष्ण्यं शंभुकोणे द्वितीये नाड्यान्यस्मिन्न्यस्यतः साभिजिति ७ अंत्यः पादो वैश्वदेवाह्वयस्य विश्वार्धिष्ण्यस्याद्यनाड्यश्चतस्रः। प्रोक्ता भुक्तिः साभिजित्संज्ञकस्य तत्स्थे खेटे रोहिणीनां च वेधः ८ चक्रेऽत्र स्मिन्नेकरेखास्थिते न ज्ञेयं विद्धं नूनमृक्षं ग्रहेण। कैश्चित्तत्राप्युच्यते पादवेधो भानां चिंत्यश्चात्र लत्तानिपातः ९ ऋक्षं सद्वादशमृक्षमर्करश्मिरवनीसूनुस्तृतीयं गुरुः षष्ठं चाष्टममर्कजश्च पुरतो हंति स्फुटं लत्तया॥ श्रुतिप्रथमेपादेन चतुर्थस्य पादवेधः द्वितीयेन तृतीयस्य च वेधः। अत्र श्लोकोयथा। मूलादित्यौ श्रवणमघयोः सौम्यविश्वाह्वयोश्च पौष्णार्यम्णोर्वरुणमरुतोर्मैत्रयाम्यर्क्षयोश्च। आहिर्बुध्न्याभिधरविभयो रोहिणीकोणभाजोः स्याज्ज्यो वेधो विमलमतिभिः पाणिसंवेधकाले ७। ८। ९ अथ लत्तामाह। रविर्द्वादशं नक्षत्रं पुरतोऽग्रे लत्तया हंति। भौमस्तृतीयं॥

रम० ६७

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बुधः सप्तमं नक्षत्रं पश्चाल्लत्तयाहंति। राहुर्नवमं पश्चाद्धंति। शुक्रः पंचमं पश्चाद्धंति। चंद्रः पश्चाद्द्वाविंशं नक्षत्रं हंति किंतु पूर्ण एव नन्नसीं।
णः लत्तापादस्तन्महारः स च भौमः गुरुशनिनामग्रतो भवति। बुधशुक्रचंद्रराहूणां पश्चादिति। यद्यपि क्रूरलत्तान्यान्यानयापि प्रस्तावाद
न्येषामपि कथितानि शुभलत्तानां स्वल्पदोषत्वादिति १० अथ येषां लत्तयाहतं नक्षत्रं यैस्त्यक्ताक्रांतगंतव्यं वर्ज्यान्यान्यानख्यातिन्याह। क्रूरैर्वि
भौमशनिराहुभिर्भुक्तं। यच्च पापैर्गंतव्यं पापाक्रांतानक्षत्राणुरस्थं यच्च पापाक्रांतं पंचशलाकाचक्रे यत्क्रूरेण विद्धं यस्मिन्नक्षत्रे चान्यानि व

पश्चात्सप्तममिंदुजश्च नवमे राहुः सितः पंचमं द्वाविंशं परिपूर्णमूर्त्तिरुडुपः संताडयेन्नेतरः १० क्रूरैर्युक्तं क्रूर
गंतव्यमुक्तं क्रूराक्रांतं क्रूरविद्धं च नेष्टं यच्चोत्पातैर्दूष्यभौमांतरिक्षैर्दुष्टं तद्वत्क्रूरलत्ताहतं च ११ क्रूरैर्जुष्टं त्रिवि
धोत्पातदुष्टं तावद्धिष्ण्यं नो शुभं मंगलेषु। यावद्भुक्तं शशिना नान्यभुक्तं पश्चात्तत्स्यान्मंगलं मंगलार्हं १२ षष्ठा
ष्टके मृत्युरपत्यहानिः पाणिग्रहे स्यान्नवपंचमे च॥ १॥ भूबुः। यच्च पापलत्ताहतं तत्सर्वमंगलकार्येषु त्यजेत् ११ अथ क्रूरा
दिभिर्यद्दुष्टमुक्तं तद्यावत्कालं दुष्टं तं कालमाह॥ क्रूरजुष्टादिभं तावन्मंगलेषु न शुभः। यावच्चंद्रेण भुक्तान सक्तं। चंद्रभुक्तं नक्षत्रं मंगलेषु
भं। शुभकर्मयोग्यं च भवति। तस्मिन् शुभकर्म कुर्यादित्यर्थः १२ दंपत्योर्जन्मराशेरेकस्य षष्ठेऽन्यस्याष्टमे राशौ मृत्युः। यस्याष्टमो राशि
स्तस्य मरणमित्यर्थः। भास्करव्यवहारे। पत्युर्जन्मर्क्षतो नारी यदा षष्ठेऽष्टके पतिः। स्त्रिया षडष्टमे गार्ग्यस्तदिष्टं मन्यते। एवं नव
मपंचमे त्वपत्यहानिः द्विद्वादशे निर्धनत्वं अन्येषु तृतीयैकादशमचतुर्थउदयसप्तमेषु वधूवरप्रेमाधिकं भवति॥ १॥ ॥०॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकराशौ धनापत्यसौभाग्यजननस्मृतः एकर्क्षे यदि चैवेशौ विवाहोऽन्यैर्नशस्यते। समसप्तके परस्परमधिका प्रीतिः सुखं च मिथुनस्य च
। स्त्रशमचतुर्थेन यथाभवंति विन्नानि तनयाश्चभंवति। तृतीयैकादशयोगे वृद्धिः कुलस्य सुखमतुलमिति भोजः। दीपिकोक्तान्यपि दश
योगा विचारणीयाः। ते च यथा। तिथ्यं १५ गर्ह्यवैरे ४ क १ ९ १० शोन विं १९ शुभे २७ कादशा ११ षाद १८ शविंशा २० संख्याः। दृष्टोडुनासूर्येषु
तोडुना च योगादमी चेद्दशयोगभंगः। अश्विन्यादिगणनया दृष्टनक्षत्रसूर्याक्रांतनक्षत्रसंख्ययोर्योगे सप्तविंशतिर्भक्ते यदि शेषाः का अ।
मी भवंति तदा दशयोगेनेष्टनक्षत्रस्य भंगो भवतीत्यर्थः १२ तथान्यगुणसद्भावे यद्यापि षष्ठाष्टकेनैवांतरायस्तदापरिहारमाह। भवनपयोर्वधू

नैस्वधनहा दृशकेऽपरेषु प्रेमातिरेको हि वधूवरस्य १३ भवनपतिसुहृत्त्वं स्यात्तथैकाधिपत्यं यदि भवनवशि
त्वं चैकषट्काष्टकेपि। शुभकृदिह विवाहोऽन्योन्यताराविशुद्धौ यदि खलु फणिचक्रे नैव नाडीसमाजः १४ नाड्या।
स्तिस्रोन्यक्तिः शेषधिष्ण्यास्त्रिभ्यस्त्राभ्यादिभ्य - एव प्रस्तताः सर्प्याकारास्तत्र नाडीसमाजो नक्षत्राणामेक
वराणयधिपयोर्मित्रत्वं भवति। एकाधिपत्यं वा। अथवा राश्योर्वश्यत्वं भवति यदा तदा षट्काष्टकेपि वि((नाडीस्पर्शं स्यात् १५
वाहः अपि शब्दान्नवमपंचमद्विर्द्वादशेष्वापि विवाहः। अत्र विषमाद्राशेः षष्ठे मित्रत्वमेकाधिपत्यं चावश्यत्वं च भवति अन्यत्र समरा
शेः अष्टमेषु भवति। एवं विषमराशेः सिंहाद्वित्रायद्वितीये मित्रत्वादि न भवति। यदि फणिचक्रे सर्प्याकारचक्रे नाडीवेधो न स्यात् १४ अ
श्वादिभ्योऽश्विनी भरणी कृत्तिकाभ्यः। तिस्रो नाड्यो निखिलनक्षत्रानुगामिन्यः सर्प्याकारा लिखेत्। तत्रैकनाडी स्थितानां नक्षत्राणां वेधः।

सचमध्यमद्वितीयनाडीस्थानां। भवनं पतिमि
त्रत्वमेकाधिपत्यं च जातकमासिद्धं १५।

६८

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ भवनवशित्वं शालिन्याह। सिंहं विना अन्ये मेषवृश्चिककुंभा मानुषाणां मिथुनकन्यातुलधन्विनां वश्याः। तोयजाताः कर्कमकरमीना मानुषाणां भक्ष्याः सिंहस्य वृश्चिकं विना सर्वे वश्याः अन्यद्दृश्यावश्यं लोकात्ज्ञेयं। वृषस्य मेषो वश्यः। मकरस्य मीनकर्कौ वश्यौ धनुषः सर्वे वश्याः स्यादि १६ अथ लग्नादिस्थे रवौ पञ्चफलं नन्दाह। लग्नस्थे रवौ परिणीता कन्या म्रियते विधवा भवति। मूर्तौ म्रियते तत्पत्नी विधवा वा स्यादेवेति स्वल्पभोक्तृत्वात्। द्वितीये विधनता दारिद्र्यं तृतीये पितृपक्षाम्नाप्रवित्तता। चतुर्थे सहजसंक्षयो विनष्टभ्रातृत्वं। पंचमे पुत्ररुक्। अनपत्यता। अल्पपुत्रत्वं च। षष्ठे प्रियस्योन्नतिः इत्यादि दृष्टिश्च। तथा च शौनकः प्राप्नोति च धनं षष्ठे त्र्यब्दादूर्ध्वं सुतांश्चैव सप्तमे वैधव्यं। परं वर्षादूर्ध्वं तु

हित्वा सिंहं मानुषाणां विधेया भक्ष्यास्तेषां तोयजाता हरेस्तु। वश्याः स्यक्त्वा वृश्चिकं चैकमन्यद्दृश्यावश्यं विद्धि लोकप्र
सिद्धं १६ मूर्तौ विधनता धने सहजसंक्षयः पुत्ररुक्प्रियस्य परमोन्नतिर्विधवता चिरं जीविता। शुभस्सतिरशौनला।
विविधलब्धिरर्थक्षयस्तनुप्रभृतिषु स्थिते भवति भास्करे योषितां १७ प्राणप्रच्युतिरर्थसंपदुभयोः प्रीतिश्च वं
धुच्युतिर्वैरिप्रक्षयं च सवैरता च नियतं सापत्न्यमान्मव्ययः॥

तथा च शौनकः। प्रथमे वर्षे विधवा सप्तमस्थो दिवाकरः। कुरुते अष्टमे दीर्घायुष्ट्वं। त्रिसप्तवर्षाणि यावत्। तथा च शौनकः। दंपत्योः सहमरणं निधनस्थेऽर्के त्रिसप्तत्या। नवमस्थे धर्महानिः परं त्रयोदशाब्दानि यावत् तथा च शौनकः। नवमे तु धर्मयुक्ता त्रयोदशाब्दानि कन्यका भवति। दशमस्थेऽश्लीनला। एकादशस्थे विविधलब्धिः धनाढ्यत्वं। परं त्र्यब्दादूर्ध्वं तथा च शौनकः। कुयोनसंयुक्तं त्र्यब्दादूर्ध्वं तथा यराः सविता। द्वादशस्थेऽर्थक्षयो द्रव्यनाशः वामांगपीडा च। तथा च शौनकः। सेवन्ते व्ययनीतेन वामांग

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र.मा.
टी.
५९

परं त्रयोदशमासि। द्वितीयस्थे अर्थसंपत् परं तृतीयाब्दात्। तथा च शौनकः। अब्दाद्धनं सौभाग्यं करोति चंद्रोऽर्थदो नार्याः। तृतीये उभयोः प्रीतिः चतुर्थे स्वबंधुस्तुतिः भ्रात्रादिवियोगः। परं वर्षत्रयात्। तथा च शौनकः। बंधुभ्यः सुरसुक्तां चतुर्थसंस्थः शशी त्र्यब्दं। पंचमे वै पुत्रं पुत्राभावः एकसुता वा। तथा भोजः। अब्दाद्वै देकसुता सुतस्थे योषित्तनोऽनंतरसप्रसूतिः। केप्याहुः एवं प्रीतिः सुतप्रणाशमन्ये पुनस्त्री जननीव रेतिः एकप्रसूस्तनयगे विसुता स्मृताऽन्य इति दैवज्ञवल्लभोक्तत्वात्। षष्ठे सवैरता। शत्रुबाहुल्यं मृत्युर्वा। तथा च शौनकः। अष्टचतुष्कान्मृत्युर्द्वे पत्नोः षष्ठगे चंद्रे। सप्तमे वशगा। तथा च शौनकः। कन्यातिसौजन्यपतिसापत्न्यं चैव सप्तमे शशिनि। अष्टमे वैधव्यं ततो मरणं परं मासत्रयात्। तथा च भोजः। वैधव्यमेति निधनस्थितिभाजि चंद्रे

स्त्रीसूतिः परकर्मकृत्यमधिकालब्धिः स्वयः संपदं स्यादिंदावुदयात्सुखेन कथितो वित्तक्षयः कैश्चन॥ १८॥ पंचत्वं हि दरिद्रता सधनता स्वभ्रातृवैरं सुतानुत्पत्तिर्दयितोन्नतिः कुचरिता सक्तिः स्वरक्तस्तुतिः॥

मासत्रयाद्भजति पंचतथा च योगात् नवमस्थे कन्याप्रसूतिः। तथा च शौनकः। षट्पुत्री जनयति नवमस्थे शशिनि सप्तमं पुत्रं। दशमे परगृहकर्मकारित्वं। अन्यपुरुषोपभोगश्च। तथा च भोजः। अब्जे हि षट्त्रितयोपभुक्ताकुलप्रमाणं दशमे स्मुपैति। यो विहृज्जनमन्यनरेण योगं कर्मोद्यता स्याद्दशमे शशांके। स्वस्थे विकर्मनिरता न्यनरोपभुक्तेति दैवज्ञवल्लभोक्तत्वात्। एकादशस्थे लब्धिः परं वर्षात्। तथा च भोजः। धनभागेकादशमे वर्षान्मिष्टाशना भवति वेंदौ। द्वादशस्थे द्रव्यनाशः तथा च भोजः। स्वादति धनं सुहृत्स्व व्ययगे पतिनाशशिनि व्ययकृत्॥ १८॥ इति लग्नादिस्थे चंद्रे फलानि। अथ भौमस्य फलं। परं वर्षेण द्वितीये दारिद्र्यं। तृतीये सौभाग्यद्रव्ययुक्ता। तथा च भोजः। यावज्जीवं करोत्युर्वीनंदनः सहजोपगः। सौभाग्यमसमं स्त्रीणां महतां चार्थसंपदं। ६९

तथा च भोजे: । अत्राह्नं ध्रुवि योगं च बंधुवैरं च योनिनाशं च । जातिकुल — संस्थं स्त्रीणां तनयो वुगः कुरुते । पंचमस्थे अनपत्यता । तथा च भो
जः । पंचमगः सुतहीनां करोति भौमोऽथवा मृतप्रसवां । षष्ठे रिपितोन्नतिः इत्यादिना भर्तृसमृद्धिः सप्तमे कु १ चरितासक्तिः पुंश्चली वंध्या च । त
था च भोजः । भवति कुष्टत्वं वंध्या वर्षाद्दुपयाकिन्यापि स्मरगे । अष्टमे रक्तस्रुतिः निरंतरं रक्तस्रावः । अह्ना वुद्धे निवर्तते इत्यर्थः एवं च मभंग्र
हणभावः । रक्तातिसारः प्रदरो वा । तथा च भोजः । निधनेऽस्त कवा वा त्रयोदशोऽब्देष्य स्वपितवती । नवमे भर्तृप्रतिकूलता पत्या सह अप्री
तिः दशमे त्रामिषरुचिः पुंसां मांसाशिनी शाकिनीत्यर्थः परं पंचभिर्वर्षैः । तथा च भोजः । स्याड्डाकिनी समयेन रमांसभक्षा भौमे प्रसिद्धमहिमा

स्याद्भर्तुः प्रतिकूलतामिषरुचिर्वित्ताप्तिरर्थ स्य यो नारीणामुदयादिवर्तिनि महीपुत्रे विवाहोत्सवे १९ सौम्ये भर्तृ
परायणा सुगृहिणी स्यात्स्वामिपक्षार्चिता वाध्वर्ध्यां च सुतान्विना च विजितप्रद्वेषिपक्षा तथा ॥ ॥० ॥ ॥

दशमे षड्व्दात् । एकादशे वित्ताप्तिर्वहु धनता । परं षड्भिर्वर्षैः । तथा च भोजः । मिष्टाशना भवति लाभगते महीजे स्याद्रत्नहेममणिवित्तवतीष
ड्व्दात् । द्वादशेऽर्थस्य यः । परं मासत्रयेण । तथा च भोजः । अंते व्ययहानिर्नृपवंधनानि मासत्रयेण लभतेऽतिनृपक्षपापी ॥ १९ अथ बुधस्य ।
फलं । बुधे लग्नस्थे भर्तृपरायणा पतिव्रता द्वितीये सुगृहिणी धनपुत्रादियुक्ता । तृतीये देवरादिपूज्या । चतुर्थे स्वभ्रातृपूज्या । पंचमे सुतान्वि
ता साध्वी । षष्ठे विजितप्रद्वेषिपक्षा । सप्तमे वंध्या । प्रद्वेषिणी च । तथा च भोजः । विभर्ति भर्तुरिद्वेषं भर्तुर्वा स्या भवत्यारिः । वंध्यात्वमपि चाप्नो ।
ति सप्तमे शशिनः सुते । अष्टमे अशुभैरुक्तिमाः । आसन्नमृतिः परं त्रिभिर्मासैः । तथा च शौनकः । मासत्रयेण कन्या निधनस्थे याति पंचत्वं ।

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नवमस्थेसुकृतिनीधर्मभाक्।दशमेमायाविनीकपटयुक्ता।तथाचशौनकः।कन्याचाद्भुतकुहकादशमस्थेवर्षविंशत्या।एकादशभूरिद्रव्यव
ती।तथाचभोजः।सौभाग्यभाजनवतीवहुपुत्रभृत्यासाध्वीवुधेभवतिहेमविभूषिताच॥द्वादशेवहुव्ययपरा।तपस्विनीच।परंदशमेव
र्षे।तथाचभोः॥व्ययेवुधेकुकादिकरंगचर्य्या।व्यर्थव्ययाद्दशकेतपस्विनीच २० अथगुरुफलं।लग्नस्थेगुरौस्वामीष्टाभर्तृवल्लभा।द्वि
येधनभागिनी।तृतीयेप्रमुदितावध्यादित्यक्तेतिकेचित्।तथाचभोजः।कुर्य्यात्तथाश्वशुरवंधुकुलार्थिहा।निर्वंधूक्तितासहजगसुदितात
था‍न्ये।चतुर्थेद्रव्यान्विता।वंधुपूज्याच।तथाचदैवज्ञवल्लभ।वंध्यर्चितावहुधनाहिवुकोपगेस्यात्।पंचमेसात्मजः।अष्टपुत्राचातथा

वंध्याचासुभिरुज्झितासुकृतिनीमायाविनीचक्रमाद्भूरिद्रव्यवतीवहुव्ययपरालग्नादिभावस्थिते २० स्वामी
ष्टाधनभागिनीप्रमुदितादृव्यान्वितासात्मजानष्टारिर्हृषितोज्झिताचविगतप्राणारताश्रेयसीसिद्धार्थाविभ
वान्वितानिधनिनीभावेषुमूत्त्र्यादिषुस्याद्द्रव्यप्रमदापुरोधसिसुनासीरस्यनूनंक्रमात् २१॥ चशौनकः।जनय
त्यष्टौपुत्रान्पंचमराशौव्यवस्थितेजीवे।षष्ठेनष्टारिः।निस्सपत्निका।सप्तमेदर्पितोज्झिताभर्तृत्यक्ता।तथाचभोजः।¯।जायास्थिते
शीलचरित्रयुक्तारक्ताचविप्रामरपूजनेषु।पत्युःप्रियाचेति।अष्टमेविगतप्राणाक्षीणायुः।पतिवियुक्ताचा।तथाचदैवज्ञवल्लभः।क्षी
णायुरष्टमगृहेपतिवर्जिताचा।नवमेश्रेयसिधर्मरता।पतिव्रताचा।तथाचभोजः।गुरुभर्तृसुरार्चनतत्परापतिव्रताभवतिनिरताचाभवति
चपक्षुरभीष्टाधर्मस्यानोपगेजीवेदशमेसिद्धार्थाकृतकृत्या।एकादशेविभवान्वितासाध्वीच द्वादशेनिधनिनीद्रव्यहीनीपुत्रवनीच

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धिकमधर्मयुक्ता च। संस्कारवती व्ययगे साहुता पुत्रिणी चान्यैः २१ अथ शुक्रफलं। लग्नस्थे शुक्रे भर्तुर्मनोभीष्टा। सपत्नी चा। तथा च भो
जः। स्यादेकपत्निपरिणेतुरिष्टा गुणोद्दीरिना सुतशालिनी च। सौभाग्ययुक्ता नयनाभिरामा रूपाचलग्नस्थितिभाजि शुक्रे। द्वितीये धनचयपरा
क्रूपणा च। तथा च भोजः। काव्ये एयमर्थेपि सति द्वितीयस्थानस्थिते स्याद्गुणज्ञनाना। तृतीये देवरतः। देवरासक्ता। परत्रिवर्षैः। तथा च।
भोजः। दुश्चिक्यके दत्रिभिरस्तशीला निजस्य भर्तुर्भजते कनिष्ठं। चतुर्थे कुलेज्या श्वशुरवर्गपूज्या। पंचमे सत्पुत्रा धनवती च। तथा च भोजः।
पंचमे वहुसुताति धनाढ्या कांतमूर्त्तिरपि दानवपूज्यो। षष्ठे वहुवैरा। शत्रुवहुला। सप्तमे अन्यनिरता भर्त्तरि सवैरा च। तथा च भोजः। सुभगा
मनो भीष्टा भर्त्तुर्द्धनचयपरा देवररता कुलेज्या सत्पुत्रा विहिन वहुवैरान्यनिरता। व्यये धर्मासक्ता सुकृतिनिरता भू
रिविभवा निरर्था शुक्रे स्यात्सुवति रिहलग्नप्रभृतिषु २२ स्यात्सुश्चल्यधनार्थ वन्यथपयोहीनाचहृष्टो रिणी निर्द्वेष्या निज
गर्भपातनपरा नीरुक्कुभग्नव्रता॥ स्यो गज्ञा च साहेश्या पांशुलाय स्मरगे। अष्टमे व्यसुरासन्नमृतिः। नवमे धर्मासक्ता। दशमे सुकृ
तिनिरता। एकादशे वहुधना भूरिविभवा। द्वादशे निरर्था निर्द्रव्या २२ अथ शनिराहुकेतुफलं। लग्नस्थे शनौ पुंश्चली द्वितीये अधना द
रिद्रा। तृतीये अर्थवती चतुर्थे सत्यहीना। पंचमे रोगवती। षष्ठे निर्द्वेष्या शत्रुरहिता। सप्तमे निजगर्भपातनपरा। अष्टमे नीरुक् रोगरहिता।
नवमे भग्नव्रता। दशमे दुश्शीला। एकादशे वहुवित्तवती। धर्मार्थकामयुक्ता। द्वादशे पानसक्ता। मद्यपानरता। एवं लग्नादिभावेषु राहु
केतूनां च फलं ज्ञेयं। लग्नं चापि। षण्मासान्यस्मिन्नक्षेरविचंद्रयोर्ग्रहणं भवति तत्रैव षण्मासं राहुर्द्रष्टव्यः एवं यस्मिन्नृक्षे केतोर्दर्शनं तत्रैव षण्मा

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

र॰मा॰ ७१ तत्रराशौशनिवत्शुभाशुभयोर्ज्ञेयं।चकाराल्लग्नपतिंषष्ठंजन्मराशेर्जन्मलग्नाच्चद्वादशमष्टमंचवर्जयेत्।तथाचशौनकः।लग्नपतौरि
पुभवनेनीचस्थेरविसितनरजनीकरैः।बलरहितैश्चक्षीणांनभवन्त्यपत्यानि।रंध्रपतौद्वादशगोलग्नेनेष्टस्तथाशुभैर्ग्रहैः।लग्नेन्दुस्थानाभ्यांध
नापहृंजीवितस्यकृत्।भास्करव्यवहारेपि।बलवत्यपिलग्नेस्यात्यपरिणेतुर्विलग्नादपिमृत्युरिसाहि।२३ अथशुक्रगुर्वोर्माहात्म्यमाह हिबु
कधर्मेति।चतुर्थनवमपंचमलग्नदशमेषुगुरौशुक्रेवास्थिते।अनिष्टंप्रशमंप्रयाति।शुभंचपुष्टंभवति २४ अथकेंद्रस्थबुधगुरुशुक्राणां

दुश्चरीलावहुविज्ञवत्यतितरांपानप्रशक्तांगनामाग्लग्नाद्दविनेंद्रनेनशिखिनास्वर्भानुनाचक्रमात् २३ हिबुकधर्मसु
तोदयकर्मसुत्रिदशराजगुरौयदिवासिते।यदशुभंशुभतामुपैतितच्छुभफलंनितरामभिवर्द्धते २४ दोषाणां
शतमपहंतिसोमपुत्रःकेंद्रस्थोद्युनमपहायदृश्यमूर्त्तिः।दैत्येज्योद्विगुणमिदंपुनर्वलीयानाचार्यःशमयति
लक्षमप्यवश्यम् २५ अनिष्टफलधामगःशुभकरोग्रहैर्वीक्षितःसुहृद्गुरुसितेन्दुजैर्बलयुतैरपापैर्यदा॥

फलमाह।दोषाणामितिबुधःसप्तमंपरित्यज्यकेंद्रस्थोदोषाणांलक्षणपात्रवर्जमन्येषांशतंहंति।शतशब्दोबह्वर्थः।शुक्रसप्तमंवर्जं
केंद्रस्थोबुधाद्द्विगुणबलः।गुरुस्तुसप्तमवर्जंबुधशुक्राभ्यांसहस्रफलः।सप्तमवर्जमेतेषुकेंद्रेषुविवाहः।श्लोकफलस्पष्टः।अथ
पापग्रहस्थानगाबुधादिग्रहायदाभवंतितदाफलमाह।अनिष्टेति।अनिष्टफलस्यविरुद्धफलस्यक्रूरग्रहस्य।विरुद्धस्यतत्क्षेत्रस्य राम
स्थानगःशुभग्रहोनिजमित्रगुरुबुधशुक्रैःसवलैर्दृष्टःशुभफलोभवति।तत्प्रभृति लग्नादारभ्यपूर्वोक्तैर्ग्रहैःपंचभिःशुभंभवति। ७१

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिमांशुगुरुसूर्यैर्विरहितं गुरुचंद्रसूर्याणां मध्यादेकस्यापि वलं विना अन्यैः पंचभिः सवलमपि नाद्रियत इति २६ अथ येषं शेषु विवा
हः शुभस्तानाह। कोदंडेति। धनुःपूर्वार्द्धमिथुननवांशकेषु परिणीता स्त्री सौख्यं बहुभर्तुः प्रियत्वं च प्राप्नोति। शेषेषु मनुष्यनवांशवर्जितेषु
असती पुंश्चली। धनोज्झिता दरिद्रा स्यात्। धनुषि अधिका विभवकृत्। अतिदरिद्रा स्यादिति केचिद्वदंति। अस्मन्मते सूत्रार्द्धमेव विरु
द्धं। धनुःपूर्वार्द्धस्य मनुष्यांशत्वात् २७ उदयगतेति। लग्नगतनवांशः स्वपतिसहितो दृष्टो वा यदि न भवति तदा वरस्य मृत्युः। एवं लग्नवां

तनुप्रभृतिपंचभिर्गगनगैः शुभैः शोभनं हिमांशुगुरुभास्करैर्विरहितं हितं नो भवेत् २६ कोदंडतौलिजितुमप्र
मदांशकेषु प्राप्नोति सौख्यमतुलं दयिता च भर्तुः शेषेष्वसत्यपि तथा च धनोज्झिता स्यात् चापेऽधिका विभवकृच्च
वदंति केचित् २७ उदयगतनवांशः स्वेशदृष्टो युतो वा न भवति यदि मृत्युः स्यात्तदानीं वरस्य। परिणयनसमये
चेदेवमस्तोदयांशः स्वपतिसहितदृष्टो मृत्युकारी च वध्वाः २८ न शशलवदृष्टा विद्रुषा कदाचिद्दुष्टो घनो यां कु
॥ लदेशधर्मः।

शान्सप्तमांशः स्वाधिपतियुक्तो दृष्टो वा न भवति तदा वध्वा मृत्युः। अयमर्थः। यस्मिन्नवांशे लग्नं भवति तत्स्वामी
लग्नं पश्यन् वरस्यारोग्यकृत्। अथवा स्वांशं पश्यन् श्रेष्ठः लग्नांशात्सप्तमांशाधिपोऽस्त लग्नं पश्यन् यदि वा स्वांशं पश्यति तदा वध्वाः शुभकृ
त् तथा च केशवः २८ उदयास्तशुद्धिरेषा दर्शयितव्या लग्नमंशयुतैः। लग्नांशास्तपतेरपि लग्नांशास्ते दर्शयेत्त्वमंशं च। तथा च भास्करव्यवहारे। ना
थ पुंके स्मिन्नालग्ने भार्यापुत्रनवांशकः। क्रमात्पुंस्त्रीसुतान्याति निघ्नं त्ययुतवीक्षिताः। लग्नमिष्टांशनाथश्चेत्तथा स्त्रीशाधिपो यदा। लग्नांशं पश्यति

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

ततः संक्रान्तेन घटिकाभिर्भजेत् लब्धकलारूपो रविः। शेषं षष्ट्या गुणयित्वा संक्रान्त्यन्त घटिकाभिर्भजेत्। लब्धविकलास्तत्र भुक्तराशीनु
परि संयोज्य राश्यादिको रविर्भवति। तत्र दिवालग्ने अयनांशान् दत्वा भोग्यांशा ग्राह्याः। रात्रिलग्ने षड्युते रवौ सायनांशो भोग्यांशान् त्रिं
शतो विशोध्या ग्राह्याः। ते भोग्यांशैः रविक्रान्तपलोदयगुणैस्त्रिंशद्भक्तैर्भोग्यपलानि लभ्यन्ते। ततस्त्रिभिरंशैर्विंशतिभिः कलाभिर्नवांशप्रमा
णं। ततो नवांशप्रमाणानंशान् नवांशसंख्यागुणान् स्थापयेत्। तत्र नवांशत्रिभागे अयनांशान् दत्वा लग्नप्रमाणगुणे त्रिंशद्भक्ते भु
क्तपलानि। ततो भुक्तभोग्यपलानामेकत्वात् न्तरोदययुतं पलरूपः कलो भवति। षष्टिभक्ते च घटिकाः। धनुरंशे च नवांशे त्रिभागे द्वे क्षिपे

मूलं हित्वेषु स्युत देशशाखाभूपानधर्मैः स्थितिभंगदोषः २९ प्रायेण गोपाः सह हीनवर्णैः प्राच्याश्च संध्या॥समये विवाहम् ॥

त्। अथ लग्नरविस्थापनांशसंयुक्तो एकराशौ भवतः। तदा तयोरन्तरांशैः स्वयं गुणयित्वा त्रिंशता भजेत्। ल
ब्धं कालो भवति २८ अथ यत्र लग्नादिफलमुक्तं तस्य क्वचिद्व्यभिचारमाह। न शास्त्रेति पंडितेन शास्त्रं दृष्ट्वा कुलदेशधर्मो नोलंघनी
याः। देशकुलधर्मा यथा। नागरेषु षडष्टकाद्यगणनं भार्गवेषु भाद्रपदे स्मिन् दशम्यामेव विवाहः। तयोर्देशकुलधर्मो न लंघ्याः २९ अ
स्यानपि कुलधर्मानाह। प्रायेणेति। प्रायेण गोपाः। हीनवर्णाश्च संध्यासमये विवाहं प्रशंसंति। यावत् गोखुरोत्खातरेणुपटलं न शा
म्यति गोधूलिकामित्यर्थः तस्मात् तत्र जामित्रादि दोषो नो विचार्यः। तिथिशुद्धिस्तु गवेष्या। षष्ठाष्टमगो वर्जनीयश्चन्द्रः। तथा च विवाह
पटले। जामित्रं न विचिंतयेद्ग्रहयुतं लग्नं शशांकं तथा नो वेधं न कुवासरं महिगतं नागामिभं पापभैः नो होरां न नवांशकं न हि खगा मूर्त्तौ रि ७२

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धूम्रंवैयोजयेत्तत्रश्वानंचम्लेच्छयोनिषु।खरोवश्याज्जनोयोज्योध्वांक्षोऽन्यकुटंविप्रहर्म्येसिंहंगजंचैवप्रासादसुरमंदिरे।गृहस्वामिमु
खाःश्रेष्ठामध्यमास्तत्पराङ्मुखाः४अथनक्षत्रसव्ययस्यचानयनमाह।अष्टाहतेइति।क्षेत्रफलेविस्तारायामगुणितेपिंडेअष्टभिर्गुणि
तेसप्तविंशतिभक्तेशेषांकसमंगृहनक्षत्रंभवति।नक्षत्राच्चषडष्टादिकंगृहस्वामिनोविचार्यं।नाडीवेधस्तुनवर्ज्यनीयः।तथाचोक्तं।सेव्यसे
वकयोश्चैवगृहंतत्स्वामिनोरपि।परस्परंमित्रयोश्चएकनाडीप्रशस्यते।तथाचलल्लः।आयविरुद्धेभवनेनसुखंषट्काष्टकेमरणं।नध
नंद्विद्वादशकेऽपत्यहानिस्त्रिकोणगेस्यात्।नैधनसप्तमतारेचेतजसोहानिःधनतृतीयतारेयमांशकेगृहपतेर्मृत्युः।यत्रनक्षत्रवि

अष्टाहतेक्षेत्रफलेविभक्तेभसंख्ययाशेषमवेहिधिष्ण्यं।धिष्ण्याद्विभक्तेवसुभिर्व्ययःस्याद्दृक्षापनूतंव्ययमा
लयंसत्५व्ययान्वितेक्षेत्रफलेगृहस्यध्रुवादिनामाक्षरमिश्रितेच॥ ९षमचरणोभवति।तथाकृत्तिकापुनर्वसूत्तराफाल्गुनी

न्यादित्रितयराशिर्नक्षत्रत्रयेणभवति।मेषःसिंहोधनुश्च।तथाचविश्वकर्मशास्त्रे।अश्विन्यादित्रयंमेषेसिंहेप्रोक्तंमघात्रयं।मूलादि
त्रितयंचापेशेषेषुनवराशयः।नवराशयोऽष्टादशनक्षत्रैरितिनक्षत्राष्टभक्तेशेषांकसमोव्ययोभवति।सच्चव्ययःआयसमःपिशा
चाख्यः।आयाधिकोराक्षसः।आयन्यूनोयक्षः।तथाचसमरांगणसूत्रधारेपिशाचोराक्षसोयक्षइतित्रेधाव्ययोमतः।समागम
न्यूनताभिरायसंख्यायथाक्रमः५॥अथांशानयनमाह।व्ययान्वितेति।गृहस्यक्षेत्रफलेविस्तारायामघातरूपेव्ययसंख्यासंयुक्ते
ततोवक्ष्यमाणध्रुवादिगृहाणांमध्येयद्गृहंविधातुमिष्यतेतन्नाम्नाक्षरसंख्यायुक्तेत्रिभिर्भक्तेअवसिष्टांकसमोंऽशकःस्यात्॥०॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र०मा० टी० ७५

एकांकेऽवसिष्टेइन्द्रोनामांशकः। द्वितीयांकेऽवसिष्टेयमोंऽशकः। शून्येऽवशिष्टेभूपतिसंज्ञकोंऽशकः।
।एषांमध्यात्। अंतकोयमसंज्ञोंऽशकोऽसन्नश्रेष्ठः ६ अथध्रुवादिगृहाणांनामानिउपेंद्रवज्राख्यामाह
।ध्रुवमिति। इत्यमुनाप्रकारेणयथाक्रममेतेषांसंज्ञयाएकशालानिगृहाणिजानीयात्। सांप्रतमेषांप्र
स्तारमभिधास्येकथयामि ७॥ ८ तमेवप्रस्तारंरथोद्धतयाह। स्थापयेदिति। प्रथमंचचतुरोगुरून्संस्था

पू०द०प०उ०

ऊर्द्धमुख	ऽऽऽऽ	१	ध्रुव
पूर्वमुख	।ऽऽऽ	२	धान्य
दक्षिणमुख	ऽ।ऽऽ	३	जय
पूर्वद०मुख	।।ऽऽ	४	नंद
पश्चिममुख	ऽऽ।ऽ	५	खर
पू०प०मुख	।ऽ।ऽ	६	कान्त
पश्चिमदमुख	ऽ।।ऽ	७	मनोरम
पू०द०प०मु०	।।।ऽ	८	सुमुख
उत्तरमुख	ऽऽऽ।	९	दुर्मुख
पू०उ०मुख	ऽऽ।	१०	क्रूर
द०उ०मुख	ऽ।ऽ।	११	विपक्ष
पू०द०उ०मु०	।।ऽ।	१२	धनद
प०उ०मुख	ऽऽ।।	१३	क्षय
पू०प०उ०मु०	।ऽ।।	१४	आक्रंद
द०प०उ०मु०	ऽ।।।	१५	विपुल
सर्वदिङ्मुख	।।।।	१६	विजय

त्रिभिर्विभक्तेक्रमशोंऽशकः स्यादिन्द्रोयमोभूपतिरन्तकोसन् ६ ध्रुवंचधान्यंचजयं
चनंदंखरंचकांतंचमनोरमंच। सुवक्त्रसंज्ञंखलुदुर्मुखाख्यंक्रूरंविपक्षंधनदंक्ष
यञ्च ७ आक्रंदसंज्ञंविपुलाह्वयंचस्यात्षोडशंनद्विजयाभिधानं। इत्येकशालानिगृहा ॥
लिविंद्यात्प्रस्तारमेषामधुनाभिधास्ये ८ स्थापयेल्लघुमधोगुरोःपरंस्याद्यथोपरितथैवपूरयेत्॥ पश्चिमंचगु
रुभिःपुनःपुनःसर्वलघ्ववधिरित्ययंविधिः ९ प्रदक्षिणंसच्चमुखादलिंदंविंद्याल्लघुस्थानसमाश्रितंच

प्य। प्रथमगुरोरधस्ताल्लघुंविन्यसेत्। शेषमुपरिसदृशंगुरोरधोगुरून्न्यसेत्। पुनरपिगुरोरधस्ताल्लघुंविन्यस्यशेषमुपरितनेनसमंकुर्या
त्। पश्चिमंचगुरुभिःपुनःपुनःप्रपूरयेत्। एवंसर्वगुरुस्थानेयावत्सर्वेलघवोभवंति॥ एवंसतिषोडशगृहाभवंति ९ अथैषांषोडशाना
मलिंदविन्यासमुपजात्याह॥ प्रदक्षिणमिति। सच्चमुखात्गृहद्वारात्॥ प्रदक्षिणमलिंदंपट्टशालाख्यंभवति॥ ॥ ॥ ॥ १॥

प्रघाणप्रघणालिंदावहिर्द्वारप्रकोष्ठकेइत्यमरसिंहः

राम० ७५

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कभवतीत्याकांक्षायामाह। लघुस्थानसमाश्रितं॥ लघुस्थानेएवभवतीत्यर्थः।चएवार्थे।एवममुनाप्रकारेण पूर्वादिगतेषु पूर्वदक्षिणपश्चिमो त्तरेष्वलिन्देषुषोडशभेदाःस्युः एतदुक्तं भवति। चतुर्भिःगुरुभिः पूर्वाद्यादिशाज्ञेयाः।यत्रयत्र लघुस्तस्यांतस्यांदिशिताव्तसंख्याकान्यलिंदानिभवंति।प्रथमेतुगृहेलघ्वक्षराभावाद्लिंदाभावः।एषांमध्यात्कानिचित्स्ववस्थानेकल्पयित्वापुनःप्रस्तारेएकशालानांत्र्यष्टोत्तरंशतंभ वति। पंचादिगुरुप्रस्तारेद्विशालानांद्विपंचाशत्। त्रिशालानांत्रिसप्ततिसात् ।तेयाश्चब्रह्मशंभुः।विश्वनामैकशालानांभवेदष्टोत्तरंशतं॥ द्वि पंचाशद्द्विशालानांत्रिशालानांत्रिसप्ततिःसंकीर्णस्यैकशालस्यसंख्यागगनसायकैः ५० द्विशालस्यतुसंख्यानमंबरद्वितयंशराः ५२० त्रि शालस्यतथाशून्यद्वितयंवारिराशयः ४०० चतुःशालस्यनेत्राब्धिवसवःपरिकीर्तिताः ८४२ एषांफलानिब्रह्मशंभुटीकातः॥

गृहस्यपूर्वादिगतेष्वलिंदेष्वेवंभवेत्पुंदशषड्भेदाः॥ १०॥

श्रीर्ह्रीन्यविजयोवृद्धिःपुष्टिःसमाननाशको।गोत्रवृद्धिःसमंतानांनवानांक्रमशःफलं।आयासोमानसःशोकःकलहोव्याधिपीडनं। भयंज्ञातेमृतिर्नाशःसप्तानांक्रमशःफलं।भित्तिद्वारस्तंभालिंदप्रमाणंब्रह्मशंभुनोक्तं।उच्छ्रायेणचतुर्हस्ताविस्तारेणैकहस्तिका।गृह व्यासविस्तारांशयुक्ताभित्तिःप्रशस्यते॥ एकसप्ततिसर्वाणिगृहद्वारमनस्मृतेगृहव्यासकराङ्कैरधिकंसमसूत्रकं।शाखानामत्रवि स्तारोभित्तिस्योत्स्यत्रिभागतः।विस्तारोर्द्धेनपार्श्वेपिरूपकर्मक्रमान्वितः।त्रिपंचसप्तशाख्याढ्यंनवदारुसयोनिकं।शाखानांसंनिवेशा स्यनभवेत्याद्तोऽधिकः।त्रिपंचसप्तनवभिर्विभक्तेगृहविस्तरे।एकद्वित्रिचतुर्भागैरलिंदकल्पयेद्बुधः।अस्यार्थः।त्रिविभक्तेविस्तारेएकेन भागेनालिंदंकल्पयेत्।पंचभक्तेभागद्वयेन।सप्तभक्तेत्रिभिर्भागैः।नवभक्तेचतुर्भागैरलिंदमितियदिकश्चित्पृच्छति।एषांषोडशानांगृहाणांम

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

खलिंदानि तथा पंचस्थाने घ्वांधं क्रमेणैकैकान्वितस्य उपर्युपरि योजयेत्। उच्चकेकंन्यजेत्। इति जातं एकाद्यलिंदसंख्या॥ तथा चत्वारि एका लिंदानि। षट् खलिंदानि। चत्वारि त्र्यलिंदानि। एवं चतुरलिंदमिति ॥ १० अथ याम्ये चंद्रे गृहद्वारं न कार्यमित्याह। झषाकरे एवेति। यस्यां दिशि यस्य गृहस्य द्वारं विधीयते तद्दिग्द्वारभेषु तत्संमुखद्वारभेषु नारंभः कार्यः यतोऽग्रस्ते चंद्रे कर्तुस्तत्र न निवासः। पृष्ठस्थे चंद्रे खन्यभयं। चोरकृतभयं द्वारे खन्यं। तस्मादेतत् यत्नेन विचार्यमेव। दक्षिणस्थे चंद्रे द्रव्यनाशः। वामस्थे चंद्रे आयुर्वृद्धिः। तथा च वृद्धशंभुः। धनलाभः। प्रवासः। स्यादायुर्भ्रंशो भयं क्रमात्॥ दक्षाग्रवामपृष्ठस्थे गृहकर्तुर्निशाकरे भानावपि तथैव स्यादधिकं च तदंतरे। धननाशो मृतिर्व्याधिरविनाशोऽतुलो

यस्मात्करेणैव गृहं पुरस्थे कुर्याद्दृशेत्तत्र न जातु कर्त्ता। पतंति खन्या निजपृष्ठसंस्थे पत्नेन तस्मादिदमत्र चिं-
त्यं ११ आषाढचैत्राश्वयुजोर्जमाघज्येष्ठेषु सप्रोष्ठपदेषु नूनं। निःकेतुनानां घटनं नृपाणां योगेश्वराचार्य-
मतेन शस्तं १२

मतः तदंतरे दिक्षु ईशानादिक्रमेण भानौ धननाशादि। पूर्वादिदिक्स्थे भानौ कर्किनक्रेसादिना संक्रांतिफलं वक्ष्यति॥ यथा पृच्छायां गृहसर्सलम्बसर्से सेन्त्रर्से चंद्रमाः॥ सप्तशलाकं तु दातव्यं कृत्तिकादिक्रमेण तत्। वामदक्षिणे दातव्यं प्रशस्तं शांतिकामकं॥ अग्रे पृष्ठे न दातव्यं यदीच्छेच्छ्रेय आत्मनः। क्रूरसंचंद्रस्ववास्तोर्हि अग्रपृष्ठे न शस्यते। शस्यते गृहकुक्षौ तु शिवशांतिफलप्रदं ११॥ अथ येषु मासेषु गृहं न कार्यं तानाह। आषाढेति॥ आषाढचैत्राश्विनकार्तिकमाघज्येष्ठभाद्रपदेषु सप्तसु गृहारंभो योगेश्वराचार्यमते निषिद्धः ॥ परमतमप्रतिषिद्धमनुमतमिति न्यायात् श्रीश्रीपतिनापि निषिद्धमेव॥ १२ ॥ १२ ॥ १२ ॥ १२ ॥ १२ ॥ १२ ॥ १२ ॥ १२ ॥ १२ ॥ १२ ॥

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ चैत्रादीनां मासानां गृहारंभे फलमाह। शोको धान्यमिति। चैत्रे गृहारंभकर्त्तुः शोको भवति। वैशाखे धान्यलाभः। ज्येष्ठे मरणं। आषाढे पशुविना
शः। श्रावणे द्रव्यवृद्धिः। भाद्रपदे द्रव्यनाशः। अश्वयुजि युद्धं। कार्त्तिके भृत्यक्षयः। मार्गे द्रव्यप्राप्तिः। पौषे श्रीप्राप्तिः। माघे वह्निना गृहज्वलनं।
फाल्गुने लक्ष्मीप्राप्तिः। तस्माद्वैशाखश्रावणमार्गपौषफाल्गुनेषु पंचसु गृहारंभः प्रशस्तः १३।१४ अथ किं पूर्वोक्तमासपंचके एव गृहारंभ किम-
न्यदपीत्याकांक्षायामाह। अन्यथेति। अन्यथा उक्तप्रकारमतिक्रम्य निजबुद्धिगर्वाद् ज्ञानाद्यः करोति स व्याधिशोकधननाशमाप्नोति १५।

शोको धान्यं मृतिपशुहृति द्रव्यवृद्धिर्विनाशो युद्धं भृत्यक्षतिरथ धनं श्रीश्च वह्नेर्भयं च लक्ष्मीप्राप्तिर्भवति भवना
रंभकर्तुः क्रमेण चैत्राद्ये चेन्मुनिभिरुदितं वास्तुशास्त्रोपविष्टं १३ कर्किनक्रहरिकुंभगतेऽर्के पूर्वपश्चिम
मुखानि गृहाणि। तौलिमेषवृषवृश्चिकयाने दक्षिणोत्तरमुखानि च कुर्यात् १४ अन्यथा यदि करोति दुर्मति
व्याधिशोकधननाशमश्नुते। मीनचापमिथुनांगनागते कारयेन्न गृहमेव भास्करे १५ कर्मसिद्धिसुखपु-
ष्टिनिमित्तशकुनादि

निमित्तं दैहिकं चक्षुःस्फुरणादि शकुनं दुर्गादि। निमित्तैः शकुनैश्च कर्मसिद्धिसुखं वाद्यमानसं च। आयुर्जीवि
नं। एतेषां संपत्तिम्। शुभनिमित्तशकुनैर्गणको गृहारंभसमयं ब्रूयात्। यदा सन्निमित्तशकुनानि पश्यति तदा प्रष्टुर्गृहारंभं वदेत्। गृहा
रंभे वत्सो विलोकनीयः। यथा कन्यात्रये प्राच्यां शिरः। धनुस्त्रये दक्षिणस्यां। मीनत्रये पश्चिमायां। मिथुनत्रये उत्तरस्यां। तत्संमुखदिशि
च पुच्छं। तत्र शिरोनखनेन जननीमातृपितृपीडा भवति। पृष्ठखनने भयरोगभयं। पुच्छखनने गोत्रक्षयो भवति। कुक्षिखनने स्त्रीपुत्रद्रव्यादि

गृ॰ प्र॰

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्माद्यस्यां दिशि वत्सो भवति तां वत्ससंमुखां च दिशं वर्जयित्वा शेषयोर्दिशोः प्रथमः खातारंभः कार्यः। तथा च दैवज्ञवल्लभे। ऐंद्र्यां शिरो भाद्रपदा
मासैर्याम्येन याम्या मार्गशिरस्त्रयेण। तपस्यमासादिशि पश्चिमायां ज्येष्ठादिमासत्रिषु चोत्तरस्यां। शिरः खनेन्मातृपितॄन्निहन्यात् खनेच्च पृष्ठे भय
रोगपीडा। पुच्छं खनेच्चेत् स्त्रीसुभगोत्रहानिः स्त्रीपुत्ररत्नान्नवसूनि कुक्षौ। प्रवेशेपि शुक्रवद्वत्सो विवर्ज्यः १६॥ अथ पादद्वयेन लग्ने गृहारंभ
स्तदिन्द्रवज्रयाह। द्व्यंगे इति द्विस्वभावे स्थिरे वा लग्ने शुभग्रहयुक्ते दृष्टे सबलैः शुभग्रहैर्दशमस्थैर्गृहारंभः कार्यः १७ अथ लग्ना

ज्ञात्वा प्रवृत्तं गृहारंभे कीर्त्ये यत्समयं बुधः १६ द्व्यंगे स्थिरे वा भवने विलग्ने सौम्यग्रहैर्युक्तनिरीक्षिते च। कर्मस्थितै
र्वीर्ययुतैश्च सौम्यैर्निर्माणमाहुर्भवनस्य संतः १७ पापैस्त्रिषष्ठायगतैस्त्रिकोणकेंद्रस्थितैः साधुभिरालयस्य वा।
हंति निर्माणमिहाष्टमस्थः क्रूरस्तु कर्तुर्मरणं करोति १८ रवौ गृहस्थो गृहिणी शशांके धनं सिते देवगुरौ च सौख्यं
विनाशमायाति बलेन हीने नीचस्थिते चास्तमुपागते च १९ उदये गुरुरस्तगृहे शशिजः सहजेऽथवा निशाकरवि।
शरिपौ। जलगश्च सितो भवनस्य तदाशरदां शतमायुरुशंति बुधाः २०॥ तदाह। पापैरिति। पापग्रहैस्त्रिषष्ठैकादशगैः शुभैः।
त्रिकोणकेंद्रस्थैः गृहारंभः शुभः। पापः पुनरष्टमस्थः कर्तुः स्वामिनो मरणमेव करोति १८ अथ चंद्रार्कगुरुशुक्राणां बलं विना गृहकर्तुर्दोष।
माह। रवाविति। रवौ बलहीने नीचस्थे अस्तंगते वा गृहकर्ता विनश्यति। एवं चंद्रे पत्नी। शुक्रे द्रव्यं गुरौ सौख्यं। चंद्रगुरुसितानामस्तः सूर्यं विनादेव
ताज्योतनुप्रतिदैशिकः। प्रातिदैशिके ह्यस्तदर्शनेन राज्यभयदोषः स्यात्। दिवा चंद्रगुरुसितानां गुरूणां रात्रौ रवेरिति १९ अथ पद्येन लग्ने गृहमारंभं वर्षेषु

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवंरूपे लग्ने निर्मापितं गृहं वर्षशतायुर्भवति २० तथान्यदपि द्रुतविलंबेनाह। यदीति यदा लग्ने शुक्रः। दशमे बुधः। केंद्रे गुरुः। एकादशे रविः। तदा एवंविधे लग्ने आरब्धं गृहं शतवर्षायुर्भवति २१ अथ शतद्वयायुःकरं लग्नमाह। लग्न इति। सुगमं २२ अथाशीतिवर्षायुराह। शशांकेति। दशमश्चंद्रः। चतुर्थे गुरुः। एकादशे भौमशनी २३ अथाभिमतपुष्करं लग्नमाह। स्वोच्चेति। शुक्रे उच्चस्थे अथवा लग्नगे। गुरौ उच्चस्थे चतु-

यदि विलग्नगते भृगुजेऽम्बरे शशिसुतः खलु केंद्रगतो गुरुः। दिनकृदायगतश्च तदा बुधैः शतमितायुरुदीरितमालये २१ लग्ने भृगुः पुत्रगतश्च जीवः षष्ठः कुजस्तिग्मकरस्तृतीयः। निवेशने यस्य गृहस्य तद्द्विशतं हि यांति शृतिवत्सराणां २२ शशांकजीवारखरे १०स्तातलध्रस्थौ कुजार्कजौ लाभगतौ चयस्य। प्रारंभकाले भवनस्य यस्य स्थितिर्निरुक्ता शरदामशीति २३ स्वोच्चवर्तिनि भृगौ विलग्नगे देवमंत्रिणि रसातलेऽथवा। स्वोच्चगे रविसुतेऽथवायगे स्यात् स्थितिः खलु चिरं सह श्रिया २४ स्वर्क्षे चंद्रे लग्नगे केंद्रगे ज्ये लक्ष्मीवत्स्यान्नगृहं भूरिकालं। मित्रस्वोच्चांशस्थितैर्नैः खेचरेन्द्रैर्नीचारिस्थैर्जायते निर्धनित्वं २५ एकोऽपि नूनं परभागवर्ति विपन्नमस्थः खचरो व्दमध्ये॥ र्थे वा। स्वोच्चगे शनौ एकादशे वा लक्ष्म्या सह गृहं चिरस्थायि भवति २४ अथान्यदपि शालिन्याह स्वर्क्षे इति। चंद्रे कर्कट लग्नस्थे। गुरौ केंद्रस्थे। लक्ष्मीयुक्तं गृहं चिरकालं भवति। मित्रांशस्वोच्चांशस्थितैश्च ग्रहैर्लक्ष्मीयुक्तं भवति। नीचनवांशशत्रुनवांशस्थितैश्च ग्रहैर्दारिद्र्यं भवति २५ अथ यादृशे लग्ने गृहं न कार्यं तदुपजात्याह॥ एकोपीति। यद्येकोपि ग्रहो दशमस्थः सप्तमस्थो वा परनवांशगतः शत्रुनवांशगतो भवति तदा वर्षमध्ये गृहं परहस्तगतं करोति

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

वर्णोधिपश्चे द्रूलहीनोऽन्यहस्तगतमेवेति। द्वाभ्यां परतनवांशगताभ्यां पुनस्तत्काले गृहनाशो भवति २६ अथ ये पुनस्तत्रैषु गृहारंभस्तानाह।
पुष्ये पुष्येति। पुष्यरोहिणीउत्तरात्रयचित्रानुराधामृगरेवतीस्वातिहस्तधनिष्ठाशतभिषु प्रथमं गृहारंभः सूत्रविन्यसनं। ब्रह्मशंभुटीकायां तु
तिथिवारकथनं कृतं। एकादशी द्वितीया पंचमी सप्तमी तृतीया च। प्रतिपद्दशमी चेष्टा त्रयोदशी पौर्णमासी च। सूर्येन्दुजीवसौम्यानां भार्गवस्य
च वासरे। सूत्रपातादिकं कार्यमिष्टसमभिवांछता २७ अथ निष्पन्ने गृहे स्वामिनो यत्र न शयनीयं तदाह। गोधान्येति। गवां। धान्यस्य देवानां

करोति नूनं परहस्तयातं स्यात्तुर्वेलश्चेदिह वर्णनाथः २६ पुष्यध्रुवमृदुस्वातिहस्तवासववारुणैः प्रथमो वेश्म
नां सूत्रप्रारंभः सद्भिरिष्यते २७ गोधान्यदेवाग्निगुरुद्विपादस्य येन चैव परं सौम्यमूर्द्ध्नि न चानुवंशं न जलार्द्रपा
दः श्रियो भिलाषी पुरुषो न नग्नः २८ इति वास्तुप्रकरणं १७ अथ प्रवेशो नवमंदिरस्य यात्रानिवृत्ताविह भू
पतीनां सौम्यायने पूर्वदिने विधाय वास्त्वर्चनं भूतबलिं च सम्यक् १॥ गुरूणां चोपरि स्थातुं काष्ठादिव्यवधानेपि॥ न

था पश्चिमायामुत्तरस्यां च मूर्द्धानं कृत्वा जलार्द्रचरणश्च गृहस्वामी न स्वप्यात्। तथानुवंशं च न। वास्तुपुरुषस्य वंशमाश्रित्य न स्वप्यात्। एकाशीति
विभक्ते वास्तुपुरुषे यत्र कोणसंपातः सोऽनुवंशो मर्मस्थानं २८ इति श्रीमहादेवविरचिते रत्नमालाविवरणे वास्तुप्रकरणं सप्तदशं १७ अथेति। अथ
शब्दोऽनंतरार्थः। अथ वास्तुनिष्पत्तेरनंतरं नवमंदिरोत्तरायणे प्रवेशः कार्यः। अथवा राज्ञां यात्रानिवृत्तेरनंतरं प्रवेशे उत्तरायणे कार्यः। किं कृत्वेत्याह। पूर्वदिन
इति। यस्मिन्दिने प्रवेशाय मुहूर्तमवधारितं तस्माद्दिवसस्य पूर्वाह्णे वास्तुपूजनं भूतबलिं च विधाय। तथा च भोजः। उदगयने पूर्वाह्णे पूजिते देवतो विकीर्णे

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ यैर्नक्षत्रैः प्रवेशः शुभस्तान्युपजात्याह। शुभ इति। चित्रानुराधामृगरेवतीरोहिण्युत्तरात्रयनक्षत्रैः प्रवेशः शुभोऽर्थ्यारोग्यसौख्यादिकारी भवति। कैश्चिद्यात्रायामाहृतानि कानिचिच्छुभानि कथितानि। तथा च दैवज्ञवल्लभे। चित्रानुराधामृगपुष्यपौष्णदस्रस्वातिश्रविष्ठाश्च वदारुणेषु। वारेष्वसूर्यासितिजेषु रिक्तातिथौ प्रशस्तो भवतः प्रवेशः। अश्विनीपुष्यहस्ताभिजिच्छ्रवणधनिष्ठाशतभिक्पुनर्वसुनक्षत्रैः प्रवेशकर्तुः शीघ्रमेव प्रयाणं भवति। पूर्वात्रयभरणीमघानक्षत्रैर्नृपो गृहप्रवेष्टा म्रियते। मूलज्येष्ठार्द्राश्लेषानक्षत्रैः कुमारो म्रियते। विशाखायां रा-

शुभः प्रवेशो मृदुभिर्ध्रुवाख्यैः क्षिप्रैश्चरैः स्यात्पुनरेव यात्रा। उग्रैर्नृपो दारुणभैः कुमारो राज्ञी विशाखासु विनाशमेति २ कृत्तिकासु भवनक्षयः शत्रुनादहनेन प्रविशतां न संशयः पंचमस्वहिसदने च नक्कुहूरभेषु शुभकृत्प्रवेशनं ३ रिक्तातिथौ भूसुतभानुवारे निन्द्याश्च योगाः परिवर्जनीयाः। मेषः कुलीरो मकरस्तुला च त्याज्याः प्रवेशे हि न यानदंशाः ४ त्रिकोणकेंद्रगैः शुभैरकंटकाष्टमांत्यगैः। असद्ग्रहैः स्थिरोदये गृहं विशेद्बलो विधौ ५॥०॥

ज्ञी म्रियते २ कृत्तिकेति। यत्सुखं गृहे भवति तद्दिग्दाहेषु अनिषिद्धेषु प्रवेशः शुभः॥३॥ रिक्तेति। निंद्या योगा विष्कुंभादयो विरुद्धसंज्ञाः मेषादिलग्नानि नरैः शास्त्रप्रवेशे त्याज्याः। तथा च लल्लः। मेषस्थे यो भवेद्यात्रा कर्कटान्नाशमाप्नुयात्। तुलोदये भवेद्व्याधिर्धान्यनाशो मृगोदये। अन्ये ये राशयस्त्वेष्टाः प्रवेशे ते शुभावहाः ४ त्रिकोणेति। शुभैस्त्रिकोणकेंद्रस्थैः। पापैः पुनः केंद्राष्टद्वादशवर्जमन्यस्थानाश्रितैः॥ स्थिरलग्ने चंद्रे गोचराष्टकवर्गविधिनाऽनुकूले गृहप्रवेशः प्रशस्तः ५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६।अथजन्मराशिजन्मलग्नाच्चप्रथमद्वित्रिचतुर्थादिराशौलेयस्यफलमाह।नैरुज्येति॥जन्मराशिःजन्मलग्नराशिर्वाप्रवेशलग्नस्था।प्रवेश कर्तुःनीरोगतांकरोति।द्वितीयोदारिद्र्यं।तृतीयोविभूतिं चतुर्थःसुहृन्मरणं।पंचमःपुत्रमरणं।षष्ठःशत्रुमरणं।सप्तमोजायामरणं।अष्टमःप्रवेष्टुरेवमरणं।नवमःप्रवेष्टुःपीडकं।दशमःसिद्धिं।एकादशोद्रव्यं।द्वादशोभयं।करोतीतिप्रत्येकंसंबंधः।जन्मराशिःजन्मलग्नंवा लग्नगतःशौनकादिभिर्गृहप्रवेशःकथितः ७ अथयादृशेलग्नेप्रवेशस्तदाह।केंद्रेति।केंद्राष्टद्वादशेषुपापरहितेषु।पापैःषड्व्या

नैरुज्यंदारिद्र्यंविभूतिकारिवध्वात्मजेद्वेषिकलत्रघातिः॥प्राणापहारीपिटकप्रदश्चसिद्धार्थदोभीतिकरः क्रमेण॥ ६ राशिर्लग्नगतोजन्मराशिर्ल्लग्नोदयेतथा।कीर्तितोमुनिभिर्वेश्मप्रवेशेशौनकादिभिः ७ केंद्रस्थितव्ययैःशुद्धैःक्रूरैःषड्त्र्यायगैर्गुरौ।लग्नेभृगौचकेंद्रेवास्थिरग्राम्योदयेविशेत् ८ पुनर्वसौचसूतिकागृहस्य।निर्मितिःस्मृता॥विरंचिविष्णुभांतरेप्रवेशनेहितंत्वतु॥ ९॥ ९यगैः।गुरौशुक्रेवा।लग्नस्थेकेंद्रस्थेवा।स्थिरग्राम्यलग्नेगृहप्रवेशः कार्यः।ग्राम्यराशयश्चमिथुनधन्विकुंभाः।तदुक्तं।केंद्रत्रिकोणेषुगुरुज्ञशुक्रैःपापेषुकेंद्राष्टमवर्ज्जितेषु।ग्राम्यस्थिरोभोपचयस्थलवेनगृहं विशेच्छीतकरेऽनुकूले।वधूप्रवेशस्तुभास्करव्यवहारात्।गोत्राविवाहभेशास्तःसन्मुहूर्तेस्थिरोदयेवधूप्रवेशेनेवात्रप्रतिशुक्रादयोवि। दुः ८ अथगृहप्रवेशेकृतेवसतोर्दंपत्योरासन्नप्रसवायाःस्त्रियाः पृथग्गृहनिर्माणप्रस्तावात्सूतिकागृहेनिर्माणंप्रवेशंचप्रमाणिकया ह।पुनर्वसाविति चशब्दार्थेपुनर्वसौवेवसूतिकागृहंविदधीत।देवमानुराधिपत्यंतस्या।अभिजित्श्रवणयोरंतरालेतत्रगृहंप्रविशेत्।स्पष्टिपा ७९

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुनर्वसौ निर्माणं अभिजिच्छ्रवणयोरंतराले प्रवेशः तथा च लल्लः। पुनर्वसौ नृपादीनां कर्त्तव्यं सूतिकागृहं। श्रवणाभिजितोर्मध्ये प्रवेशं तत्र।
कारयेत् ९ कृत्वेति। विप्रान्पूर्णकुंभं च पुरः कृत्वा सूर्यं पूर्वादिक्रमेण अंसं तं वामपक्षे कृत्वा अशुचिमान् यात्रोदितैः शकुनैः प्रमुदितो गृहं विशे
त् १० अथ प्रवेशानंतरं विप्रगुणेधः सूत्रधारज्योतिर्विदादीनां पूजां वशस्थेनाह। ततइति। सुगमं. ११ इति श्रीमहादेवविरचिते रत्नमा
लाविवरणे गृहप्रवेशप्रकरणमष्टादशं १८ अथ वस्त्रप्रकरणमारभ्यते। तत्रादावेवाश्विन्यादीनां पृथक्फलानि मंदाक्रांतावसंततिल।

कृत्वा विप्रान्सजलकलशं चाग्रतो वामतोर्कं स्नातः स्रग्वी विमलवसनैर्मंगलैर्वेदघोषैः। व्यस्तै र्यात्राकथितश
कुनैर्द्वारमार्गेण राजा हर्म्यं पुष्पप्रकररुचिरं तोरणाढ्यं विशेच्च १० ततो नृपो विप्रसुहृत्गुणेधसः शिल्पज्ञभू।
गोलविदश्च लिंगिनः धनैश्च रत्नैः पशुभिः समर्चयेज्जडांधदीनान्सुरवासिनस्तथा ११ इति गृहप्रवेशप्रकरणं
१८ वस्त्रप्राप्तिस्तदपहरणं वह्निदाहोर्थसिद्धिश्चाखोर्भीतिर्मृतिरथ धनेप्राप्तिरर्थागमश्चाशोको मृत्युर्नरपति॥
भयं संपदः कर्मसिद्धिरिष्टावाप्तिः सदशनमथो वल्लभत्वं जनानां १॥ ((काम्यामाहावस्त्रप्राप्तिरिति। अश्विनीनक्षत्रे वस्त्रपरि
धानुर्बहुवस्त्रप्राप्तिर्भवेत्। भरण्यां वस्त्रनाशः। कृत्तिकायां वह्निदाहः। रोहिण्यां धनलाभः। मृगशिरसि मूषकेन भक्ष्यते। आर्द्रायां परिधातुर्मरणं। पु
नर्वसु पुष्ययोर्द्रव्यलाभः। अश्लेषायां शोकः। मघायां मृत्युः। पूर्वाफाल्गुन्यां राजभयं। उत्तराफाल्गुन्यां द्रव्यलाभः। हस्ते सर्वकार्यसिद्धिः। चित्रा
यां प्रियागमनं। स्वातौ मिष्टान्नप्राप्तिः। विशाखायां लोकवल्लभत्वं। अनुराधायां मित्रप्राप्तिः। ज्येष्ठायां वस्त्रहानिः। मूले शोकजलार्द्रत्वं
पूर्वाषाढायां रोगप्राप्तिः। श्रवणे नेत्ररोगः॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection.

धनिष्ठायां धान्यप्राप्तिः शतभिषजि विषभयं। उत्तरभाद्रपदायां द्रव्यप्राप्तिः रेवत्यां रत्नलाभः ११२ अथ नवधा स्थितस्य वस्त्रस्य देवमनुष्यराक्षस विभागान् दैवज्ञ लीलया नाह। निवसन्तीति वस्त्रं नवधा परिकल्प्य कोणेषु चतुर्षु देवा निवसन्ति अन्त्ययोः अञ्चलयोः कोणमध्ययोः द्वौ मनुष्यांशौ। पार्श्वे दशान्तयोर्मध्ये मनुष्याः पार्श्वे। वस्त्रमूलं द्विगुणदशा दशान्तः तयोर्मध्ये देवांशयोर्मध्येऽन्ये त्रयोंऽशा गर्भस्थिताः स्ते राक्षसांशाः। यथान्यासः सनपादुकासु विज्ञेयं ३ अथ कज्जलादिना विलिप्ते नववस्त्रे देवमनुष्यराक्षसांशवशात्फ

दे	रा	दे
म	रा	म
दे	रा	दे

मित्राप्तिरंबरहतिः सलिलस्तु निश्चरागोति मिष्टमशनं नयनामपश्च। धान्यं विषोद्भवभयं जलभीर्धनं च रत्नाप्तिरम्बरयुते फलमभ्विभान्स्यात्। निवसन्त्यमरा हि वस्त्रकोणे मनुजाः पार्श्वदशान्तमध्ययोः स्थाः। अपरे त्रिचरक्षसां त्रयोंऽशाः शयने वासनपादुकासु चैवं ३ भोगप्राप्तिर्देवतांशे नरांशे पुत्राप्तिः स्याद्राक्षसांशे च मृत्युः। प्रांते सर्वांशेष्वनिष्टफलं स्यात्स्तु टे वस्त्रे नूतने साध्वसाधुः ४ कज्जलकर्दमगोमयलिप्ते वाससि दग्धवति स्फुटिते च। चिंत्यमिदं नवधा विहितेस्मिन्निष्टमनिष्टफलं च सुधीभिः ५ विप्रादेशाद्वुद्धा हेस्मा पालेन प्रीत्यारतं॥ लंशालिनी दोधकवृत्ताभ्यामाह। भोगप्राप्तिरिति। देवांशे नूतनवस्त्रे मषीकर्दमगोमयादिलिप्ते दग्धे स्फुटिते च भोगप्राप्तिर्भवति मनुष्यांशे कर्दमादिभिर्लिप्ते पुत्रोत्पत्तिः। राक्षसांशे कर्दमादिभिर्लिप्ते मृत्युः। राक्षसांशेपि स्वस्तिकादिचिन्हाद्दग्धछिन्नं वस्त्राकृतिः शुभा भवति। तथा च दैवज्ञवल्लभे। छत्रध्वजकलशवराजपत्रचामरशशिवर्द्धमानतुल्या। उपहतवसनाकृतिः प्रशस्ता भवति निशाचरभागगापि नान्या ४।५ अथ यादृशे कालेन वव

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विप्रादेशादिति।सुगमं ६ इति श्रीमहादेवविरचिते रत्नमालाविवरणे वस्त्रप्रकरणमेकोनविंशतितमः १९ अथ देवताप्रतिष्ठाप्रकरणमारभ्यते
।अथेति। अथशब्दो मंगलार्थः।अंतिमप्रकरणत्वान्मंगलं।प्रतिष्ठाकारयितुश्चंद्रबलेताराबले।चंद्रे लग्ने च शुभग्रहदृष्टे देवप्रतिष्ठा शुभा भ
वति।नन्नरादिषु प्रतिष्ठा १ अथ येषु नक्षत्रेषु यस्य प्रतिष्ठा तानि शार्दूलवृत्तेनाह रोहिणीति रोहिण्युत्तरात्रयरेवती — श्रवणहस्तपुनर्वसु
अश्विनीधनिष्ठानुराधापुष्येषु विष्णोः प्रतिष्ठा।पुष्यश्रवणाभिजित्सु शिवब्रह्मणोः।ईश्वरः शिवः कोब्रह्मा अनुराधायां धनदकार्तिकेययोः।

धिष्ण्ये वारे विधेयं प्राहुर्नूनं नूत्नं वस्त्रं धार्यं ६ इति वस्त्रप्रकरणं १९ अथामरस्थापनमुत्तरायणेन दैववार्क्षति
थिलग्नादिषु।सिते सिते च पक्षे शशितारयोर्बले विधौ विलग्ने च शुभावलोकिते १ रोहिण्युत्तरपौष्णवैष्णवकर
दित्याश्विनीवासवानुराधेन्द्रवजीवभेषु कथितं विष्णोः प्रतिष्ठापनं।पुष्यश्रुत्यभिजित्सु चेश्वरकपो विन्नाधिपस्क
न्दयोर्मैत्रे तिग्मरुचेः करे निर्ऋतिभे दुर्गादिकानां शुभं गणपतिहृढरक्षोयक्षभूतासुराणां प्रथमफणिसरस्वत्या
दिकानां च पौष्णे॥श्रवणासि सुगतनाम्नो वासवे लोकपानां निगदितमखिलं स्थापनं च स्थिरेषु २ सप्तर्षयोप
त्रेचरं ति धिष्ण्ये कार्या प्रतिष्ठा खलु तत्र तेषां॥ ॥हस्ते सूर्यस्य मूले दुर्गादेः २ गणपतीति।गणपतिहृढो गणेशः पौष्णे रेवत्यां श्र

वणास्विश्रवणे च।सुगतनाम्नो बौद्धस्य जिनस्य च स्थिरेषु ध्रुवर्क्षेषु ३ सप्तर्षय इति यस्मिन्नक्षत्रे सप्तर्षयश्चरंति तस्मिन्मुनीनां प्रतिष्ठा
कार्या।येन सुनयः शकादौ पुष्यनक्षत्रे बभूवुः।ततो युधिष्ठिरराज्ये मघानक्षत्रेऽभूवन्।शकादौ षड्विंशत्यधिकपंचविंशतिशतानि गजानि

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

रा॰मा॰ एकैकस्मिन्नस्त्रेशतवर्षाणां चरंति। अतः शकादौ युध्येव भूवुः। तथा च वाराहसंहितायां। आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठि
टी॰ रे नृपतौ षड्द्विकपंचद्वियुतः शककालस्तस्य राज्यस्य। एकैकस्मिन्नृक्षे शतं ते चरंति वर्षाणां। ग्रहाणां च प्रतिष्ठा युध्येकार्या ४ अथ येषु लग्ने
८१ षु येषां प्रतिष्ठा तानि वसंततिलकयाह। सिंहोदयपिति। हि स्वभावे देव्यो दुर्गाः क्षुद्रो व्यंतरादयः चरलग्ने। अनुक्ता इन्द्राद्याः स्थिरलग्ने ५ अथ

श्रीव्यासवाल्मीकघटोद्भवानां तथा स्मृता वाकतिभे ग्रहाणां ४ सिंहोदये दिनकरो मिथुने महेशो नारायण
स्य युवतौ घटभे विधाता। देव्यो हि मूर्तिभवने च निवेशनीयाः क्षुद्राश्चरे स्थिरगृहे निखिलाश्च देवाः ५ तेजस्विनी क्षे
मकृदग्निदाहविधायिनी स्याद्वरदा दृढा च। आनन्दकृत्कल्पविनाशिनी च सूर्यादिवारेषु भवेत्प्रतिष्ठा ६ केंद्रत्रि
कोणाभवमूर्तिषु सद्ग्रहेषु चंद्रार्कभौमशनिषु त्रिषडायगेषु। सांनिध्यमेति नियतं प्रतिमासु देवः कर्तुस्सुतार्थ
सुखसंपदरोगिता च ७ सौम्याः लग्नाद्याश्रिता मूर्तिपूर्वान्भावान्वीर्यैस्तत्कटा वर्द्धयंति॥ ८ प्रतिष्ठावारफलानि उपजा
त्याह तेजस्विनीति। रविवारे प्रतिमायाः प्रतिष्ठा तेजो वर्द्धयति कारयितुः। चंद्रवारे क्षेमकरणी। भौमवारे अग्निदाहवेश्मनः कारयितुश्च। बुधवा
रे कारयितुर्वरदात्री। गुरुवारे दृढा। शुक्रवारे कारयितुरानंदकारिणी। शनिवारे बहुदिवसस्थायिनी। तथा च भीमपराक्रमे॥ आचंद्रार्कस्था
यिनीति गमभास्य पुत्रेतस्या देवतानां प्रतिष्ठा। सर्वे चैतन्स्यात्फलं वीर्ययुक्तै रादित्याद्यैः खेचरैः कर्तुरुक्तं ६ अथ प्रतिष्ठालग्नग्रहाणां फलमा राम॰
हा केन्द्रेति। शुभेषु केंद्रत्रिकोणेषु चंद्रार्कभौमशनिषु त्रिषष्ठैकादशस्थेषु प्रतिमायामवष्टते। कर्तुः सुतद्रव्यसुखसंपन्नारोग्यं च भवति ७ ततु ८१

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लग्नस्थाःकथंनगृह्यन्तेइत्याशंकायांशालिन्याह।सौम्याइति।शुभालग्नप्रभृतीन्सर्वानपिभावान्वीर्यैरुत्कटाःसबलाःसंवर्द्धयंति षष्ठंहि
त्वाषष्ठभावस्थाःपुनःषष्ठभावेनपुष्णंति।किंतुषष्ठस्थाःकर्त्तुःशत्रुनाशंकुर्वन्ति ८ अथप्रकरणानुक्रमणींवृत्तद्वयेनाह।संवत्सरेति॥
स्फुटार्थमिदंवृत्तद्वयं ९।१० अथस्वकृतशास्त्रस्यागममूलतांप्रतिपादनमाह।इतीति।इत्यमुनाप्रकारेणरत्नमालारत्नकोशाद्दृष्ट्वाप्रणी
तोच्छास्त्रात्।स्वगुरुचरणभक्तःश्रीपतिनामागणकगणाग्रणीःउद्धरत्।यथाप्रधानंसंक्षिप्योवाचेत्यर्थःसद्गुणामाधुर्यौजःप्रसादादि

षष्ठंहित्वाभावमेतेहितत्रशत्रुध्वंसंकर्त्तुरुत्पादयंति ८ संवत्सरादितिथिवारगुणास्तनक्षयोगाभिधप्रकर
णंकरणप्रशंसा भानोफलादिनदनुक्षणजांगुणाश्चपश्चादुपग्रहफलंरविसंक्रमोन्यः ९ साज्ञोचरःशशिफ
लंचविलग्नचिंतासंस्कारजाश्चविधयःसनृपाभिषेकः।यात्राविवाहविधिरालयसन्निवेशवेश्मप्रवेशनववस्त्रसु
रप्रतिष्ठा १० इतिललितसुवृत्तांनिर्मलांरत्नमालामुदहरदधिकार्थांसद्गुणांरत्नकोशात् निजगुरुपदभक्तः
श्रीपतिश्शास्त्रदर्शीचतुरगणककंठेराजतामुज्ज्वलश्रीः ११॥ काव्यगुणसहितां।किंभूतां।ललितसुवृत्तांमनोहरनाना

छंदोरमणीयां।अधिकार्थां।बह्वर्थांसाचिरकालं।उदहरद्दैवज्ञकंठेराजतांशोभतां।अथचश्रीपतिर्लक्ष्मीवान्।ललितसुवृत्तां।मनोहरवर्त्तु
लां।अधिकार्थांबहुमूल्यांरत्नमालांसद्गुणांसुसूत्रां।यथारत्नकोशात्समुद्रात् चतुरनिजव्यापारावहितसुनिवेश्मग्रीवायांराजते। अत्रश
ब्दश्लेषार्थाभ्यांउपमालंकारोव्यंग्यः।तेनरूपकालंकारः॥ ११॥ ॥११॥ ॥ ११ ॥११॥ ॥ ११॥ ११॥ ॥ ११॥ ११॥ ११॥ ११॥ ११॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथयः कश्चिद्देवनो पठतितस्योपकारमाह। सुवृत्तयेति। अनयारत्नमालयादैवज्ञोराज्ञांसभायांशोभते। किं ~ त्वलक्षणः। शब्दशास्त्रहीनः॥ अर्थपरिच्युतः साहित्यादिसदलंकारविहीनोपि द्वितीयपक्षेऽलक्षणः। सामुद्रिकोक्तपुरुषलक्षणरहितः। अर्थपरिच्युतोदरिद्रोपिरत्नमालयाशोभांप्राप्नोति १२ अथयः कश्चिद्विचारितपौर्वापर्योद्विजन्माआधुनिकंशास्त्रमेतदित्यवगणयतितंप्रत्याह। आनतरघनेति॥ आनतः शब्दः कोमलामंत्रणे। सखे। इदानींतनविप्रनिर्म्मितमेतच्छास्त्रंस्यादितिमावज्ञांकार्षीः॥ यतोमुनिप्रणीतशास्त्र

सुवृत्तयाश्रीपतिवद्धयानयाकंठस्थयाज्योतिषरत्नमालया। अलक्षणोप्यर्थपरिच्युतोप्यलंसभासुरत्नांगणकोविराजते १२ आनतरद्यतनविप्रनिर्मितंशास्त्रमेतदितिमाहृथास्त्यज। ~ आगमोयमृषिभाषितोर्थतोनापरंकिमपिकीर्तितंमया १३ इतिश्रीश्रीपतिभट्टविरचितायांज्योतिषरत्नमालायांदेवप्रतिष्ठाविधिः २०॥

व्यतिरेकेणमयाकिमपिनोक्तमस्तीति॥ तदेवोच्यतेवरमेतन्नामापिमाग्रहीः॥ तत्त्ववज्ञाकलुषोभूत्वोपहासंकुरुष्वेति। तस्माद्वादिमुहूर्तदोषज्ञेष्वदूरीकृत्यसज्जन्यमाश्रित्यसुप्रज्ञाविबुधस्वल्पमपिमदीयंशास्त्रमवलोकयसितदाविशेषपरिज्ञानतस्तवप्रत्युमेवतेरोचिष्यतइतिभद्रम् १३॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाम्बह्वाकप्रमाणप्रविलपट्टमनेर्वैद्वेदांगवेत्तुःसूनुःश्रीलूनिगस्यात्सुनरणनतिःश्रीमहादेवनामात्मनो
क्तेरत्नमालारुचिरविवरणेसज्जनांभोजभानौस्वभानौदुर्ज्जनेन्दोःप्रकरणममरस्थापनेविंशमेतत् २॥
॥इतिश्रीश्रीमहादेवविरचितेरत्नमालाविवरणेदेवप्रतिष्ठाप्रकरणंविंशतितमोध्यायः॥ ॥ ॥
समाप्तोयंग्रंथः २०॥

CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection

र.मा.
८३

श्रीकाशीविश्वनाथपुरीमेमहल्लाछोटकीपीअरीपरयहबाबूकवलेश्वरसिंहकेमकानमेबा
बूकिसुनदयालसिंहकेछापाखानेमेगनेसप्रभाकरछापाखानेमेरत्नमालाछापागयाजिस
कोलेनाहोयसोनईसडकपरबाबूकवलेसरसिंहकेदुकानपरमिलैगी ली· द्वारकातिवारी१९३७

Digitized by Sarayu Trust Foundation Delhi and eGangotri.
CC0. In Public Domain Prof. Diwakar Dutta Sharma Delhi Collection